Samskrit for Specific Purpose Series - 3



गीतायाः भाषा

संस्कृतं पठ्यताम्

तृतीयः भागः

Learn Samskrit

THE LANGUAGE OF GITA

Part -3

संस्कृतसंवर्धनप्रतिष्ठानम्

Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

तृतीयः भागः

Learn Samskrit

THE LANGUAGE OF GITA

PART - III

ONGC-CSR Supported Project of

Samskrit Promotion Foundation

संस्कृतसंवर्धनप्रतिष्ठानम्

देहली

प्रकाशनम्
संस्कृतसंवर्धनप्रतिष्ठानम्
११२०४/५, वेदभवनम्, गौशालामार्गः
देहली - ११०००६

© प्रकाशकस्य एव

प्रथममुद्रणम् - २०१७
द्वितीयमुद्रणम् - २०२१

मुद्रणम्
प्रिन्टैक इन्टरनेशनल
ए-६/डी, झिलमिल इंडस्ट्रियल एरिया,
दिल्ली - ११००९५

परामर्शसमितिः

डॉ. चान्दकिरणसलूजा
चमूकृष्णशास्त्री (पद्मश्रीः)
डॉ. विश्वासः

लेखकाः

आचार्य अनूप शर्मा
अश्विनी राजेश लङ्के
सौ. श्रद्धा उपाध्ये
श्रीदेव झा

ISBN -978-81-944709-5-3

Learn Samskrit - THE LANGUAGE OF GITA (PART - III)

Third level text book to learn Samskrit through Gita.

Publisher - Samskrit Promotion Foundation
11204/5, Vedabhavanam, Gaushala Marg, Delhi-110006
Email: info@samskritpromotion.in

Pages - 6+282

Second Print - 2021

Printed at : Printech International
A-6/D, Jhilmil Industrial Area, Delhi-110095

Preface

The richness and vibrance of the Samskrit language is a fact acknowledged by scholars and intellectuals across the world. Over millennia, Samskrit has been the principal vehicle of the knowledge traditions and practices of Bharat, or India. This continuum of the language not only helped create innumerable branches of knowledge, but also resulted in an unmatched corpus of classical texts in every conceivable domain of human endeavor, thus laying the very foundations for the development and spectacular rise of the Bharatiya civilization.

However, in recent centuries, Samskrit became tagged as just a 'religious language', an impression that remains in the minds of many people throughout the world even to this day. This situation is due to several reasons: (१) while our day-to-day affairs were in our individual 'mother tongue', Samskrit remained restricted to the conduct of our religious ceremonies and programs; (२) over the last two centuries or so, there were concerted efforts to alienate Samskrit from our mainstream education; and (३) for a long time, there has been a deliberate campaign of disinformation regarding Samskrit, either because of ignorance or because of ulterior motives.

The truth is simple: Samskrit is the unparalled medium, the original language that has articulated all knowledge and wisdom in our region since eternity. The language of science and medicine has been Samskrit. The language of literature has been Samskrit. The language of philosophy and religion has been Samskrit. The language of the arts and music has been Samskrit. It is no wonder that mankind's first astronomical observations were recorded in Samskrit. Again, Samskrit is the only language that truly reveals the secrets of Yoga or Ayurveda.

Yet, we are confronted today with a peculiar situation. While there are countless works in Samskrit on a wide range of subjects, innumerable original works still remain unpublished. To make matters worse, even the published Samskrit literature is seen and studied only through the lens of religion. In order to bridge the disconnect between Samskrit and modern times, the need of the hour is the editing and publishing of ancient Samskrit texts, knowledge retrieval and dissemination, and research and re-interpretation. All this in Samskrit itself --- not in translation, as the essence can easily be lost. The challenges for Bharat are major, but shouldering the responsibilites would not only be life-fulfilling, but also offer our younger generation bright career opportunities and a great future in Samskrit studies.

Today, adult beginners of Samskrit are learning the language for specific purposes: e.g., to access the original texts on Yoga, Ayurveda, Vedanta, as well as the eternal repositories of wisdom such as the Arthashastra, the Vedas, the Upanishads, the Bhagavad-Gita. The vocabulary, verbal repertoire, syntax, semantics, etc., of every discipline differ from one to the other.

With such specific requirements, many modern-day learners find that the conventional language-centered approach is a roundabout route to accessing their information needs. This new Samskrit for Specific Purpose (SSP) series is uniquely tailored for them, offering a more focused methodology. Unlike the traditionally available Samskrit learning materials or courses, this SSP series is uniquely designed to facilitate the study of the target language through the target subject, and the study of the target subject through the target language.

The SSP series can be useful for all irrespective of age groups and occupations for both self-learning and classroom teaching. The SSP series course books herald a new era in Samskrit learning/education, and are supplemented with audio, video and e-learning modules. The approach of 'Samskrit through Samskrit' is extremely crucial. You can, and will, easily learn Samskrit directly, without the crutch of, say, English. Thus, in the broader context, Samskrit through Samskrit (STS) and Samskrit for Specific Purpose (SSP) will together provide a highly effective learning platform for even first-time learners.

In conclusion, a brief word of advice: although learners may feel, at the outset, that their intention to learn Samskrit is only to read and understand the target subject, they must keep in mind that sound/speech (listening and speaking) is the primary medium of a language. The practice of listening and speaking should precede the practice of the reading and writing.

The SSP series is designed to introduce Samskrit through simple conversations, to make learning both interesting and meaningful, followed with graded lessons. The series will not only make learners function adequately in Samskrit, but will also enable them eventually to read, comprehend and undertake studies in Samskrit in their specific interest area at a higher level.

SPF acknowledges and thanks Dr. H R Vishwasa, Mangalore for his guidance and advice in preparation of books of Bhagavad Gita Series.

अनुक्रमणिका

क्र०	पाठनाम	पाठ्यबिन्दवः	पृष्ठसंख्या
१.	लोककल्याणचिन्तको व्यासः	सन्धिः	१
२.	सुभद्रापहृता	स्वरसन्धिः	१०
३.	नारदस्य भगवन्निष्ठा	व्यञ्जनसन्धिः	२४
४.	कर्मण्येवाधिकारस्ते	विसर्गसन्धिः	४९
५.	सुराज्यं खलु युधिष्ठिरराज्यम्	समासः	६९
६.	यथाभागम् अवस्थिताः	अव्ययीभावः	७६
७.	नरपुङ्गवः अर्जुनः	तत्पुरुषसमासः	८२
८.	सर्वगुणनिधानो कृष्णः	बहुव्रीहिसमासः	१०२
९.	गीतामहिमा	द्वन्द्वसमासः	११४
१०.	नरोत्तमः अर्जुनः	कारकम्	१२३
११.	तस्य प्रज्ञा प्रतिष्ठिता	क्तप्रत्ययः	१४१
१२.	कृष्णे बोधितवति ...	सतिसप्तमी	१५४
१३.	क्रियामूलाः हि धातवः	धातु-लकार-क्रियापदानि	१६५
१४.	परोपकारस्य फलम् इदम्	कर्मणिप्रयोगः	१७६
१५.	फलेन तु ईश्वराधीनेन भूयते	भावेप्रयोगः	१९४
१६.	न हन्यते हन्यमाने शरीरे	कर्मणि भावे च शानच्	२०२
१७.	ब्रह्मैव तेन गन्तव्यम्	तव्यत्-अनीयर्-प्रत्ययौ	२१०
१८.	कर्म कारणमुच्यते	कृत्प्रत्ययाः	२२१
१९.	कर्णस्य महती दानदित्सा	तद्धितप्रत्ययाः	२३२
२०.	अन्वयरचना	पदच्छेदः अन्वयरचना च	२४७
	उत्तराणि		२६४

सङ्केताक्षरसूची

ए.व.	एकवचनम्	प्रथमा	प्रथमाविभक्तिः
द्विव.	द्विवचनम्	द्वितीया	द्वितीयाविभक्तिः
ब.व.	बहुवचनम्	तृतीया	तृतीयाविभक्तिः
पुं.	पुंलिङ्गः	चतुर्थी	चतुर्थीविभक्तिः
स्त्री.	स्त्रीलिङ्गः	पञ्चमी	पञ्चमीविभक्तिः
नपुं.	नपुंसकलिङ्गः	षष्ठी	षष्ठीविभक्तिः
पा.सू. ५-४-५४	पाणिनि-अष्टाध्याय्याः निर्दिष्टस्य अध्यायस्य निर्दिष्टस्य पादस्य निर्दिष्टं सूत्रम् ।	सप्तमी	सप्तमीविभक्तिः
क्तः	क्तप्रत्ययान्तः	सम्बो.	सम्बोधनम्
(गी.१४.५)	गीतायाः अमुकस्य अध्यायस्य अमुकः श्लोकः ।	गीता - २.४७	गीतायाः अमुकस्य अध्यायस्य अमुकः श्लोकः ।

(१.१)	अत्र प्रथमा संख्या अध्यायं सूचयति एवं द्वितीया संख्या श्लोकसंख्यां सूचयति ।
आ + गम्	धातोः प्राक् अनेन प्रकारेण यानि अक्षराणि दृश्यन्ते तेषां नाम उपसर्गः इति कथ्यते ।
उपसर्गाः	प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्,वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप इति ।
आधारभूतौ ग्रन्थौ	श्रीमद्भगवद्गीता, गीताप्रेस् गोरखपुर, २३ संस्करणम् । गीताप्रवेशः, द्वितीयः भागः (खण्डद्वयम्, द्वितीयसंस्करणम्), संस्कृतभारती नवदेहली ।

लोककल्याणचिन्तको व्यासः

सन्धिः **१**



एतत् कथानकं सावधानं पठत -

द्वापरयुगस्यान्ते (द्वापरयुगस्य अन्ते) पराशरऋषेः सत्यवत्याः **गर्भान्महर्षेः** (गर्भात् महर्षेः) व्यासस्य **जन्माभवत्** (जन्म अभवत्)। कदाचित् व्यासः प्रातःकाले **सरस्वत्याः तटे** स्थित्वा **ध्यानमग्न आसीत्** (ध्यानमग्नः आसीत्)। तस्यां **ध्यानावस्थायाम्** (ध्यान अवस्थायाम्) एव स **दिव्यदृष्ट्यावलोकितवान्** (सः दिव्यदृष्ट्या अवलोकितवान्) यत् धर्मस्य **ह्रासो जायमानोऽस्तीति** (ह्रासः जायमानः अस्ति इति)। **अन्यच्च** (अन्यत् च) मन्दमतिजनान् वीक्ष्य तस्य **मनोऽखिद्यत** (मनः अखिद्यत)। **तस्मिन्नेव** (तस्मिन् एव) काले सः जनानां कल्याणाय **धृतसङ्कल्पोऽभवत्** (धृतसङ्कल्पः अभवत्)।

ततः सः प्रथमं धर्मबोधनाय वेदान् चतुर्धा विभक्तवान्। यतः पूर्वं वेदः **प्रणवरूपेणाखण्ड एवासीत्** (प्रणवरूपेण अखण्डः एव आसीत्) न तु संहितारूपेण। एतान् सर्वान् सः स्वशिष्यान् पाठितवान्। तत्र पैलनामकं शिष्यम् ऋग्वेदं पाठितवान्। वैशम्पायनं यजुर्वेदम् अध्यापितवान्। जैमिनिं सामवेदं सुमन्तुम् अथर्ववेदं च पाठितवान्।

एवं चतुर्धा विभक्तानां वेदानामध्ययने भगवता व्यासेन केचन नियमाः कृताः। यथा - **उपनीता एव** (उपनीताः एव) वेदं पठेयुः। **तैरपि** (तैः अपि) रात्रौ **वेदो नाध्येतव्यः** (वेदः न अध्येतव्यः)। नभसि मेघच्छन्ने **नाध्येतव्यः** (न अध्येतव्यः)। **अतिवृष्टिकालेऽपि** (अतिवृष्टिकाले अपि) **नाध्येतव्यः इत्यादयः** (न अध्येतव्य इति आदयः)।

एतादृशान् नियमान् श्रुत्वा तं कश्चन ऋषिः पृष्टवान् - "**किमेतावन्मात्रेण** (किम् एतावत् मात्रेण) प्राणिनां **लाभो भवेत्** (लाभः भवेत्) यत्र **नियमा एव** (नियमाः एव) आधिक्येन **निर्दिष्टास्सन्ति** (निर्दिष्टाः सन्ति)। **यतोहि** बहवो **जनास्तादृशास्सन्ति** (बहवः जनाः तादृशाः सन्ति) ये एतादृशान् नियमान् पालयितुमेव न शक्नुवन्ति।
तेषां कृते किम्? अतः **इतोऽपि** (इतः अपि) सरलः कश्चन उपायः करणीयः।"

एतत् सर्वं श्रुत्वा, **सामान्या अपि** (सामान्याः अपि) वेदस्य अर्थं **जानीयुरिति** (जानीयुः इति) धिया **व्यासर्षिः** (व्यास ऋषिः) पुराणानां निर्माणम् अकरोत्। महाभारताख्यम् **इतिहासञ्चालिखत्** (इतिहासं च अलिखत्)। एतान् सर्वान् सः रोमहर्षणं पाठितवान्।

एतेषु पुराणेषु **वेदार्थादृते** (वेदार्थात् ऋते) **नान्यत्** (न अन्यत्) **किमप्यस्ति** (किमपि अस्ति)। वेदे एकलक्षं मन्त्राः सन्ति। तेषां सर्वेषामपि मन्त्राणां भावः व्यासेन अष्टादशमहापुराणेषु **अष्टादशोपपुराणेषु** (अष्टादश उपपुराणेषु) च अष्टलक्षश्लोकेषु **स्थापितोऽस्ति** (स्थापितः अस्ति)। वेदानां सारः महाभारते एकलक्षश्लोकेषु **निहितो वर्तते** (निहितः वर्तते)। एतानि पुराणानि पठित्वा **लोका वेदानुशासनं** (लोकाः वेदानुशासनं) **ज्ञात्वात्मश्रेयसे** (ज्ञात्वा अत्मश्रेयसे) **यतेरन्निति** (यतेरन् इति) **भगवतो व्यासस्य** (भगवतः व्यासस्य) चिन्तनम्।

अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि पदानि तथा च तेषां पार्श्वे कोष्ठकेषु दत्तानि विच्छिन्नानि पदानि यथोदाहरणं क्रमशः लिखत -

यथा - द्वापरयुगस्यान्ते	**द्वापरयुगस्य + अन्ते**
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------
--------------------------------	--------------------------------

------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------
------------------------------- ---------------------------------

❖ **श्रीमद्भगवद्गीतायाः निम्नलिखितेषु श्लोकेषु स्थूलाक्षरैः मुद्रितानि पदानि सावधानं पठत -**

१. **यावदेतान्निरीक्षेऽहं** योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ (गी.१.२२)

२. **एवमुक्तो हृषीकेशो गुडाकेशेन** भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा **रथोत्तमम्** ॥ (गी.१.२४)

३. निहत्य धार्तराष्ट्रान्नः का प्रीतिः **स्याज्जनार्दन** ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ (गी.१.३६)

४. तं तथा **कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्** ।
विषीदन्त**मिदं वाक्यमु**वाच मधुसूदनः ॥ (गी.२.१)

५. **कुतस्त्वा कश्मलमिदं विषमे** समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ (गी.२.२)

एतेषु स्थूलाक्षरैः मुद्रितेषु पदेषु कानि कानि सन्धियुक्तपदानि सन्ति इति अवगच्छत -

	सन्धियुक्तपदानि	**सन्धिच्छेदः**
१.	यावदेतान्	यावत् + एतान्
२.	निरीक्षेऽहम्	निरीक्षे + अहम्
३.	कैर्मया	कैः + मया
४.	एवमुक्तो हृषीकेशः	एवमुक्तः + हृषीकेशः
५.	हृषीकेशो गुडाकेशेन	हृषीकेशः + गुडाकेशेन

६.	सेनयोरुभयोर्मध्ये	सेनयोः + उभयोः + मध्ये
७.	स्याज्जनार्दन	स्यात् + जनार्दन
८.	पापमेवाश्रयेदस्मान्	पापमेव + आश्रयेत् + अस्मान्
९.	हत्वैतानाततायिनः	हत्वा + एतान् + आततायिनः
१०.	कृपयाविष्टम्	कृपया + आविष्टम्
११.	अश्रुपूर्णाकुलेक्षणम्	अश्रुपूर्ण + आकुल + ईक्षणम्
१२.	कुतस्त्वा	कुतः + त्वा

अवधेयम्

एतावता वयं सन्धिसहितानि सन्धिविच्छेदयुक्तानि च पदानि दृष्टवन्तः। अधुना 'सन्धिः नाम कः' 'कति सन्धयः सन्ति' इति ज्ञास्यामः। ततः प्राक् सन्धिज्ञानाय अपेक्षितान् कांश्चन विषयान् पठामः।

अक्षरम् - श्रवणेन्द्रियग्राह्यम् अक्षरम्। अस्यैव नामान्तरं 'वर्णः' इति अस्ति।

अक्षराणि त्रिविधानि - **स्वराः, व्यञ्जनानि, अयोगवाहाः** च इति।

स्वराः - स्वयं राजन्ते इति स्वराः। स्वराः नाम स्वातन्त्र्येण उच्चार्यमाणाः वर्णाः। **अ इ उ ऋ लृ ए ओ ऐ औ** इति एते स्वराः। एतेऽपि त्रिविधाः - १. ह्रस्वस्वराः २. दीर्घस्वराः ३. प्लुतस्वराः च इति।

- एकमात्राकालेन उच्चार्यमाणाः स्वराः ह्रस्वाः। यथा - **अ इ उ ऋ लृ** एते एव **ह्रस्वाः**।
- द्विमात्राकालेन उच्चार्यमाणाः स्वराः दीर्घाः। यथा - **आ ई ऊ ॠ ए ऐ ओ औ** एते **दीर्घाः**। (ए ऐ ओ औ एते ह्रस्वाः न भवन्ति। लृकारः कदापि दीर्घः न भवति)
- त्रिमात्राकालेन उच्चार्यमाणाः स्वराः प्लुताः। **अ३ इ३ उ३ ऋ३ लृ३ ए३ ऐ३ ओ३ औ३** एते प्लुताः। (प्लुताः त्रिमात्राकालेन उच्चार्यन्ते इति बोधयितुं वर्णस्य पुरतः '३' संख्या लिखिता अस्ति।)
- वर्णोच्चारणकालः 'मात्रा' इति उच्यते। मात्रा ज्ञातुम् अयं श्लोकः स्मर्तव्यः।

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम्॥

व्यञ्जनानि - अर्धमात्राकालेन उच्चार्यमाणम् अक्षरं व्यञ्जनम् इति कथ्यते। तच्च व्यञ्जनं वर्गीयव्यञ्जनम् अवर्गीयव्यञ्जनञ्चेति द्विविधं भवति। **यथा - क् ख् ग् घ् ङ्** (कवर्गः), **च् छ् ज् झ् ञ्** (चवर्गः), **ट् ठ् ड् ढ् ण्** (टवर्गः), **त् थ् द् ध् न्** (तवर्गः), **प् फ् ब् भ् म्** (पवर्गः) एतानि पञ्चविंशतिः वर्गीयव्यञ्जनानि। **य् र् ल् व् श् ष् स् ह्** एतानि अष्ट अवर्गीयव्यञ्जनानि।

व्याकरणशास्त्रे वर्गाक्षराणि **कु चु टु तु पु** इत्येतैः शब्दैः निर्दिष्टानि सन्ति। तेन **कु** - कवर्गः, **चु** - चवर्गः, **टु** - टवर्गः, **तु** - तवर्गः, **पु** - पवर्गः इति ज्ञातव्यम्।

> **विशेषः** - सन्धिकार्ये सारल्यार्थं प्रकारान्तरेणापि व्यञ्जनानां विभागः कृतः अस्ति। ग् घ् ङ् ज् झ् ञ् ड् ढ् ण् द् ध् न् ब् भ् म् ह् य् व् र् ल् एतानि **मृदुव्यञ्जनानि** इत्युच्यन्ते। क् ख् च् छ् ट् ठ् त् थ् प् फ् श् ष् स् एतानि **कर्कशव्यञ्जनानि** इत्युच्यन्ते।

अयोगवाहाः[1] - अयोगवाहाः चत्वारः सन्ति। १. (ं) अनुस्वारः - अं इं ...। २. (:) विसर्गः - अः, इः, उः ....।
३. (≍ क ≍ ख) इति कखाभ्यां प्रागर्धविसर्गसदृशः जिह्वामूलीयः। ४. (≍ प ≍ फ) इति पफाभ्यां प्रागर्धविसर्गसदृशः उपध्मानीयः। एतेषां चतुर्णाम् अयोगवाहानां स्वरत्वेन व्यञ्जनत्वेनापि व्यवहारः दृश्यते।

माहेश्वरसूत्राणि

१. अइउण्	२. ऋलृक्	३. एओङ्	४. ऐऔच्	५. हयवरट्
६. लण्	७. ञमङणनम्	८. झभञ्	९. घढधष्	१०. जबगडदश्
११. खफछठथचटतव्	१२. कपय्	१३. शषसर्	१४. हल्	

एतानि माहेश्वरसूत्राणि समग्र-व्याकरण-प्रक्रियायाः आधारभूतानि सन्ति। अत्र हकारादिषु यः अकारः दृश्यते सः केवलम् उच्चारणार्थकः अस्ति। 'हयवर' इत्यनेन ह् य् व् र् इत्येतेषां वर्णानां ग्रहणं भवति इति ज्ञातव्यम्।

प्रत्याहारः -

प्रत्येकं माहेश्वरसूत्रस्य अन्तिमः वर्णः स्वररहितः अस्ति। तेन अन्तिमेन वर्णेन सह उच्चार्यमाणः आदिमवर्णः अन्तिमं व्यञ्जनवर्णं (हल्वर्णं) विहाय मध्ये स्थितान् सर्वान् वर्णान् बोधयति। यथा - '**अण्**' इत्येतत् तदन्तर्गतान् **अ इ उ** इति एतान् त्रीन् वर्णान् एव बोधयति, न तु अन्तिमं णकारम् इति। अत्र आदिमः इत्यनेन सूत्रस्थः आदिमः वर्णः इति न चिन्तनीयम्। अपि तु अस्माभिः आदिमत्वेन विवक्षितः वर्णः इति चिन्तनीयम्। यथा - '**इक्**' इत्येतत् 'अइउण्' सूत्रस्य इकारात् '**ऋलृक्**' सूत्रस्य ककारं यावत् सूचयति। अत्र इकारः सूत्रस्य आदिमः वर्णः नास्ति। अपितु आदिमत्वेन विवक्षितः अस्ति। तेन **इ उ ऋ लृ** इति एतेषां वर्णानाम् एव ग्रहणं भवति, न तु सूत्रान्ते स्थितस्य णकारस्य ककारस्य च। तथैव **यण्, वल्** इत्यादिषु अपि ज्ञेयम्। व्याकरणशास्त्रे एवम् उपसंहृत्य व्यवहृताः शब्दाः प्रत्याहाराः इत्युच्यन्ते। (एतेषु चतुर्दशसूत्रेषु यः अन्तिमः हल्वर्णः दृश्यते, तस्य '**इत्**' इति संज्ञा भवति, तस्य इत्संज्ञकस्य आदिमवर्णस्य च ग्रहणेन प्रत्याहाराणां सिद्धिः भवति।) स्पष्टतार्थम् इतोऽपि केचन प्रत्याहाराः अत्र दीयन्ते।

अण् - अ इ उ

अक् - अ इ उ ऋ लृ

अच् - अ इ उ ऋ लृ ए ओ ऐ औ (सर्वे स्वरवर्णाः)

---

1. न विद्यते योगः माहेश्वरसूत्रेषु येषां ते अयोगाः। योगः सम्बन्धः। वहन्ति इति वाहाः। प्रयोगं निर्वहन्ति इत्यर्थः। अयोगाश्च ते वाहाश्च अयोगवाहाः। अर्थात् ये चतुर्दशसु माहेश्वरसूत्रेषु पठिताः न सन्ति परन्तु प्रयोगं साधयन्ति ते अयोगवाहाः उच्यन्ते।

एच् - ए ओ ऐ औ

अल् - सर्वेऽपि वर्णाः (स्वराः व्यञ्जनानि च)

यण् - य् व् र् ल्

हश् - ह् य् व् र् ल् ञ् म् ङ् ण् न् झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् (मृदुव्यञ्जनानि)

झश् - झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् (वर्गस्य चतुर्थतृतीयव्यञ्जनानि)

खय् - ख् फ् छ् ठ् थ् च् ट् त् क् प् (वर्गस्य द्वितीयप्रथमव्यञ्जनानि)

खर् - ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् इति। (कर्कशव्यञ्जनानि)

व्यञ्जनानि प्रायः स्वरैः सह उच्चार्यन्ते।

यथा -

क् + अ= क	क् + आ = का	क् + इ = कि	क् + ई = की
क् + उ = कु	क् + ऊ = कू	क् + ऋ = कृ	क् + ॠ = कॄ
क् + ए = के	क् + ऐ = कै	क् + ओ = को	क् + औ = कौ
क् + अं = कं	क् + अः = कः		

एषा ककापङ्क्तिः इति नाम्नापि प्रसिद्धा।

संयुक्ताक्षरम् -

'प् र्' इत्येते द्वे व्यञ्जने। **'प्र्'** इत्येतत् संयुक्ताक्षरम्।

सन्धिः

सन्धिः नाम वर्णानां परस्परमेलनम्। वर्णानाम् अतिशयितः सन्निधिः सन्धिः इत्युच्यते। यदा वर्णाः परस्परं सम्मिल्य तिष्ठन्ति तदा तेषु कदाचित् विकाराः भवन्ति। स्वरव्यञ्जनयोः सन्निधौ यदा विकारः भवति तदा सन्धिः इति उच्यते। विकारः नाम कस्यचित् वर्णस्य अदर्शनं कस्यचित् अन्यवर्णस्य प्रयोगः वा।

यथा - यद्यपि + एते = यद्यप्येते (गी.१.३८) अत्र 'इकारस्य स्थाने यकारादेशः अभवत्। इकारस्य स्थाने यकारः, अयमेव अत्र विकारः अस्ति। अस्य नाम सन्धिः इति उच्यते। परन्तु एवम् + उक्त्वा = एवमुक्त्वा (गी.२.९)। अत्र 'म् उ' इति अनयोः वर्णयोः सन्निधौ सत्यपि न कोऽपि विकारः अभवत्। केवलम् अस्माभिः वर्णमेलनं कृतम्। अतः एषः न सन्धिः।

➢ **यदा सन्धिः भवति तदा तत्र आदेशः, आगमः, लोपः प्रकृतिभावः वा भवति।**

१. **आदेशः -** कस्यचिद्वर्णस्य स्थाने अन्यस्य वर्णस्य उदयः आदेशः।

यथा - न + उपजायन्ते न् + **अ** + **उ** + पजायन्ते

न् + **ओ** + पजायन्ते = नोपजायन्ते (गी.१४.२)

अत्र **'अ'** तथा **'उ'** एतयोः स्थाने **'ओ'** इति जातम् अस्ति। अतः एषः आदेशः।

२. **आगमः -** वर्णात् पूर्वं परं वा अन्यस्य वर्णस्य उदयः आगमः इति भवति।

यथा - कुर्वन् + अपि कुर्व + **न्** + **अ** + पि

कुर्व + न् + **न्** + अ + पि =कुर्वन्नपि (गी.५.७)

अत्र नकारात् परतः अपरः नकारः आगतः अस्ति। अतः एषः आगमः।

३. **लोपः -** अत्र वर्णस्य अदर्शनम् अर्थात् लोपः भवति।

यथा - सः + योगी स + **:** + योगी

स + योगी = स योगी (गी.५.२४)

अत्र विसर्गस्य लोपः जातः अस्ति।

४. **प्रकृतिभावः -**

निमित्ते सत्यपि सन्धेः अभावः प्रकृतिभावः भवति।

यथा - अनादी + उभौ अनाद् + ई + उ + भौ = अनादी उभौ (गी.१३.१९)

अत्र **'ई + उ'** इत्यनयोः सन्धिः भूत्वा यकारस्य उत्पत्तिः भवेत्। परन्तु तथा न भवति। अस्यैव नाम प्रकृतिभावः। आदेशः, आगमः, लोपः, प्रकृतिभावः वा यदा भवति तदा तस्य कार्यस्य व्याकरणशास्त्रे सन्धिकार्यम् इति व्यवहारः भवति।

अभ्यासः

क. अधः निर्दिष्टेषु रिक्तस्थानेषु आदेशः, आगमः, लोपः, प्रकृतिभावः इति एतेषु किम् अस्ति इति यथोदाहरणं लिखत -

यथा - इति + एके = इत् + **इ** + **एके** = इत् + **य्** + एके = इत्येके (गी.१८.३) **आदेशः।**

१. पश्य + एताम् = पश्य् + **अ** + **ए** + ताम् = पश्य् + **ऐ** + ताम् = पश्यैताम् (गी.१.३) -----------।

२. सहसैव + अभ्यहन्यन्त = सहसैव् + **अ** + **अ** + भ्यहन्यन्त = सहसैव् + **आ** + भ्यहन्यन्त =सहसैवाभ्यहन्यन्त (गी.१.१३) -----------।

३. शूराः + महेष्वासाः = शूरा + **:** + महेष्वासाः = शूरा महेष्वासाः (गी.१.४) -----------।

४. कदाचित् + न = कदाचि + **त्** + **न** = कदाचि + **न्** + न = कदाचिन्न (गी.२.२०) -----------।

५. धारयन् + अचलम् = धारय + **न्** + **अ** + चलम् = धारय + न् + **न्** + अ + चलम् = धारयन्नचलम् (गी.६.१३) -----------।

६. सः + शब्दः = स + : + शब्दः = स + शब्दः = स शब्दः (गी.१.१३) -----------।

७. विनद्य + उच्चैः = विनद्य् + **अ** + **उ** + च्चैः = विनद्य् + **ओ** + च्चैः = विनद्योच्चैः (गी.१.१२) -----------।

८. भूपती + एतौ = भूपती + एतौ = भूपती एतौ -----------।

९. अमी + अध्यक्षाः = अमी + अध्यक्षाः = अमी अध्यक्षाः -----------।

१०. आगच्छ कृष्ण३ + अत्र गावः सन्ति = आगच्छ कृष्ण३ अत्र गावः सन्ति ----------- ।

११. अहो इच्छा = अहो + इच्छा = अहो इच्छा ----------- ।

ख. यथोदाहरणम् अत्रत्यानि पदानि विभज्य लिखत -

यथा - भीष्ममेव भीष्मम् एव (गी.१.११)

१. वाक्यमिदमाह ------------ ---------- ------------ (गी.१.२१)

२. योत्स्यमानानवेक्षे ----------------- ----------------- (गी.१.२३)

३. समवेतान्कुरूनिति ------------ ----------- --------- (गी.१.२५)

४. एतान्न हन्तुमिच्छामि ---------- ----- -------- ---------- (गी.१.३५)

५. धार्तराष्ट्रान्नः ----------------- ----------------- (गी.१.३६)

६. ज्ञेयमस्माभिः ----------------- ----------------- (गी.१.३९)

७. स्वजनमुद्यताः ----------------- ----------------- (गी.१.४५)

८. मामप्रतीकारमशस्त्रम् -------- -------------- ------------- (गी.१.४६)

९. एवमुक्त्वा -------------------- -------------- (गी.१.४७)

१०. शान्तिमचिरेण -------------------- -------------- (गी.४.३९)

ग. प्रश्नानाम् उत्तरं लिखत -

१. कस्य युगस्यान्ते व्यासमहर्षेः जन्म अभवत् ? --- ।

२. व्यासमहर्षिः कदा कुत्र ध्यानमग्नः आसीत् ? --- ।

३. व्यासमहर्षिः दिव्यदृष्ट्या किम् अवलोकितवान् ? --- ।

४. व्यासः वेदान् कतिधा विभक्तवान् ? ते च के ? --- ।

५. पुराणेषु कति श्लोकाः सन्ति ? --- ।

६. व्यासस्य चिन्तनं किम् ? --- ।

अवधेयम्

सन्धिकार्यं नियमेन कुत्र कर्तव्यम्, कुत्र न कर्तव्यम् इत्यस्य इदम् उत्तरं भवति -

१. एकस्मिन् पदे सन्धिः नित्यं भवति । यथा - पौ + अकः = पावकः (गी.२.२३)

२. धातूपसर्गयोः सन्धिः नित्यं भवति । यथा - सम् + याति = संयाति (गी.२.२२)

३. समासे सन्धिः नित्यं भवति । यथा - भीमेन अभिरक्षितम् = भीम + अभिरक्षितम् = भीमाभिरक्षितम् (गी.१.१०)

४. वाक्ये तु सन्धिः विकल्पेन भवति ।

यथा - एवमुक्तो हृषीकेशः । (गी.१.२४) अत्र सन्धिः कृतः अस्ति ।

एवमुक्तः हृषीकेशः । अत्र सन्धिः न कृतः अस्ति ।

संहितैकपदे नित्या, नित्या धातूपसर्गयोः ।
नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ॥

प्राधान्येन सन्धिः त्रिविधः भवति - **अच्सन्धिः, हल्सन्धिः विसर्गसन्धिः** च इति।

१. **अच्सन्धिः**- स्वरात् स्वरे परे स्वरसन्धिः भवति। (स्वरः + स्वरः)
यथा - कर्मणि + एव = कर्मण्+**इ**+**ए**+व = कर्मण्येव (गी.२.४७)

२. **हल्सन्धिः**- व्यञ्जनात् व्यञ्जने स्वरे परे वा व्यञ्जनसन्धिः। (व्यञ्जनम् + स्वरः/व्यञ्जनम्)
यथा - पापात् + अस्मात् + निवर्तितुम् = पापा +**त्**+**अ**+स्मा+**त्**+**नि**+वर्तितुम् = पापादस्मान्निवर्तितुम् (गी.१.३९)

३. **विसर्गसन्धिः** - विसर्गात् व्यञ्जने स्वरे वा परे विसर्गसन्धिः। (विसर्गः + स्वरः + व्यञ्जनम्)
यथा - यशः + लभस्व = यश +:+ लभस्व = यशो लभस्व (गी.११.३३)

****

सुभद्रापहृता

स्वरसन्धिः **२**

एतत् सम्भाषणम् उच्चैः पठत -



दीनबन्धुः आचार्य ! अर्जुनस्य सुभद्रया सह विवाहः कथम् अभवत् **इत्यहं** श्रोतुम् इच्छामि, किञ्च अर्जुनः तस्याः अपहरणं कृतवान् **इत्यप्यहम्** अशृणवम्। परन्तु कथम् एवं भवितुम् **अर्हतीति** मम शङ्का अस्ति ?

आचार्यः श्रूयताम्। सुभद्रा कृष्णस्य प्रिया **भगिन्यासीत्**। तस्याः विवाहः दुर्योधनेन सह **भवत्विति** बलरामः चिन्तितवान्। परन्तु कस्मैचित् **अपीदं** चिन्तनं **नारोचत**। **तथापि** कस्यचित् अपि बलरामस्य **आज्ञोल्लङ्घनं** कर्तुं धैर्यं **नासीत्**।

दीनबन्धुः **तर्ह्यर्जुनेन** सह सुभद्रायाः विवाहः कथम् अभवत् ?

आचार्यः तदानीं कृष्णः अर्जुनं सूचितवान् यत् 'भवान् मम भगिनीं परिणयतु, **परन्त्वहं** यथा वदामि भवता **तथैव** करणीयम्' इति।

दीनबन्धुः अहो ! एवं वा, इयं **सर्वापि** लीला **कृष्णेनैव** रचिता। अहम् **अद्यैव** ज्ञातवान्।

आचार्यः **अग्रेऽपि** शृणोतु। अर्जुनः संन्यासिवेषेण द्वारकां गत्वा तत्र कस्मिंश्चित् मन्दिरे वासम् अकरोत्। मन्दिरं कश्चन **संन्यास्यागतः**, सः **महात्मास्ति** इति नगरे वार्ता **प्रसृताभवत्**। **सर्वेऽपि** यादवप्रमुखाः **तत्रोपस्थिताः** अभवन्। बलरामः अपि वार्तां श्रुत्वा तस्य दर्शनाय मन्दिरम् आगतः। सोऽपि तस्य दर्शनेन प्रभावितः अभवत्। सः तं **स्वगृहायामन्त्रितवान्**। संन्यासी **तत्रागच्छत्**। बलरामः तस्य **सेवार्थम्** अनुजां सुभद्रां नियोजितवान्। सा तं दृष्ट्वा **नायं** संन्यासी, **किन्त्वर्जुनः** एव इति अवगतवती। दिनेषु गच्छत्सु तयोः अनुरागोऽवर्धत। ततः उचितम् अवसरं प्राप्य अर्जुनेन **सुभद्रापहृता**। तद्विरोधं कुर्वन्तः सैनिकाः तेन पराजिताः। एतां वार्तां श्रुत्वा **बलरामोऽतीव** क्रुद्धः सन् युद्धाय **प्रातिष्ठत**। किन्तु कृष्णः तस्य समाधानम् अकरोत्। ततः परं **सुभद्रार्जुनयोः** परिणयः सवैभवं सम्पन्नः अभवत्।

अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि पदानि अच्-सन्धियुक्तानि सन्ति। तानि अधः लिखत -

इत्यहम्

....

➢ **उपरि स्थूलाक्षरैः मुद्रितेषु पदेषु केषाञ्चित् पदानां सन्धिच्छेदः अधः दर्शितः अस्ति। सावधानं परिशीलयत -**

इत्यहम्	=	**इति + अहम् (त् + इ + अहम्) (इ+अ = य्+अ)**
इत्यप्यहम्	=	इति + अपि + अहम् (त् + इ + अ = त्य) (प् + इ + अहम् = प्यहम्) (इ+अ = य्+अ, इ+अ = य्+अ)
भगिन्यासीत्	=	भगिनी + आसीत् (न् + ई + आसीत्) (ई+आ = य्+आ)
भवत्विति	=	भवतु + इति (त् + उ + इति) (उ+इ = व्+इ)
अपीदम्	=	अपि + इदम् (प् + इ + इदम्) (इ+ई = ई)
नारोचत	=	न + अरोचत (न् + अ + अरोचत) (अ + अ = आ)
अर्हतीति	=	अर्हति + इति (त् + इ + इति) (इ+इ = ई)
आज्ञोल्लङ्घनम्	=	आज्ञा + उल्लङ्घनम् (ज्ञ् + आ + उ + ल्लङ्घनम्) (आ+उ=ओ)
कृष्णेनैव	=	कृष्णेन + एव (कृष्णेन् + अ + एव) (अ+ए = ऐ)

अभ्यासः

क. पाठात् सन्धियुक्तानि पदानि चित्वा (उपरि प्रदत्तानि विहाय) तेषां सन्धिच्छेदं यथोदाहरणं दर्शयत -

यथा - अग्रेऽपि = <u>अग्रे + अपि</u> (ग्र् + ए + अपि = एऽ)

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

९. ---।

१०. ---।

स्वरसन्धिः

यणसन्धिः, सवर्णदीर्घसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, यान्तावान्तादेशसन्धिः, पूर्वरूपसन्धिः प्रकृतिभावसन्धिश्च **इति स्वरसन्धयः सन्ति। एते सन्धयः अत्र सोदाहरणं दर्शिताः सन्ति। तान् सावधानं परिशीलयत -**

१. यण्सन्धिः

एतानि उदाहरणानि परिशीलयत -

१. जीर्णान्यन्यानि	जीर्णानि + अन्यानि	जीर्णान् + **इ** + **अन्यानि** = जीर्णान् + **य्** + अन्यानि	(गी.२.२२)
२. ह्यवशः	हि + अवशः	ह् + **इ** + **अवशः** = ह् + **य्** + अवशः	(गी.३.५)
३. ह्याचरन्	हि + आचरन्	ह् + **इ** + **आचरन्** = ह् + **य्** + आचरन्	(गी.३.१९)
४. त्वय्युपपद्यते	त्वयि + उपपद्यते	त्वय् + **इ** + **उपपद्यते** = त्वय् + **य्** + उपपद्यते	(गी.२.३)
५. व्यूढा	वि + ऊढा	व् + **इ** + ऊढा = व् + **य्** + ऊढा	(गी.१.३)
६. अप्येनम्	अपि + एनम्	अप् + **इ** + एनम्= अप् + **य्** + एनम्	(गी.२.२९)
७. गौर्यैच्छत्	गौरी + ऐच्छत्	गौर् + **ई** + **ऐच्छत्** = गौर् + **य्** + ऐच्छत्	
८. दध्योदनः	दधि + ओदनः	दध् + इ + ओदनः = दध् + **य्** + ओदनः	
९. व्यथयन्त्येते	व्यथयन्ति + एते	व्यथयन्त् + **इ** + **एते** = व्यथयन्त् + **य्** + एते	(गी.२.१५)
१०. क्लेदयन्त्यापः	क्लेदयन्ति + आपः	क्लेदयन्त् + **इ** + आपः = क्लेदयन्त् + **य्** + आपः	(गी.२.२३)

➢ एतेषु उदाहरणेषु **'इ / ई'** इति वर्णाभ्यां परतः **'इ / ई'** वर्णौ त्यक्त्वा अन्ये स्वराः दर्शिताः सन्ति। अत्र परस्थितानां स्वरवर्णानां कारणेन पूर्वस्थितयोः **'इ / ई'** वर्णयोः स्थाने **'य्'** इति आदेशः कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१. अस्त्वकर्मणि = अस्तु + अकर्मणि = अस्त् + **उ** + अकर्मणि = अस्त् + **व्** + अकर्मणि (गी.२.४७)

२. त्वात्मरतिः = तु + आत्मरतिः = त् + **उ** + **आत्मरतिः** = त् + **व्** + आत्मरतिः (गी.३.१७)

३. अस्त्विष्टकामधुक् = अस्तु + इष्टकामधुक् = अस्त् + **उ** + **इष्टकामधुक्** = अस्त् + **व्** + इष्टकामधुक्

४. अस्त्वीक्षते = अस्तु + ईक्षते अस्त् + **उ** + **ईक्षते** = अस्त् + **व्** + ईक्षते

५. त्वेतत् = तु + एतत् = त् + उ + **एतत्** = त् + **व्** + एतत् (गी.३.३२)

६. गजेष्वैरावतः = गजेषु + ऐरावतः = गजेष् + **उ** + **ऐरावतः** = गजेष् + **व्** + ऐरावतः

७. खल्वोषधी = खलु + ओषधी = खल् + **उ** + **ओषधी** = खल् + **व्** + ओषधी

८. वध्वागमनम् = वधू + आगमनम् = वध्+ऊ+आगमनम् = वध्+व+आगमनम्

➢ एतेषु उदाहरणेषु **'उ / ऊ'** इति वर्णाभ्यां परतः **'उ / ऊ'** वर्णौ त्यक्त्वा अन्ये स्वराः दर्शिताः सन्ति। अत्र **'उ / ऊ'** वर्णयोः स्थाने **'व्'** इति आदेशः कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१. पित्रर्चा	=	पितृ + अर्चा	पित् + **ऋ + अर्चा** = पित् + र् + अर्चा
२. भ्रात्रुक्तम्	=	भ्रातृ + उक्तम्	भ्रात् + **ऋ + उक्तम्** = भ्रात् + र् + उक्तम्
३. मात्रेकता	=	मातृ + एकता	मात् + **ऋ** + एकता = मात् + र् + एकता
४. धात्रोजः	=	धातृ + ओजः	धात् + **ऋ** + ओजः = धात् + र् + ओजः
५. जामात्रौदार्यम्	=	जामातृ + औदार्यम्	जामात् + **ऋ** + औदार्यम् = जामात् + र् + औदार्यम्

- एतेषु उदाहरणेषु **'ऋ / ॠ'** इति वर्णाभ्यां परतः **'ऋ / ॠ'** वर्णौ त्यक्त्वा अन्ये स्वराः सन्ति। अत्र **'ऋ / ॠ'** वर्णयोः स्थाने **'र्'** इति आदेशः भवति।
- उपरि दत्तानि सर्वाणि अपि उदाहरणानि यण्सन्धेः सन्ति। **इ ई उ ऊ ऋ ॠ लृ** इत्येतेभ्यः असवर्णे स्वरे परे क्रमेण **य् व् र् ल्** इत्येते आदेशाः भवन्ति।**(इ / ई = य्) (उ / ऊ = व्) (ऋ / ॠ = र्) (लृ = ल्)** एते आदेशाः भवन्ति असवर्णे स्वरे परे।

इ / ई, उ / ऊ, ऋ / ॠ, लृ + असवर्णस्वरः = य् व् र् ल् + असवर्णस्वरः

- यण् इति प्रत्याहारः। तेन **य् व् र् ल्** इत्येतेषां व्यञ्जनानां ग्रहणं भवति। यणः आदेशाः भवन्ति इति हेतोः एषः यण्सन्धिः इति कथ्यते।

ख. यथोदाहरणं सन्धिं कुरुत -

यथा -	**दोषवदिति + एके**	=	**दोषवदित्येके**	**(गी.१८.३)**
१.	एतानि + अपि	=	------------------------------------	(गी.१८.६)
२.	द्वेष्टि + अकुशलम्	=	------------------------------------	(गी.१८.१०)
३.	भवति + अत्यागिनाम्	=	------------------------------------	(गी.१८.१२)
४.	तु + इदानीम्	=	------------------------------------	(गी.१८.३६)
५.	चापि + अपलायनम्	=	------------------------------------	(गी.१८.४३)
६.	लघु + आशी	=	------------------------------------	(गी.१८.५२)
७.	मद्भक्तेषु + अभिधास्यति	=	------------------------------------	(गी.१८.६८)
८.	पितृ + ओजः	=	------------------------------------	
९.	कर्तृ + औत्सुक्यम्	=	------------------------------------	
१०.	तिष्ठति + अकर्मकृत्	=	------------------------------------	(गी.३.५)
११.	तेषु + अवस्थितः	=	------------------------------------	(गी.९.४)

ग. यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा -	**कर्मण्यतन्द्रितः**	=	**कर्मणि**	+	**अतन्द्रितः**	**(गी.३.२३)**
१.	भजाम्यहम्	=	--------------------	+	--------------------	(गी.४.११)

२. प्रवदन्त्यविपश्चितः = -------------------- + -------------------- (गी.२.४२)

३. पर्यवतिष्ठते = -------------------- + -------------------- (गी.२.६५)

४. त्विन्द्रियाणि = -------------------- + -------------------- (गी.३.७)

५. पचन्त्यात्मकारणात् = -------------------- + -------------------- (गी.३.१३)

६. विद्ध्येनम् = -------------------- + -------------------- (गी.३.३८)

७. आत्मन्येव = -------------------- + -------------------- (गी.३.१७)

८. अत्युष्णम् = -------------------- + -------------------- (गी.१७.९)

९. वदत्योमिति = -------------------- + --------------------

१०. आत्मन्यवस्थितम् = -------------------- + -------------------- (गी.१५.११)

२. सवर्णदीर्घसन्धिः

एतानि उदाहरणानि परिशीलयत -

१. न + अनुशोचन्ति	न् + अ + अनुशोचन्ति	आ	=	नानुशोचन्ति	(गी.२.११)
२. कृपया + आविष्टम्	कृपय् + आ + आविष्टम्	आ	=	कृपयाविष्टम्	(गी.२.१)
३. नियम्य + आरभते	नियम्य् + अ + आरभते	आ	=	नियम्यारभते	(गी.३.७)
४. तया + अपहृतचेतसाम्	तय् + आ + अपहृतचेतसाम्	आ	=	तयापहृतचेतसाम्	(गी.२.४४)

➢ एतेषु उदाहरणेषु 'अ / आ' इति वर्णाभ्यां परतः 'अ/आ' वर्णौ स्तः । अत्र 'अ / आ + अ / आ' वर्णयोः स्थाने 'आ' इति दीर्घः एकादेशः भवति ।

एतानि उदाहरणानि परिशीलयत -

१. अस्ति + इति	अस्त् + इ + इति	ई = अस्तीति	(गी.२.४२)
२. उत्क्रामति + ईश्वरः	उत्क्रामत् + इ + ईश्वरः	ई = उत्क्रामतीश्वरः	(गी.१५.८)
३. त्यागी + इति	त्याग् + ई + इति	ई = त्यागीति	(गी.१८.११)
४. नन्दिनी + ईक्षते	नन्दिन् + ई + ईक्षते	ई = नन्दिनीक्षते	

➢ एतेषु उदाहरणेषु 'इ / ई' इति वर्णाभ्यां परतः 'इ / ई' वर्णौ स्तः । अत्र 'इ / ई + इ / ई' वर्णयोः स्थाने 'ई' इति दीर्घः एकादेशः भवति ।

एते उदाहरणे परिशीलयत -

- तेषु + उपजायते तेष् + उ + उपजायते ऊ = तेषूपजायते (गी.२.६२)
- लघु + ऊहते लघ् + उ + ऊहते ऊ = लघूहते

➢ एतयोः उदाहरणयोः 'उ / ऊ' इति वर्णाभ्यां परतः 'उ / ऊ' वर्णौ स्तः । तत्र 'उ / ऊ' वर्णयोः स्थाने 'ऊ' इति दीर्घः एकादेशः कृतः अस्ति ।

एतद् उदाहरणं परिशीलयत -

१. होतृ + ऋकारः होत् + **ऋ + ऋकारः** **ॠ** = होतॄकारः

➢ एतस्मिन् उदाहरणे **'ऋ'** इति वर्णात् परतः **'ऋ'** वर्णः अस्ति। तत्र **'ऋ / ऋ'** वर्णयोः स्थाने **'ॠ'** इति दीर्घः एकादेशः कृतः अस्ति।

➢ अर्थात् **'अ / आ'** इत्येताभ्याम् **'अ / आ'** इत्येतयोः वर्णयोः परयोः **'आ'** इत्येकादेशः भवति। **'इ / ई'** इत्येताभ्याम् **'इ / ई'** इत्येतयोः वर्णयोः परयोः **'ई'** इत्येकादेशः भवति। **'उ / ऊ'** इत्येताभ्याम् **'उ / ऊ'** इत्येतयोः वर्णयोः परयोः **'ऊ'** इत्येकादेशः भवति। **ऋ** इत्यस्मात् **'ऋ / ऌ'** इत्येतयोः वर्णयोः परयोः **'ॠ'** इति पूर्वपरयोः स्थाने एकः आदेशः भवति। **अ आ अ३** इति एते सवर्णाः। **इ ई इ३** इत्यादयः अपि सवर्णाः। अस्मिन् सन्धौ सवर्णस्वरयोः स्थाने तत्तद्वर्णस्य दीर्घस्वरः आदेशः भवति। अतः अस्य नाम सवर्णदीर्घसन्धिः इति।

अ / आ + अ / आ	=	आ	इ / ई + इ / ई	=	ई
उ / ऊ + उ / ऊ	=	ऊ	ऋ + ऋ / ऌ	=	ॠ

घ. अधः प्रदत्तानां सन्धिपदानां यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा -	**पश्यादित्यान्**	=	**पश्य + आदित्यान्**	**(गी.११.६)**
१.	नानुवर्तयतीह	=	------ + ----------- + ------------------	(गी.३.१६)
२.	जहातीह	=	------------------- + ------------------	(गी.२.५०)
३.	कर्तव्यानीति	=	------------------- + ------------------	(गी.१८.६)
४.	तथासक्तः	=	------------------- + ------------------	(गी.३.२५)
५.	वीक्षन्ते	=	------------------- + ------------------	(गी.११.२२)
६.	वीणावादिनीति	=	------------------- + ------------------	
७.	तूद्देशतः	=	------------------- + ------------------	(गी.१०.४०)
८.	नाभावो	=	------------------- + ------------------	(गी.२.१६)
९.	कर्ताहम्	=	------------------- + ------------------	(गी.३.२७)
१०.	नान्तः	=	------------------- + ------------------	(गी.१०.४०)

ङ. यथोदाहरणं सन्धिविच्छेदं दृष्ट्वा सन्धिं कुरुत -

यथा -	**दर्शय + आत्मानम्**	=	**दर्शयात्मानम्**	**(गी.११.४)**
१.	अचिरेण + अधिगच्छति	=	**अचिरेणाधिगच्छति**	(गी.५.६)
२.	त्यक्त्वा + आत्मशुद्धये	=	------------------------------------	(गी.५.११)
३.	एव + आत्मना	=	------------------------------------	(गी.२.५५)
४.	तथा + अन्तर्ज्योतिः	=	------------------------------------	(गी.५.२४)

५.	महती + इच्छा	=	------------------------------------	
६.	अति + इन्द्रियम्	=	------------------------------------	(गी.६.२१)
७.	वधू + उत्सवः	=	------------------------------------	
८.	दुहितृ + ऋद्धिः	=	------------------------------------	
९.	मान + अपमानयोः	=	------------------------------------	(गी.९.७)
१०.	इति + इयम्	=	------------------------------------	(गी.७.४)

३. गुणसन्धिः

एतानि उदाहरणानि परिशीलयत -

१.	कालेन + इह	=	कालेन् + **अ** + इह	**ए**	=	कालेनेह	(गी.४.२)
२.	रमा + ईशः	=	रम् + **आ** + **ई**शः	**ए**	=	रमेशः	
३.	अपरा + इयम्	=	अपर् + **आ** + इयम्	**ए**	=	अपरेयम्	(गी.७.५)
४.	गोपिका + ईक्षते	=	गोपिक् + **आ** + ईक्षते	**ए**	=	गोपिकेक्षते	

➢ एतेषु उदाहरणेषु **'अ + इ, आ + ई, आ + इ, आ + ई'** इति द्वौ द्वौ वर्णौ स्तः । अत्र क्रमशः द्वयोः द्वयोः वर्णयोः स्थाने **'ए'** इति गुणरूपः एकः आदेशः कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१.	ब्रह्म + उद्भवम्	=	ब्रह्म् + **अ** + उद्भवम्	**ओ**	=	ब्रह्मोद्भवम्	(गी.३.१५)
२.	तदा + उच्यते	=	तद् + **आ** + **उ**च्यते	**ओ**	=	तदोच्यते	(गी.६.४)
३.	च + ऊर्ध्वम्	=	च् + **अ** + **ऊ**र्ध्वम्	**ओ**	=	चोर्ध्वम्	(गी.१५.२)

➢ एतेषु उदाहरणेषु **'अ + उ, 'आ + उ, 'अ + ऊ'** इति द्वौ द्वौ वर्णौ स्तः । अत्र द्वयोः द्वयोः वर्णयोः स्थाने **'ओ'** इति गुणरूपः एकः आदेशः कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१.	भरत + ऋषभः	=	भरत् + **अ** + **ऋ**षभः	**अर्** = **भरतर्षभः**	(गी.७.११)
२.	महा + ऋषयः	=	मह् + **आ** + **ऋ**षयः	**अर्** = **महर्षयः**	(गी.१०.६)
३.	तव + ऌकारः	=	तव् + **अ** + **ऌ**कारः	**अल्** = **तवल्कारः**	

➢ एतेषु उदाहरणेषु **'अ + ऋ' 'आ + ऋ' 'अ + ऌ'** इति द्वौ द्वौ वर्णौ स्तः । अत्र अकार-ऋकारयोः आकार-ऋकारयोः च स्थाने **'अर्'** इति आदेशः कृतः अस्ति । तथैव अकारऌकारयोः स्थाने 'अल्' इतिगुणः एकादेशः कृतः अस्ति ।

अ / आ + इ / ई = **ए**	अ / आ + उ / ऊ = **ओ**
अ / आ + ऋ / ॠ = **अर्**	अ / आ + लृ = **अल्**

(गुणः इति काचित् संज्ञा । **ए, ओ, अर्, अल्** इत्येतेषां शब्दानां गुणः इति संज्ञा । अस्मिन् सन्धौ एते वर्णाः आदेशरूपेण भवन्ति, अतः अस्य सन्धेः नाम **'गुणसन्धिः'** इति ।)

च. यथोदाहरणं सन्धिं कुरुत -

यथा - न + इह नेह (गी.७.२)

१.	न + उद्विजेत्	------------	(गी.५.२०)	२.	विगता + इच्छा	------------	(गी.५.२८)
३.	महा + ईश्वरम्	------------	(गी.५.२८)	४.	न + इन्द्रियार्थेषु	------------	(गी.६.४)
५.	यत्र + उपरमते	------------	(गी.६.२०)	६.	न + उभयविभ्रष्टः	------------	(गी.६.३८)
७.	यया + इदम्	------------	(गी.७.५)	८.	मम + ऊरुः	------------	
९.	कृष्ण + ऋद्धिः	------------		१०.	मम + लृवर्णः	------------	
११.	महा + ऋषिः	------------		१२.	तव + इदम्	------------	(गी.११.१०)

छ. यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा - एवेति एव + इति (गी.७.१२)

१. एवेतरः = --------- + ----------	(गी.३.२१)	२.राजर्षयः = --------- + ----------	(गी.९.३३)
३. पुरोवाच = ----------- + ----------	(गी.३.१०)	४. महर्षयः = --------- + ----------	(गी.१०.६)
५. देवर्षिः = --------- + ----------	(गी.१०.१३)	६. मद्भावायोपपद्यते = --------- + ----------	(गी.१३.१८)
७. अमृतोद्भवम् = --------- + --------	(गी.१०.२७)	८. त्वयोक्तम् = --------- + ----------	(गी.११.१)
९. परमेश्वरः = --------- + ----------	(गी.११.३)	१०. पितेव = --------- + ----------	(गी.११.४४)

४. वृद्धिसन्धिः

एतानि उदाहरणानि परिशीलयत -

१.	आत्मा + एव	=	आत्म् + **आ** + एव	**ऐ** = आत्मैव	(गी.६.६)
२.	तत्र + एकाग्रम्	=	तत्र् + **अ** + **एकाग्रम्**	**ऐ** = तत्रैकाग्रम्	(गी.६.१२)
३.	नृप + ऐश्वर्यम्	=	नृप् + **अ** + **ऐश्वर्यम्**	**ऐ** = नृपैश्वर्यम्	
४.	तथा + ऐकाग्र्यम्	=	तथ् + **आ** + **ऐकाग्र्यम्**	**ऐ** = तथैकाग्र्यम्	

➢ एतेषु उदाहरणेषु **'अ / आ'** इति वर्णाभ्यां परतः **'ए / ऐ'** इति वर्णौ स्तः । अत्र **'आ + ए' 'अ + ए' 'अ + ऐ' 'आ + ऐ'** इति क्रमशः द्वयोः द्वयोः वर्णयोः स्थाने **'ऐ'** इति वृद्धिरूपः एकः आदेशः कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१.	च + ओषधीः	=	च् + **अ** + **ओषधीः**	**औ** = चौषधीः	(गी.१५.१३)
२.	गङ्गा + ओघः	=	गङ्ग् + **आ** + **ओघः**	**औ** = गङ्गौघः	

३. महा + औदार्यम् = मह् + **आ** + **औदार्यम्** औ = महौदार्यम्

४. अस्य + औष्ण्यम् = अस्य् + **अ** + **औष्ण्यम्** औ = अस्यौष्ण्यम्

➤ एतेषु उदाहरणेषु **'आ/आ'** इति वर्णाभ्यां परतः **'ओ/औ'** इति वर्णौ स्तः। अत्र **'अ+ओ' 'अ+औ' 'आ+ओ' 'आ+औ'** इति क्रमशः द्वयोः द्वयोः वर्णयोः स्थाने **'औ'** इति आदेशः अस्ति।

एते उदाहरणे परिशीलयत -

१. प्र + ऋच्छति = प्र् + **अ** + **ऋच्छति** **आर्** = प्रार्च्छति

२. परा + ऋक्षवत् = पर् + **आ** + **ऋक्षवत्** **आर्** = परार्क्षवत्

➤ एतयोः उदाहरणयोः **'अ / आ'** इति वर्णाभ्यां परतः ऋकारः अस्ति। अत्र **'अ + ऋ' 'आ + ऋ'** इति क्रमशः द्वयोः द्वयोः वर्णयोः स्थाने **'आर्'** इति आदेशः अस्ति।

(**'अ आ'** इत्येताभ्याम् **'ए ऐ'** इत्येतयोः वर्णयोः परयोः **'ऐ'**कारः **'ओ औ'** इत्येतयोः वर्णयोः परयोः **'औ'**कारः आदेशः भवति।

➤ वृद्धिः इति काचित् संज्ञा। **ऐ, औ, आर्, आल्** इत्येते वृद्धिसंज्ञां प्राप्नुवन्ति। अस्मिन् सन्धौ पूर्वपरयोः स्थाने एते आदेशाः भवन्ति। अतः अस्य सन्धेः नाम **'वृद्धिसन्धिः'** इति।

ज. यथोदाहरणं सन्धिं कुरुत -

यथा - कर्मणा + एव = कर्मणैव (गी.३.२०)

१. न + एति = ------------- (गी.४. ९)

२. अप्रदाय + एभ्यः = ------------- (गी.३.१२)

३. तथा + एव = ------------- (गी.४.११)

४. छित्वा +एनम् = ------------- (गी.४.४२)

५. तत्र + ऐकमत्यम् = -------------

६. दर्शन + औत्सुक्यम् = -------------

७. तव + ओजः = -------------

८. हत्वा + एतान् = ------------- (गी.१.३६)

९. इह + एव = ------------- (गी.५.१९)

१०. त्वया + एकाग्रेण = ------------- (गी.१८.७२)

झ. यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा - तस्यैव = तस्य + एव (गी.६.३)

१. चैकान्तः = ------- + --------- (गी.६.१६)

२. मनसैव = ------- + --------- (गी.६.२४)

३. नियम्यैतद् = ------- + --------- (गी.६.२६)

४. उपैति = ------- + --------- (गी.६.२७)

५. त्वयैकेन = ------- + --------- (गी.११.२०)

६. महौजसः = ------- + ---------

७. महौषधिः = ------- + ---------

८. तत्रैकाग्रम् = ------- + --------- (गी.६.१२)

९. मयैव = ------- + --------- (गी.६.२२)

१०. नैव = ------- + --------- (गी.३.१८)

५. यान्तवान्तादेशसन्धिः (अयादिसन्धिः)

एतानि उदाहरणानि परिशीलयत -

१. कवे + ए कव् + **ए** + **ए** **अय्** + ए = कवये

२. निःश्रेयसकरौ + उभौ   निःश्रेयसकर् + **औ** + उभौ   **आव्** + उभौ= निःश्रेयसकरावुभौ   (गी.५.२)
३. समाधौ + अचला   समाध् + **औ + अचला**   **आव्** + अचला = समाधावचला   (गी.२.५३)
४. पूजार्हौ + अरिसूदन   पूजार्ह् + **औ** + अरिसूदन   **आव्** + अरिसूदन = पूजार्हावरिसूदन   (गी.२.४)

➢ एतेषु उदाहरणेषु **'ए ओ ऐ औ'** इत्येतेभ्यः वर्णेभ्यः परतः स्वराः सन्ति । तत्र **'ए'** वर्णस्य स्थाने **'अय्'** आदेशः, **'ऐ'** इत्यस्य स्थाने **'आय्'** आदेशः, **'ओ'** इत्यस्य स्थाने **'अव्'** आदेशः, **'औ'** इत्यस्य स्थाने **'आव्'** इति आदेशः कृतः अस्ति ।

(**ए ऐ ओ औ** इत्येतेभ्यः वर्णेभ्यः यदि स्वरवर्णः परतः भवति तर्हि एकारस्य स्थाने **'अय्'** ऐकारस्य स्थाने **'आय्'** ओकारस्य स्थाने **'अव्'** औकारस्य स्थाने **'आव्'** इति आदेशाः भवन्ति ।)

ए ऐ ओ औ + स्वरः = अय्, आय्, अव्, आव् + स्वरः

➢ अय् आदेशः आदौ अस्ति इति हेतोः अस्य सन्धेः नाम अयादिसन्धिः अस्ति । अन्यत् च **'अय् आय्'** इत्येतौ यान्तौ, यतः अन्ते **'य्'** अस्ति । **'अव् आव्'** इत्येतौ वान्तौ, यतः अन्ते **'व्'** अस्ति । अतः अस्य नाम **यान्तवान्तादेशसन्धिः** इति अपि अस्ति ।

ञ. यथोदाहरणं सन्धिं कुरुत -

यथा - पूजार्हौ + अरिसूदन - <u>पूजार्हावरिसूदन</u> (गी.२.४)

१. द्वौ + इमौ - --------------- (गी.१५.१६)   २. उभौ + अपि - --------------- (गी.१३.१९)
३. द्वौ + अपि - ---------------   ४. सहनौ + अवतु - ---------------
५. रात्रौ + अन्धाः - ---------------   ६. तौ + असुरौ - ---------------

ट. यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा - सिद्धावसिद्धौ सिद्धौ + असिद्धौ (गी.४.२२)

१. ब्रह्माग्नावपरे = ---------- + ---------- (गी.४.२५)   २. देवावचक्षत = ---------- + ----------
३. भूमावसपत्नम् = ---------- + ---------- (गी.२.८)   ४. उभाववधार्य = ---------- + ----------
५. तावेव = ---------- + ----------   ६. ददावर्धासनम् = ---------- + ----------

६. पूर्वरूपसन्धिः

एतानि उदाहरणानि परिशीलयत -

१. लोके + अस्मिन् = लोक् + **ए** + **अस्मिन्** = **एऽ** = लोकेऽस्मिन् (गी.३.३)
२. वर्तमानो + अपि = वर्तमान् + **ओ** + अपि = **ओऽ** = वर्तमानोऽपि (गी.६.३१)
३. हृद्देशे + अर्जुनः = हृद्देश् + **ए** + **अर्जुनः** = **एऽ** = हृद्देशेऽर्जुन (गी.१८.६१)
४. मे + अमृतम् = म् + **ए** + **अमृतम्** = **एऽ** = मेऽमृतम् (गी.१०.१८)

५. यो + अर्जुन = य् + ओ + अर्जुन = **योऽ** = यऽर्जुनः (गी.६.३२)

एतेषु उदाहरणेषु **'ए / ओ'** इति वर्णाभ्यां परतः अकारः अस्ति । अत्र **'ए / ओ + अ'** इति पूर्वपरयोः वर्णयोः स्थाने **'ए / ओ'** इत्यादेशः कृतः अस्ति । **'ऽ'** इदम् अवग्रहचिह्नं स्पष्टप्रतिपत्तये लिख्यते । पदान्ताद् एकाराद् अकारे परे **'एकारः'** पदान्ताद् ओकाराद् अकारे परे **'ओकारः'** इति पूर्वपरयोः स्थाने एकादेशः भवति । (परवर्णः अकारः **'ए / ओ'** इति पूर्ववत् भवति अतः अस्य पूर्वरूपसन्धिः इति नाम अस्ति ।)

(ए + अ = एऽ   ओ + अ = ओऽ)

ठ. यथोदाहरणं सन्धिं कुरुत -

यथा - आरभते + अर्जुन = <u>आरभतेऽर्जुन</u> (गी.३.७)

१. क्रियते + अर्जुन = ------------- (गी.१८.९)

२. परिणामे + अमृतोपमम् = ---------- (गी.१८.३७)

३. दीयते + अनुपकारिणे = ---------- (गी.१७.२०)

४. विष्णो + अव = -------------

५. श्रेयो + अनुपश्यामि = ------------- (गी.१.३१)

६. इमे + अवस्थिताः = ------------- (गी.१.३३)

७. नरके + अनियतम् = ------------- (गी.१.४४)

८. ते + अवस्थिताः = ------------- (गी.२.६)

९. शिष्यस्ते + अहम् = ------------- (गी.२.७)

१०. प्रयाणकाले + अपि = ------------- (गी.७.३०)

ड. यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा - हृद्देशेऽर्जुन = हृद्देशे + अर्जुन (गी.१८.६१)

१. प्रपद्यन्तेऽन्यदेवताः = ------------- + ------------- (गी.७.२०)

२. तेऽहोरात्रविदः = ------------- + ------------- (गी.८.१७)

३. रात्र्यागमेऽवशः = ------------- + ------------- (गी.८.१९)

४. शम्भोऽव = ------------- + -------------

५. अन्तकालेऽपि = ------------- + ------------- (गी.२.७२)

६. लोकेऽस्मिन् = ------------- + ------------- (गी.३.३)

७. देहेऽस्मिन् = ------------- + ------------- (गी.८.२)

८. मोक्ष्यसेऽशुभात् = ------------- + ------------- (गी.९.१)

९. येऽवस्थिताः = ------------- + ------------- (गी.११.३२)

१०. ऋतेऽपि = ------------- + ------------- (गी.११.३२)

७. प्रकृतिभावः

(क) ऋति प्रकृतिभावः

पूर्वं वयं यण्-आदिसन्धिं पठितवन्तः । तदनुसारम् अधोलिखितेषु पदेषु निमित्ते सति अपि एकत्र सन्धिः न कृतः अस्ति अपितु विकल्पेन प्रकृतिभावः कृतः अस्ति । अतः उभयविधं रूपं दत्तम् अस्ति । प्रकृतिभावस्य नियमः अग्रे दत्तः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१. ब्रह्मा + ऋषिः	=	**ब्रह्म ऋषिः** (अत्र प्रकृतिभावः)
ब्रह्मर्षिः	=	अत्र प्रकृतिभावस्य अभावपक्षे गुणसन्धिः।
२. देव + ऋषिः	=	**देव ऋषिः** (अत्र प्रकृतिभावः)
देवर्षिः	=	अत्र प्रकृतिभावस्य अभावपक्षे गुणसन्धिः।
३. प्रज्ञा + ऋतम्भरा	=	**प्रज्ञ ऋतम्भरा** (अत्र प्रकृतिभावः)
प्रज्ञर्तम्भरा	=	अत्र प्रकृतिभावस्य अभावपक्षे गुणसन्धिः।
४. भरत + ऋषभः	=	**भरत ऋषभः** (अत्र प्रकृतिभावः)
भरतर्षभः	=	अत्र प्रकृतिभावस्य अभावपक्षे गुणसन्धिः।
५. शम्भु + ऋच्छति	=	**शम्भु ऋच्छति** (अत्र प्रकृतिभावः)
शम्भ्वृच्छति	=	अत्र प्रकृतिभावस्य अभावपक्षे यणसन्धिः।
६. पितृ + ऋद्धिः	=	**पितृ ऋद्धिः** (अत्र प्रकृतिभावः)
पितॄद्धिः	=	अत्र प्रकृतिभावस्य अभावपक्षे सवर्णदीर्घसन्धिः।
७. गुरु + ऋणम्	=	**गुरु ऋणम्** (अत्र प्रकृतिभावः)
गुर्वृणम्	=	अत्र प्रकृतिभावस्य अभावपक्षे यणसन्धिः।
८. पितृ + ऋणम्	=	**पितृ ऋणम्** (अत्र प्रकृतिभावः)
पितॄणम्	=	अत्र प्रकृतिभावस्य अभावपक्षे सवर्णदीर्घसन्धिः।

एतेषु उदाहरणेषु **'अ आ ऋ'** इत्येते स्वराः सन्ति, एतेभ्यः परतः ऋकारः अस्ति। सन्धेः निमित्तम् अस्ति, तथापि सन्धिकार्यं न अभवत्। अतः ऋति प्रकृतिभावः इति नाम कृतम् अस्ति।

(ख) प्लुतप्रकृतिभावः

एतद् उदाहरणं परिशीलयत -

आगच्छ धनञ्जय३ + अत्र भीमः अस्ति। अत्र सवर्णदीर्घसन्धेः निमित्तम् अस्ति। परन्तु सन्धिः न भवति।

अतः आगच्छ धनञ्जय३ अत्र भीमः अस्ति। इत्येव वाक्यं तिष्ठति।अस्य नाम प्लुतप्रकृतिभावः।

(ग) प्रगृह्यप्रकृतिभावः

एतानि उदाहरणानि परिशीलयत -

१. अनादी + उभौ (यण्सन्धेः निमित्तम् अस्ति)	=	अनादी उभौ
२. गुरू + उत्तिष्ठतः (सवर्णदीर्घसन्धेः निमित्तम् अस्ति)	=	गुरू उत्तिष्ठतः।
३. फले + एते (यान्तवान्तादेशसन्धेः निमित्तम् अस्ति)	=	फले एते।

➢ **ईकारान्तम् ऊकारान्तम् एकारान्तं** च द्विवचनं प्रगृह्यसंज्ञां प्राप्नोति। एते प्रगृह्यसंज्ञकवर्णाः स्वरवर्णे परे प्रकृतिभावं प्राप्नुवन्ति। अतः उपरि स्वरसन्धेः निमित्ते सति अपि सन्धिः न अभवत्। तथैव अमी इत्यस्य ईकारः प्रगृह्यसंज्ञां प्राप्नोति। ओकारान्तम् अव्ययम्, आ इत्यव्ययं च (तत्र आङ् न ग्राह्यः)प्रगृह्यसंज्ञां प्राप्नोति। एतेषाम् अपि प्रकृतिभावः भवति। यथा -

१. अमी + अर्चकाः (यण्सन्धेः निमित्तम् अस्ति) = अमी अर्चकाः

२. अहो + ईशाः (अयादिसन्धेः निमित्तम् अस्ति) = अहो ईशाः

३. आ + एवं वा (वृद्धिसन्धेः निमित्तम् अस्ति) = आ एवं वा

ढ. यथोदाहरणं सन्धिविच्छेदं कुरुत -

यथा -	**विस्तरेणात्मनः**	**=**	**विस्तरेण + आत्मनः**	**(गी.१०.१८)**
१.	ब्रह्मोद्भवम्	=	--------------- + ---------------	(गी.३.१५)
२.	ह्यकर्मणः	=	--------------- + ---------------	(गी.३.८)
३.	कर्मणैव	=	--------------- + ---------------	(गी.३.२०)
४.	तदग्रेऽमृतोपमम्	=	--------------- + ---------------	(गी.१८.३८)
५.	यत्तेऽहम्	=	--------------- + ---------------	(गी.१०.१)
६.	निःश्रेयसकरावुभौ	=	--------------- + ---------------	(गी.५.२)
७.	सम्भवाम्यात्ममायया	=	--------------- + ---------------	(गी.३.६)
८.	तथाप्नोति	=	--------------- + ---------------	(गी.१८.५०)
९.	कर्तव्यानीति	=	--------------- + ---------------	(गी.१८.६)
१०.	एवायम्	=	--------------- + ---------------	(गी.४.३)

ण. यथोदाहरणं स्वरसन्धेः नाम रिक्तस्थानेषु लिखत -

सन्धिपदम्	**सन्धि-विच्छेदः**	**वर्णक्रमः**		**सन्धिनाम**	
यथा - एवाभिरक्षन्तु	**एव + अभिरक्षन्तु**	**एव् + अ + अ + भिरक्षन्तु**	**(आ)**	**सवर्णदीर्घसन्धिः**	**(गी.१.११)**
१. व्यनुनादयन्	वि + अनुनादयन्	व् + इ + अ + नुनादयन्	(य)	-------------	(गी.१.१९)
२. मेऽच्युत	मे + अच्युत	म् + ए + अ + च्युत	(ए)	-------------	(गी.१.२१)
३. रथोत्तमम्	रथ + उत्तमम्	रथ् + अ + उ + त्तमम्	(ओ)	-------------	(गी.१.२४)
४. तत्रापश्यत्	तत्र + अपश्यत्	तत्र् + अ + अ + पश्यत्	(आ)	-------------	(गी.१.२६)
५. दृष्ट्वेमम्	दृष्ट्वा + इमम्	दृष्ट्व् + आ + इ + मम्	(ए)	-------------	(गी.१.२८)
६. भ्रमतीव	भ्रमति + इव	भ्रमत् + इ + इ + व	(ई)	-------------	(गी.१.३०)
७. नरकायैव	नरकाय + एव	नरकाय् + अ + ए + व	(ऐ)	-------------	(गी.१.४२)
८. द्वाविमौ	द्वौ + इमौ	द् + औ + इ + मौ	(आव्)	-------------	(गी.१५.१६)
९. शम्भू इमौ	शम्भू + इमौ	शम्भ् + ऊ + इ + मौ	(ऊ इ)	-------------	
१०. एहि पुत्र३ अत्र पश्य		एहि पुत्र् + अ३ + अ + त्र पश्य	(त्र३ अ)	-------------	

त. यथोदाहरणं सन्धिं कुरुत -

यथा -	**तथा + अन्यान्**	**=**	**तथान्यान्**	**(गी.११.३४)**
१.	विद्धि + अकर्तारम्	=	----------------------------	(गी.४.१३)
२.	नमस्ते + अस्तु	=	----------------------------	(गी.११.३९)
३.	द्वन्द्व + अतीतः	=	----------------------------	(गी.४.२२)
४.	ब्रह्म + अग्नौ	=	----------------------------	(गी.४.२४)
५.	उप + एष्यसि	=	----------------------------	(गी.९.२८)
६.	न + उद्विजेत्	=	----------------------------	(गी.५.२०)
७.	शक्नोति + इह +एव	=	----------------------------	(गी.५.२३)
८.	स्पर्शेषु + असक्तात्मा	=	----------------------------	(गी.५.२१)
९.	च + एव + आत्मना + आत्मानम्	=	----------------------------	(गी.६.२०)
१०.	अनेकबाहु + उदरम्	=	----------------------------	(गी.११.१६)

थ. अधः दत्तानां पदानां यथोदाहरणं सन्धिप्रक्रियां दर्शयत -

यथा -	**ममेदम्**	**मम + इदम्**	**मम् + अ + इदम्**	**=**	**मम् + ए + दम्**	**(गी.११.४९)**
१.	इत्यर्जुनम्	---------------	--------------------	=	--------------	(गी.११.५०)
२.	दृष्ट्वेदम्	---------------	--------------------	=	--------------	(गी.११.५१)
३.	चेज्यया	---------------	--------------------	=	--------------	(गी.११.५३)
४.	त्वनन्यया	---------------	--------------------	=	--------------	(गी.११.५३)
५.	मय्यावेश्य	---------------	--------------------	=	--------------	(गी.१२.२)
६.	पर्युपासते	---------------	--------------------	=	---------------	(गी.१२.३)
७.	अनन्येनैव	---------------	--------------------	=	---------------	(गी.१२.६)
८.	शुभाशुभम्	---------------	--------------------	=	--------------	(गी.१२.१७)
९.	दशैकम्	---------------	--------------------	=	---------------	(गी.१३.५)
१०.	अवेक्षेऽहम्	---------------	--------------------	=	---------------	(गी.१.२३)

****

नारदस्य भगवन्निष्ठा

व्यञ्जनसन्धिः **३**

एतत् कथानकं सावधानं पठत -

नारदऋषिः पूर्वजन्मनि **कस्याश्चित्** ब्राह्मणदास्याः पुत्रः आसीत् । तस्य ब्राह्मणस्य गृहे **चातुर्मास्यं कर्तुं** योगिनः आगच्छन्ति स्म । ते सर्वदा **हरिचर्चां** कुर्वन्तः आनन्दम् अनुभवन्ति स्म । नारदः **तदानीं** बालकः आसीत् । बालकः **सन्नपि** सः न **चञ्चलः** । न तस्य क्रीडायाम् अधिका प्रीतिः । अतः सः **योगिनां सेवायां** नियोजितः । **तादृशं शान्तं बालकं** दृष्ट्वा ते योगिनः अपि तस्मिन् **अनुग्रहं** कुर्वन्ति स्म । योगिनाम् **आज्ञां** प्राप्य नारदः दिवसे सकृत् **आहारं** सेवते स्म । तेन तस्य **पापानां** शमनम् अभवत् । यदा योगिनः **भगवद्भजनं** कुर्वन्ति स्म, तदा नारदः **तल्लीनः** भूत्वा शृणोति स्म । गच्छता कालेन सः अपि **सङ्कीर्तनानुरागी** अभवत् ।

यदा **योगिनां चातुर्मास्यं समाप्तं** तदा ते **गन्तुं** सज्जाः अभवन् । नारदः अपि तैः सह गन्तुम् इष्टवान् । परन्तु योगिभिः अनुमतिः न कल्पिता । यतः तस्य माता एकाकिनी आसीत् । तैः उक्तम् - "भवान् मातुः **अनुमतिं** स्वीकृत्य आगच्छतु । अथवा मातुः **भगवद्धामगमनं** यावत् तस्याः समीपे स्थित्वा एव **भजनं** करोतु" इति ।

नारदः जानाति स्म यत् माता **अनुमतिं** न दास्यति एव । अतः सः मातुः समीपे एव स्थितवान् । माता अपि नारदस्य योगक्षेमम् एव इच्छति स्म । परन्तु असमर्थतया तया न किमपि **कर्तुं** शक्यते स्म ।

कस्मिंश्चित् दिने रात्रिकाले नारदस्य माता **गां दोग्धुं** गता । अन्धकारवशात् कालस्य प्रेरणया च तस्याः पादः कृष्णसर्पम् अस्पृशत् । सर्पेण दष्टा सा उपचाराभावात् **दिवङ्गता** । नारदः तस्याः **अन्त्येष्ट्यादिक्रियां** सम्पाद्य **एतां भगवदिच्छां** मन्यमानः ततः **वनं** प्रति गतः । निर्जने वने सः **किञ्चन** सरः दृष्टवान् । तत्र सः स्नात्वा **पूजनादिकञ्च** सम्पाद्य पिप्पलस्य अधः स्थितः । तत्रैव सः ध्यानमग्नः च अभवत् । स्वल्पेन कालेन सः **हृन्मण्डले भगवद्दर्शनं** प्राप्तवान् । क्षणाभ्यन्तरे एव तत् **तिरोहितञ्च** अभवत् । **क्लेशाद्** दुर्मना इव सः पुनः पुनः तद् **द्रष्टुं** प्रयत्तवान् । तथापि **दर्शनं** न प्राप्तवान् । तथा प्रयतमाने तस्मिन् **अनुग्रहं** कुर्वता भगवता आकाशवाणी कृता ।

"हन्त ! **अस्मिञ्जन्मनि** भवान् **मां पुनः द्रष्टुं** नार्हति । यतो हि '**अविपक्वकषायाणां** दुर्दर्शोऽहं कुयोगिनाम्' इत्यतः अहम् अप्राप्यः । किन्तु **सकृद् यद्दर्शितं रूपं** तत्तु मयि विश्वासाय । भवतः मनसि मयि प्रीतिः अभवत् । भवान् **भजनं** कृत्वा **प्रारब्धं** समाप्य मम लोकम् आगच्छतु । मत्कृपया भवान् प्रलयान्तेऽपि **मां** न विस्मरिष्यति, **एतज्ज्ञानं** सर्वदा त्वयि तिष्ठति" इति उक्त्वा अशरीरवाक् समाप्ता ।

नारदः **तस्मिन्नरण्ये भगवन्नामानि** स्मरन् अतिष्ठत्। **भगवद्भक्तिमयं तच्चित्तम्** अभवत्। **हृदयञ्च** शुद्धम् अभवत्। सः **अस्मिञ्जगति** अनासक्तः जातः। **विद्युदिव** तस्य अन्तिमक्षणः अपि आगतः। प्रारब्धसमाप्तेः **कारणं** तेन **पाञ्चभौतिकं गात्रं** त्यक्तम्। गच्छता कालेन प्रलयः अभवत्। पुनः सृष्टिनिर्माणसमये मरीच्यादिभिः ऋषिभिः सह तस्य जन्म अभवत्। भगवतः कृपया नारदः त्रिषु लोकेषु **निर्बाधं** विचरति। **वीणानादं भगवन्नामोच्चारणं** च **कुर्वन्नस्मिञ्जगति** सर्वत्र **भगवन्नामप्रचारं** करोति।

अस्यां कथायां स्थूलाक्षरैः मुद्रितानि पदानि व्यञ्जनसन्धियुक्तानि सन्ति। तेषु केषाञ्चन पदानां सन्धिच्छेदः अधः दर्शितः अस्ति। सावधानं परिशीलयत -

कस्याश्चित्	**कस्यास्** + चित्	(स् + चि = श्चि, सकारस्य शकारः)
चञ्चलः	**चं** + चलः	(चं + च = चञ्च, अनुस्वारस्य ञकारः)
सन्नपि	**सन्** + अपि	(न् + अ = न्न, नकारस्य आगमः)
शान्तं बालकम्	**शान्तम्** + बालकम्	(तम् + बा = तं बा, मकारस्य अनुस्वारः)
भगवद्भजनम्	**भगवत्** + भजनम्	(त् + भ = द्भ, तकारस्य दकारः)
तल्लीनः	**तत्** + लीनः	(त् + ली = ल्ली, तकारस्य लकारः)
सङ्कीर्तनानुरागी	**सं** + कीर्तनानुरागी	(सं + की = सङ्की, अनुस्वारस्य ङकारः)
भगवद्धामगमनम्	**भगवत्** + धामगमनम्	(त् + धा = द्धा, तकारस्य दकारः)
कस्मिंश्चित्	**कस्मिन्** + चित्	(स्मिन् + चि = स्मिंश्च, नकारस्य सकारः, अनुस्वारः श्चुत्वं च)
दिवङ्गता	**दिवं** + गता	(वं + ग = वङ्ग, अनुस्वारस्य ङकारः)
भगवदिच्छाम्	**भगवत्** + इच्छाम्	(त् + इ = दि, तकारस्य दकारः)
किञ्चन	**किं** + चन	(किं + च = किञ्चन, अनुस्वारस्य ञकारः)
पूजनादिकञ्च	**पूजनादिकं** + च	(कं + च = कञ्च, अनुस्वारस्य ञकारः)
हृन्मण्डले	**हृत्** + मण्डले	(त् + म = न्म, तकारस्य नकारः)
भगवद्दर्शनम्	**भगवत्** + दर्शनम्	(त् + द = द्द, तकारस्य दकारः)
तिरोहितञ्च	**तिरोहितं** + च	(तं + च = तञ्च, अनुस्वारस्य ञकारः)
क्लेशाद् दुर्मना	**क्लेशात्** + दुर्मना	(त् + दु = द्दु, तकारस्य दकारः)
अस्मिञ्जन्मनि	**अस्मिन्** + जन्मनि	(न् + ज = ञ्ज, नकारस्य ञकारः)
एतज्ज्ञानम्	**एतत्** + ज्ञानम्	(त् + ज्ञा = ज्ज्ञा, तकारस्य जकारः)
तस्मिन्नरण्ये	**तस्मिन्** + अरण्ये	(न् + अ = न्न, नकारस्य आगमः)
भगवन्नामानि	**भगवत्** + नामानि	(त् + न = न्न, तकारस्य नकारः)
भगवद्भक्तिमयम्	**भगवत्** + भक्तिमयम्	(त् + भ = द्भ, तकारस्य दकारः)
तच्चित्तम्	**तत्** + चित्तम्	(त् + चि = च्चि, तकारस्य चकारः)

हृदयञ्च	**हृदयं** + च	(यं + च = यञ्च, अनुस्वारस्य ञकारः)
अस्मिञ्जगति	**अस्मिन्** + जगति	(न् + ज = ञ्ज, नकारस्य ञकारः)
विद्युदिव	**विद्युत्** + इव	(त् + इ = दि, तकारस्य दकारः)
भगवन्नामोच्चारणम्	**भगवत्** + नामोच्चारणम्	(त् + न = न्ना, तकारस्य नकारः)
कुर्वन्नस्मिञ्जगति	**कुर्वन्** + अस्मिन् + जगति	(न् + अ = न्न, नकारस्य आगमः)
		(न् + ज = ञ्ज, नकारस्य ञकारः)
भगवन्नामप्रचारम्	**भगवत्** + नामप्रचारम्	(त् + न = न्ना, तकारस्य नकारः)

व्यञ्जनसन्धिः

श्चुत्वसन्धिः, ष्टुत्वसन्धिः, जश्त्वसन्धिः, चर्त्वसन्धिः, अनुनासिकसन्धिः, अनुस्वारसन्धिः, परसवर्णसन्धिः, ङमुडागमसन्धिः, पूर्वसवर्णसन्धिः, छत्वसन्धिः, सत्वसन्धिः, यवलोपसन्धिः **इति हल्सन्धयः सन्ति । एते सन्धयः अत्र सोदाहरणं दर्शिताः सन्ति । तान् सावधानं परिशीलयत -**

श्चुत्वसन्धिः

व्यञ्जनसन्धेः बहवः नियमाः सन्ति । तेषु केचन नियमाः अत्र दत्ताः सन्ति । तान् सर्वान् अवधानेन पश्यत स्मरत च -

नियमाः
- ☞ स् + (श्/चवर्गः) = श्
- ☞ तवर्गः + (श्/चवर्गः) = चवर्गः
- ☞ चवर्गः + तवर्गः = चवर्गः

एतानि उदाहरणानि परिशीलयत -

१. अर्जुनश्शक्नोति - अर्जुनस् + शक्नोति
अर्जुन + स् + श् + अक्नोति
अर्जुन + श् + श् + अक्नोति = **अर्जुनश्शक्नोति**

२. धृष्टकेतुश्चेकितानः - धृष्टकेतुस् + चेकितानः (गी.१.५)
धृष्टकेतु + स् + च् + एकितानः
धृष्टकेतु + श् + च् + एकितानः = **धृष्टकेतुश्चेकितानः**

३. निश्चला - निस् + चला (गी.२.५३)
नि + स् + च + ला
नि + श् + च + ला = **निश्चला**

४. विभ्रष्टश्छिन्नः - विभ्रष्टस् + छिन्नः (गी.६.३८)
विभ्रष्ट + स् + छ् + इन्नः
विभ्रष्ट + श् + छ् + इन्नः = **विभ्रष्टश्छिन्नः**

एतेषु उदाहरणेषु सकारात् परतः शकारः चवर्गस्य वर्णाः च सन्ति । अतः सकारस्य स्थाने शकारादेशः कृतः अस्ति ।

अवधेयम्

१. अर्जुनः + शक्नोति	अर्जुन + **:** + **श**क्नोति	अत्र विसर्गसन्धेः निमित्तम् अस्ति।
	अर्जुन + **स्** + **श**क्नोति	विसर्गस्य सकारः कृतः अस्ति।
२. धृष्टकेतुः + चेकितानः	धृष्टकेतु + **:** + **चे**कितानः	अत्र विसर्गसन्धेः निमित्तम् अस्ति।
	धृष्टकेतु + **स्** + **चे**कितानः	विसर्गस्य सकारः कृतः अस्ति।
३. विभ्रष्टः + छिन्नः	विभ्रष्ट + **:** + **छि**न्नः	अत्रापि विसर्गसन्धेः निमित्तम् अस्ति।
	विभ्रष्ट + **स्** + **छि**न्नः	विसर्गस्य सकारः कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१. यच्छ्रेयः	-	यत् + श्रेयः	=	य + **त्** + **श्**+ रेयः	(गी.२.७)
		य + **च्** + **श्** / **छ्** + रेयः	=	**यच्श्रेयः / यच्छ्रेयः***	
२. सर्वभृच्चैव	-	सर्वभृत् + चैव	=	सर्वभृ + **त्** + **च्** + ऐव	(गी.१३.१४)
		सर्वभृ + **च्** + **च्** + ऐव	=	**सर्वभृच्चैव**	
३. महच्छादकम्	-	महत् + छादकम्	=	मह + **त्** + **छ्** + आदकम्	(गी.१३.१७)
		मह + **च्** + **छ्** + आदकम्	=	**महच्छादकम्**	
४. तज्ज्योतिः	-	तद् + ज्योतिः	=	त + **द्** + **ज्** + योतिः	(गी.५.१६)
		त + **ज्** + **ज्** + योतिः	=	**तज्ज्योतिः**	
५. आदित्यवज्ज्ञानम्	-	आदित्यवत् + ज्ञानम्	=	आदित्यव + **त्** + **ज्ञ्** + आनम्	
		आदित्यव + **ज्** + **ज्ञ्** + आनम्	=	**आदित्यवज्ज्ञानम्**	
६. स्पृशञ्जिघ्रन्	-	स्पृशन् + जिघ्रन्	=	स्पृश + **न्** + **ज्** + इघ्रन्	(गी.५.८)
		स्पृश + **ञ्** + **ज्** + इघ्रन्	=	**स्पृशञ्जिघ्रन्**	

एतेषु उदाहरणेषु तवर्गात् परतः शकारचवर्गौ स्तः। अतः तवर्गस्य स्थाने चवर्गः आदेशः कृतः अस्ति। एवं तकारादीनां स्थाने यथासङ्ख्यं चकारादयः आदेशाः कृताः सन्ति। अत्र सकारतवर्गयोः स्थाने शकारः चवर्गः च आदेशः कृतः अस्ति। (*अन्यसन्धिवशात् शकारस्य छकारादेशः सम्पन्नः)

अपवादविधिः - शकारात् परस्य तवर्गस्य स्थाने श्चुत्वं न भवति।

यथा - क्लिश् + नाति = **क्लिश्नाति**। अश् + नाति = **अश्नाति**।

अस्मिन् सन्धौ **श् / चवर्गः** (चु) इत्येतौ आदेशौ भवतः। अतः अस्य सन्धेः नाम **श्चुत्वसन्धिः** इति।

मञ्जूषायां दत्तान् वर्णान् अवधानेन पश्यत -



अवधेयम्

उपरि मञ्जूषायां दत्तेषु शब्देषु सकारतवर्गयोः स्थाने शकारचवर्गौ आदेशौ भवतः । इदमत्र अवधेयं यत् योगः यस्य कस्यापि भवितुमर्हति । परन्तु आदेशः तु यथासङ्ख्यम् एव भवति इति । यथा - काशिराजश्च (गी.१.५) इत्यत्र 'काशिराजस् + च' इत्यत्र सकारस्य अनन्तरं चकारस्य योगः अस्ति, तथापि आदेशः तु यथासङ्ख्यम् एव भवति इति कारणात् 'काशिराजश्च' इति रूपं सिध्यति । 'आश्चर्यवच्च' (गी.२.२९) इत्यत्र आश्चर्यवत् + च इत्यत्र योगः समानः एव अस्ति । अतः **'आश्चर्यवच्च'** इति सिद्ध्यति । 'यज् + नः' इत्यत्र योगः पूर्वम् अस्ति स्थानी च अनन्तरम् अस्ति । अतः नकारस्य स्थाने 'ञकारः' भवति । अर्थात् योगः कथञ्चिदपि भवेत् । परन्तु आदेशः तु यथासङ्ख्यम् एव भवति इति सर्वदा स्मरणीयम् । (पूर्वं योगः विरलतया एव लभ्यते । अतः तस्य अधिकानि उदाहरणानि न दत्तानि सन्ति ।)

अभ्यासः

क. यथोदाहरणं सन्धिं कुरुत -

१. पाण्डवास् + चैव **पाण्डवाश्चैव** (गी.१.१) २. यत् + ज्ञात्वा ---------------- (गी.४.१६)
३. यज्ञात् + ज्ञानयज्ञः ---------------- (गी.४.३३) ४. पश्यन् + शृण्वन् ---------------- (गी.५.८)
५. कृष्णस् + शेते ---------------- ६. दिशस् + च ---------------- (गी.६.१३)

७. मत् + चित्तः ---------------- (गी.६.१४) ८. मनस् + चञ्चलम् ---------------- (गी.६.२६)
९. कश्चित् + छादयति ----------------
१०. अन्यत् + ज्ञातव्यम् ---------------- (गी.७.२)
११. सदसत् + चाहम् ---------------- (गी.९.१९) १२. यत्तद् + ज्ञानम् ---------------- (गी.१३.२)

ख. सन्धिविच्छेदं कुरुत -

१.	सुनिश्चितम्	----------------	+	--------------	(गी.५.१)
२.	सदसच्चाहम्	----------------	+	--------------	(गी.९.१९)
३.	सञ्जायते	----------------	+	--------------	(गी.१३.२६)
४.	मच्चित्तः	----------------	+	--------------	(गी.१८.५८)
५.	यज्ज्ञानम्	----------------	+	--------------	(गी.१८.२०)
६.	तेजश्चास्मि	----------------	+	--------------	(गी.७.९)
७.	सञ्छिन्नः	----------------	+	--------------	(गी.४.४१)
८.	कस्माच्च	----------------	+	--------------	(गी.११.३७)

ष्टुत्वसन्धिः

नियमाः

☞	स् + (ष्/टवर्गः)	=	**ष्**
☞	तवर्गः + (टवर्गः)	=	**टवर्गः**
☞	(ष) + तवर्गः	=	**टवर्गः**
☞	(टवर्गः) + तवर्गः	=	**टवर्गः**

एतानि उदाहरणानि परिशीलयत -

१. सहदेवष्षष्ठः - सहदेवस् + षष्ठः
सहदेव + **स्** + **ष्** + अष्ठः
सहदेव + **ष्** + **ष्** + अष्ठः = **सहदेवष्षष्ठः**

२. वृक्षाड्डयते - वृक्षात् + डयते = वृक्षा + **त्** + **ड्** + अयते
वृक्षा + **ड्** + **ड्** + अयते = **वृक्षाड्डयते**

३. विभ्रष्टः - विभ्रष् + तः = विभ्र + **ष्** + **त्** +अ (गी.६.३८)
विभ्र + **ष्** + **ट्** +अ = **विभ्रष्टः**

४. अश्वत्थामण्ढौकसे - अश्वत्थामन् + ढौकसे = अश्वत्थाम + **न्** + **ढ्** + औकसे
अश्वत्थाम + **ण्** + **ढ्** + औकसे = **अश्वत्थामण्ढौकसे**

- **अस्मिन् सन्धौ षकारटवर्गाभ्यां योगे सकारतवर्गयोः स्थाने षकारटवर्गादेशौ भवतः।**
- षकारटवर्गाभ्यां योगे सकारस्य षकारः, षकारटवर्गाभ्यां योगे तवर्गस्य क्रमेण टवर्गादेशो भवति।

विशेषः -

श्चुत्वसन्धौ यथा योगः आदेशः स्थानी इति दर्शिताः सन्ति तथैव अत्र अपि ज्ञातव्यम्। अस्मिन् सन्धौ अपवादविधिः अपि अवधातव्यः अस्ति।

अपवादविधिः -

१. तवर्गात् परतः षकारः अस्ति चेत् ष्टुत्वं न भवति।

यथा - रामात् + षोडशः = रामात्षोडशः। अत्र तकारस्य स्थाने टकारादेशो न भवति।

२. पदान्तात् टवर्गात् परस्य सकारतवर्गाभ्यां स्थाने षकारटवर्गादेशौ न भवतः।

यथा - विराट् + सज्जनः = अत्र सकारस्य षकारादेशो न भवति।

त्विट् + तस्मिन् = अत्र तकारस्य टकारादेशो न भवति।

विश्वराड् + दाता = अत्र दकारस्य डकारादेशो न भवति।

परन्तु **नाम्, नवति, नगरी** इत्येतेषु शब्देषु परेषु तु ष्टुत्वं भवति। यथा -

१. षण्णाम्	-	षण् + नाम्	=	ष + **ण्** + **न्** + आम्
		ष + **ण्** + **ण्** + आम्	=	**षण्णाम्**
२. षण्णवतिः	-	षण् + नवतिः	=	ष + **ण्** + **न्** + अवतिः
		ष + ण् + ण् + अवतिः	=	**षण्णवतिः**
३. विराण्णगरी	-	विराण् + नगरी	=	विरा + **ण्** + **न्** + अगरी
		विरा + **ण्** + **ण्** + अगरी	=	**विराण्णगरी**

अस्मिन् सन्धौ षकारटवर्गौ इत्येतौ आदेशौ भवतः। अतः अस्य सन्धेः नाम ष्टुत्वसन्धिः अस्ति।

ग. सन्धिं कुरुत -

१. आविष् + तम् = ------------------------------------ (गी.२.१)

२. सर्पिष् + तमम् = ------------------------------------

३. गरुत्मान् + डयते = ------------------------------------

घ. सन्धिविच्छेदं कुरुत -

१. दृष्ट्वा = ------------------ + ---------------- (गी.१.२)

२. अनिष्टम् = ------------------ + ---------------- (गी.१८.१२)

३. उड्डयनम् = ------------------ + ----------------

४. अस्मट्ठाकुरः = ------------------ + ----------------

ड. रिक्तस्थानानि पूरयत -

१. धनुस् + टङ्कारः = --------------------

२. ---------- + ---------- = भयहृड्डमरुः

३. कृष्णस् + टीकते = --------------------

४. ---------- + ---------- = तस्याष्टङ्कणम्

५. षण्णाम् = --------- + ---------

जानन्तु

अश्वत्थामन् ढौकसे = हे अश्वत्थामन् त्वं गच्छसि। (ढौकृ गतौ)
गरुत्मान् = गरुडः, कृष्णः + टीकते = कृष्णः गच्छति। (टीकृ गतौ), त्विट् = प्रभा

जश्त्वसन्धिः

नियमाः

- ☞ वर्गीयव्यञ्जनानि + स्वरः = **जश्**
- ☞ वर्गीयव्यञ्जनानि + मृदुव्यञ्जनम् (हश्) = **जश्**
- ☞ वर्गीयव्यञ्जनानि = **जश्**
- ☞ ष् = ड्

एतानि उदाहरणानि परिशीलयत -

१. आश्रयेदस्मान् - आश्रयेत् + अस्मान् (गी.१.३६)
आश्रये + त् + अ + स्मान्
आश्रये + द् + अ + स्मान् = **आश्रयेदस्मान्**

२. तदज्ञानम् - तत् + अज्ञानम् (गी.५.१६)
त + त् + अ + ज्ञानम्
त + द् + अ + ज्ञानम् = **तदज्ञानम्**

३. यद्यदाचरति - यद्यद् + आचरति = यद्य + त् + आ + चरति (गी.३.२१)
यद्य + द् + आ + चरति = **यद्यदाचरति**

४. दोषवदिति = दोषवत् + इति = दोषव + त् + इ + ति (गी.१८.३)
दोषव + द् + इ + ति = **दोषवदिति**

५. अबिन्धनम् = अप् + इन्धनम् = अ + प् + इ + न्धनम्
अ + ब् + इ + न्धनम् = **अबिन्धनम्**

६. सकृदीक्षते = सकृत् + ईक्षते = सकृ + त् + ई + क्षते
सकृ + द् + ई + क्षते = **सकृदीक्षते**

७. तस्मादुत्तिष्ठ = तस्मात् + उत्तिष्ठ = तस्मा + त् + उ + त्तिष्ठ (गी.२.३७)
तस्मा + द् + उ + त्तिष्ठ = **तस्मादुत्तिष्ठ**

८. सम्यगूहनीयः = सम्यक् + ऊहनीयः = सम्य + क् + ऊ + हनीयः
सम्य + ग् + ऊ + हनीयः = **सम्यगूहनीयः**

९. एतदृतम् = एतत् + ऋतम् = एत + त् + ऋ + तम् (गी.१०.१४)
एत + द् + ऋ + तम् = **एतदृतम्**

१०. कश्चिदेनम् = कश्चित् + एनम् = कश्चि + त् + ए + नम् (गी.२.२९)
कश्चि + द् + ए + नम् = **कश्चिदेनम्**

११. भगवदैश्वर्यम् = भगवत् + ऐश्वर्यम् = भगव + त् + ऐ + श्वर्यम्
भगव + द् + ऐ + श्वर्यम् = **भगवदैश्वर्यम्**

१२. तस्मादोम् = तस्मात् + ओम् = तस्मा + त् + ओ + म् (गी.१७.२४)
तस्मा + द् + ओ + म् = **तस्मादोम्**

एतेषु उदाहरणेषु वर्गीयव्यञ्जनेभ्यः परे स्वरवर्णाः सन्ति । अत्र व्यञ्जनस्य स्थाने तत्तद्वर्गीयः तृतीयवर्णादेशः कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१. एतद्विद्मः - एतत् + विद्मः = एत + त् + व् + इद्मः (गी.२.६)
एत + द् + व् + इद्मः = **एतद्विद्मः**

२. तस्माद्युध्यस्व - तस्मात् + युध्यस्व = तस्मा + त् + य् + उध्यस्व (गी.२.१८)
तस्मा + द् + य् + उध्यस्व = **तस्माद्युध्यस्व**

३. क्रोधाद्भवति - क्रोधात् + भवति = क्रोधा + त् + भ् + अवति (गी.२.६३)
क्रोधा + द् + भ् + अवति = **क्रोधाद्भवति**

४. कश्चिद्दुर्गतिम् - कश्चित् + दुर्गतिम् = कश्चि + त् + द् + उर्गतिम् (गी.६.४०)
कश्चि + द् + द् + उर्गतिम् = **कश्चिद्दुर्गतिम्**

५. यद्यतयः - यत् + यतयः = य + त् + य् + अतयः (गी.८.११)
य + द् + य् + अतयः = **यद्यतयः**

६. अन्यद्द्रष्टुम् - अन्यत् + द्रष्टुम् = अन्य + त् + द् + रष्टुम् (गी.११.७)
अन्य + द् + द् + रष्टुम् = **अन्यद्द्रष्टुम्**

७. अपश्यद्देवदेवस्य - अपश्यत् + देवदेवस्य = अपश्य + त् + द् + एवदेवस्य (गी.११.१३)
अपश्य + द् + द् + एवदेवस्य = **अपश्यद्देवदेवस्य**

८. स्मृतिभ्रंशाद्बुद्धिनाशः - स्मृतिभ्रंशात् + बुद्धिनाशः = स्मृतिभ्रंशा + त् + ब् + उद्धिनाशः(गी.२.६३)
स्मृतिभ्रंशा + द् + ब् + उद्धिनाशः = **स्मृतिभ्रंशाद्बुद्धिनाशः**

९. तिर्यग्गमनम् - तिर्यक् + गमनम् = तिर्य + क्+ग्+मनम्
तिर्य+ग्+ग्+मनम् = **तिर्यग्गमनम्**

एतेषु उदाहरणेषु वर्गीयव्यञ्जनेभ्यः परतः मृदुव्यञ्जनानि (हश्) सन्ति । अत्र वर्गीयव्यञ्जनस्य स्थाने तत्तद्वर्गस्य तृतीयवर्णादेशः (जश्) कृतः अस्ति ।

एते उदाहरणे परिशीलयत -

१. यज्जुहोषि = यत् + जुहोषि = य + त् + ज् + उहोषि (श्चुत्वसन्धेः निमित्तम्) (गी.९.२७)
= य + च् + ज् + उहोषि (श्चुत्वसन्धिः जश्त्वसन्धेः निमित्तम्)

= य + ज् + ज् + उहोषि (जश्त्वसन्धिः) = **यज्जुहोषि**

२. तज्ज्ञानम् = तत् + ज्ञानम् = त + त् + ज्ञ् + आनम् (श्चुत्वसन्धेः निमित्तम्) (गी.१८.२०)

= त + च् + ज्ञ् + आनम् (श्चुत्वसन्धिः जश्त्वसन्धेः निमित्तम्)

= त + ज् + ज्ञ् + आनम् (जश्त्वसन्धिः) = **तज्ज्ञानम्**

एतयोः उदाहरणयोः श्चुत्वसन्धिः जश्त्वसन्धिः च कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१.	मुक्	-	मु + **क्**	→	मु + **ग्**	=	**मुग्** (मुग्धः)
२.	स्निट्	-	स्नि + **ट्**	→	स्नि + **ड्**	=	**स्निड्** (स्नेही)
३.	तत्	-	त + **त्**	→	त + **द्**	=	**तद्**
४.	गुप्	-	गु + **प्**	→	गु + **ब्**	=	**गुब्** (रक्षकः)
५.	मुग्	-	मु + **ग्**	→	मु + **क्**	=	**मुक्**
६.	स्निड्	-	स्नि + **ड्**	→	स्नि + **ट्**	=	**स्निट्**
७.	तद्	-	त + **द्**	→	त + **त्**	=	**तत्**
८.	गुब्	-	गु + **ब्**	→	गु + **प्**	=	**गुप्**

एतेषु उदाहरणेषु ञमङणनान् विना पदान्ते स्थितस्य वर्गीयप्रथमव्यञ्जनस्य स्थाने अवसाने परतः तत्तद्वर्गीयः तृतीयवर्णादेशः (जश्) कृतः अस्ति। तृतीयव्यञ्जनस्य स्थाने प्रथमवर्णादेशः (चय्) च कृतः अस्ति।

* **वर्णानाम् अभावः अवसानम् इति कथ्यते।**

एतानि उदाहरणानि परिशीलयत -

१. रत्नमुडीक्षते	=	रत्नमुष् + ईक्षते	=	रत्नमु + **ष्** + **ई** + क्षते
	=	रत्नमु + **ड्** + **ई** + क्षते	=	**रत्नमुडीक्षते**
२. रत्नमुड्भ्यः	=	रत्नमुष् + भ्यः	=	रत्नमु + **ष्** + **भ्** + यः
	=	रत्नमु + **ड्** + **भ्** + यः	=	**रत्नमुड्भ्यः**
३. षडाननः	=	षष् + आननः	=	ष + ष् + आ + ननः
	=	ष + ड् + आ + ननः	=	**षडाननः**
४. षडीक्षन्ते	=	षष् + ईक्षन्ते	=	ष + ष् + ई + क्षन्ते
	=	ष + ड् + ई + क्षन्ते	=	**षडीक्षन्ते**

एतेषु उदाहरणेषु स्वराः व्याञ्जनानि परतः सन्ति इत्यतः पदान्ते स्थितस्य षकारस्य स्थाने डकारादेशः कृतः अस्ति।

अवधेयम् - रत्नमुडीक्षते = रत्नचौरः पश्यति।

एतानि उदाहरणानि परिशीलयत -

१. षष् → षट् / षड्

२. द्विष् → द्विट् / द्विड्

३. त्विष् → त्विट् / त्विड्

अत्र पदान्ते स्थितस्य षकारस्य टकारः / डकारः वा कृतः अस्ति। अतः ञमङणनान् विना पदान्ते स्थितस्य वर्गीयव्यञ्जनस्य स्वरे मृदुव्यञ्जने च परे तत्तद्वर्गीयं तृतीयव्यञ्जनं प्रयोक्तव्यम् इति। अवसाने तु तत्तद्वर्गीयव्यञ्जनस्य तृतीयव्यञ्जनं प्रयोक्तव्यम् इति। तृतीयस्य च प्रथमम्। पदान्ते स्थितस्य षकारस्य डकारः भवति, अवसाने तु टकारः डकारो वा भवति।

अस्मिन् सन्धौ ज् ब् ग् ड् द् इति एते आदेशाः भवन्ति। एतेषां नाम '**जश्**' अस्ति। अतः अस्य सन्धेः नाम **जश्त्वसन्धिः** इति।

च. सन्धिविच्छेदं दृष्ट्वा सन्धिं कुरुत -

१. तत् + एकम्	=	---------------------------	(गी.३.२)
२. स्मृतिभ्रंशात् + बुद्धिनाशः	=	---------------------------	(गी.२.६३)
३. कर्मयुक् + एधते	=	---------------------------	
४. ध्रुट् + विनश्यति	=	---------------------------	
५. षष् + दर्शनानि	=	---------------------------	
६. अन्नात् + भवन्ति	=	---------------------------	(गी.३.१४)
७. पर्जन्यात् + अन्नसम्भवः	=	---------------------------	(गी.३.१४)
८. आश्चर्यवत् + वदति	=	---------------------------	(गी.२.२९)
९. भयात् + रणात् + उपरतम्	=	---------------------------	(गी.२.३५)
१०. योगात् + धनञ्जय	=	---------------------------	(गी.२.४९)

छ. सन्धिविच्छेदं कुरुत -

१. स्वराड्भवान्	=	------------- + -----------	
२. प्रावृड्रूपम्	=	------------- + -----------	
३. तद्विद्धि	=	------------- + -----------	(गी.२.१७)
४. तस्मादेवम्	=	------------- + -----------	(गी.२.२५)
५. भवेद्युगपद्	=	------------- + -----------	(गी.११.१२)

ज. उचितं सन्धिपदम् अथवा सन्धिविच्छेदं रिक्तस्थानेषु पूरयत -

१. चित् + रूपम्	=	--------------------------
२. ---------- + ----------	=	प्राग्रचितम्

३.	किञ्चित् + ओम्	=	---------------------------	
४.	---------- + ----------	=	स्याज्जुगुप्सितम्	
५.	बध्नीयात् + अनागसम्	=	---------------------------	
६.	---------- + ----------	=	सम्यगुभयोः	(गी.५.४)
७.	द्रव्यमयात् + यज्ञात्	=	---------------------------	(गी.४.३३)
८.	---------- + ----------	=	आश्चर्यवद्वदति	(गी.०२.२९)
९.	समिध् + आधानम्	=	---------------------------	
१०.	---------- + ----------	=	अग्निमद्भ्याम्	

चर्त्वसन्धिः

☞ वर्गीयव्यञ्जनानि + कर्कशव्यञ्जनानि = **क् च् ट् त् प्**

एतानि उदाहरणानि परिशीलयत -

१.	यत्तपस्यसि	= यद् + तपस्यसि	=	य + द् + त् + अपस्यसि	(गी.९.२७)
		= य + **त्** + त् + अपस्यसि	=	**यत्तपस्यसि**	
२.	यत्तु	= यद् + तु	=	य + द् + त् + उ	(गी.१८.२२)
		= य + **त्** + त् + उ	=	**यत्तु**	
३.	भेत्तव्यम्	= भेद् + तव्यम्	=	भे + **द्** + **त्** + अव्यम्	
		= भे + **त्** + त् + अव्यम्	=	**भेत्तव्यम्**	
४.	लिप्सा	= लिभ् + सा	=	लि + **भ्** + **स्** + आ	
		= लि + **प्** + **स्** + आ	=	**लिप्सा**	
५.	विश्वराट्पश्यति	= विश्वराड् + पश्यति	=	विश्वरा + **ड्** + **प्** + अश्यति	
		= विश्वरा + **ट्** + **प्** + अश्यति	=	**विश्वराट्पश्यति**	

अत्र ञमङणनान् विना पदान्ते स्थितस्य वर्गीयव्यञ्जनस्य (झलः) स्थाने तत्तद्वर्गीयं प्रथमव्यञ्जनं (चर्) प्रयोक्तव्यं भवति कर्कशव्यञ्जने (खरि) परे। अतः अस्य सन्धेः नाम चर्त्वसन्धिः इति।

झल्-वर्णाः	=	**आदेशाः**	**झल्-वर्णाः**	=	**आदेशाः**
क् ख् ग् घ्	=	क्	च् छ् ज् झ्	=	च्
ट् ठ् ड् ढ्	=	ट्	त् थ् द् ध्	=	त्
प् फ् ब् भ्	=	प्	श् ष् स्	=	श् ष् स्

एतेषु (खर् = **ख् फ् छ् ठ् थ् च् ट् त् श् ष् स्**) परेषु एतेषां (झल् = **झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् ह्**) स्थाने एते (चर् = **च् ट् त् क् प् श् ष् स्**) आदेशाः भवन्ति।

झ. यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा -	**भस्मसात्कुरुते**	=	**भस्मसाद् + कुरुते**	**(गी.४.३७)**
१.	अस्मत्कृष्णः	=	--------------- + --------------	
२.	सत्त्वाद् + सञ्जायते	=	--------------------------------	(गी.१४.१७)
३.	उद् + पतति	=	--------------------------------	
४.	एतत्क्षेत्रम्	=	--------------- + --------------	(गी.१३.६)
५.	तद् + किम्	=	--------------------------------	(गी.३.१)
६.	तत्कुरुष्व	=	--------------- + --------------	(गी.९.२७)
७.	भेद् + तुम्	=	--------------------------------	
८.	छेत्तव्यम्	=	--------------- + --------------	
९.	सम्यग् + फलति	=	--------------------------------	
१०.	षड् + कमलानि	=	--------------------------------	

अनुनासिकसन्धिः

एतानि उदाहरणानि परिशीलयत -

१.	कश्चित् + माम्	=	कश्चि + त् + म् + आम्	=	कश्चि + न् + म् + आम्	(गी.७.३)
				=	**कश्चिन्माम् / कश्चित्माम्**	
२.	षड् + मासाः	=	ष + ड् + म् + आसाः	=	ष + ण् + म् + आसाः	(गी.८.२४)
				=	**षण्मासाः / षड्मासाः**	
३.	भूतभृत् + न	=	भूतभृ + त् + न् + अ	=	भूतभृ + न् + न् + अ	(गी.९.५)
				=	**भूतभृन्न / भूतभृत्न**	
४.	भगवत् + मया	=	भगव + त् + म् + अया	=	भगव + न् + म् + अया	(गी.१०.१७)
				=	**भगवन्मया / भगवत्मया**	
५.	मत् + मनाः	=	म + त् + म् + अनाः	=	म + न् + म् + अनाः	(गी.१८.६५)
				=	**मन्मनाः / मत्मनाः**	

एतेषु उदाहरणेषु वर्गीयव्यञ्जनेभ्यः परतः अनुनासिकव्यञ्जनम् अस्ति। तत्र वर्गीयव्यञ्जनानां स्थाने तत्तद्वर्गीयः पञ्चमः वर्णः (अनुनासिकः) आदेशः विकल्पेन कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१.	वाक् + मयम्	=	वा + क् + म् + अयम्	=	वा + ङ् + म् + अयम्	=	**वाङ्मयम्**	(गी.१७.१५)
२.	वाक् + मात्रम्	=	वा + क् + म् + आत्रम्	=	वा + ङ् + म् + आत्रम्	=	**वाङ्मात्रम्**	
३.	अप् + मयम्	=	अ + प् + म् +अयम्	=	अ + म् + म् +अयम्	=	**अम्मयम्**	

४. मृत् + मयम् = मृ + त् + म् + अयम् = मृ + न् + म् + अयम् = **मृन्मयम्**

५. एतद् + मात्रम् = एत + द् + म् + आत्रम् = एत + द् + म् + आत्रम् = **एतन्मात्रम्**

एतेषु उदाहरणेषु वर्गीयव्यञ्जनेभ्यः परतः प्रत्ययस्य अनुनासिकव्यञ्जनम् अस्ति । तत्र वर्गीयव्यञ्जनस्य स्थाने तत्तद्वर्गीयः पञ्चमः वर्णः (अनुनासिकः) कृतः अस्ति ।

ञ. यथोदाहरणं पदविभाजनं कृत्वा सन्धिं कुरुत -

यथा -	**यस्मात् + न**	**=**	**यस्मा + त् + न् + अ**	**=**	**(न् + न्)**	**=**	**यस्मान्न**	**(गी.१२.१५)**
	१. तस्मात् + नार्हाः	=	----------------------	=	(--- + ---)	=	------------	(गी.१.३७)
	२. वाक् + मनोभिः	=	----------------------	=	(--- + ---)	=	------------	(गी.१८.१५)
	३. मत् + मया	=	----------------------	=	(--- + ---)	=	------------	(गी.४.१०)
	४. सुहृद् + मित्रम्	=	----------------------	=	(--- + ---)	=	------------	(गी.६.९)
	५. अनारम्भात् + नैष्कर्म्यम्	=	----------------------	=	(--- + ---)	=	------------	(गी.३.४)
	६. बुद्धित्वात् + न	=	----------------------	=	(--- + ---)	=	------------	(गी.१८.१६)
	७. सम्पद् + मयम्	=	----------------------	=	(--- + ---)	=	------------	
	८. यत् + माम्	=	----------------------	=	(--- + ---)	=	------------	(गी.१०.१४)
	९. स्यात् + निश्चितम्	=	----------------------	=	(--- + ---)	=	------------	(गी.२.७)
	१०. जगत् + निवास	=	----------------------	=	(--- + ---)	=	------------	(गी.११.२५)
	११. मत्कर्मकृत् + मत्	=	----------------------	=	(--- + ---)	=	------------	(गी.११.५५)
	१२. चिद् + मयम्	=	----------------------	=	(--- + ---)	=	------------	

अनुस्वारसन्धिः

नियमाः

☞ म् + व्यञ्जनानि = ं

☞ न् + (वर्गीयव्यञ्जनम् / शषसहाः) = ं

एतानि उदाहरणानि परिशीलयत -

१.	रथम् + स्थापय	=	रथं स्थापय	(गी.१.२१)
२.	सर्वभूतानाम् + मैत्रः	=	सर्वभूतानां मैत्रः	(गी.१२.१३)
३.	परमम् + रूपम्	=	परमं रूपम्	(गी.११.९)
४.	भूतम् + चराचरम्	=	भूतं चराचरम्	(गी.१०.३९)
५.	सम् + यमतामहम्	=	संयमतामहम्	(गी.१०.२९)

एतेषु उदाहरणेषु पदान्तात् मकारात् परतः व्यञ्जनम् अस्ति । अत्र मकारस्य स्थाने अनुस्वारादेशः कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१. मनान् + सि = **मनांसि**　　२. यशान् + सि = **यशांसि**

३. मन् + स्यन्ते = **मंस्यन्ते** (गी.२.३५)　　४. आक्रम् + स्यते = **आक्रंस्यते**

एतेषु उदाहरणेषु अपदान्ताभ्यां मकारनकाराभ्यां परतः सकारः (झल्) अस्ति। अत्र मकारनकारयोः स्थाने अनुस्वारः कृतः अस्ति। अर्थात् व्यञ्जने परे पदान्ते स्थितस्य मकारस्य अनुस्वारः भवति। अपदान्तात् झल्वर्णे परे मकारनकारयोः स्थाने अनुस्वारः भवति। अस्मिन् सन्धौ अनुस्वारः आदेशः भवति। अतः अनुस्वारसन्धिः इति अस्य नाम।

ट. सन्धिविच्छेदं कुरुत -

१. मद्भावं याति = --------------- + ---------------- (गी.८.५)

२. अक्षरं ब्रह्म = --------------- + ---------------- (गी.८.३)

३. इदं धार्यते = --------------- + ---------------- (गी.७.५)

४. रंस्यते = --------------- + ----------------

५. श्रीमतां गेहे = --------------- + ---------------- (गी.६.४१)

६. वासांसि = --------------- + ---------------- (गी.२.२२)

७. मां भजति = --------------- + ---------------- (गी.६.३१)

८. हवींषि = --------------- + ----------------

९. नंस्यति = --------------- + ----------------

१०. स्रंसते = --------------- + ---------------- (गी.१.३०)

ठ. सन्धिं कुरुत -

१. परमम् + भवान् = ------------------------ (गी.१०.१२)

२. पुरोधसाम् + च = ------------------------

३. सर्वभूतानाम् + बीजम् + तत् = ------------------------ (गी.१०.२४)

४. सम् + यमी = ------------------------ (गी.२.६९)

५. मूकम् + करोति = ------------------------

६. माम् + नियोजयसि = ------------------------ (गी.३.१)

परसवर्णसन्धिः

परसवर्णाः
ङ् ञ् ण् न् म् यँ् लँ् वँ्

एतानि उदाहरणानि परिशीलयत -

१. गं + गा = ग + ङ् + ग् + आ = **गङ्गा**

२. विमुं + चति = विमु + ञ् + च् + अति = **विमुञ्चति** (गी.१८.३५)

३. अविकं + पेन = अविक + म् + प् + एन = **अविकम्पेन** (गी.१०.७)
४. भुं + जीय = भु + ञ् + ज् + ईय = **भुञ्जीय** (गी.२.५)

जानीत

☞ नित्यम् (अपदान्ते) - अनुस्वारः + वर्गीयव्यञ्जनानि = ङ् ञ् ण् न् म्
☞ विकल्पः (पदान्ते) - अनुस्वारः + वर्गीयव्यञ्जनानि/य व ल = ङ् ञ् ण् न् म् /यँ् वँ् लँ्
☞ तवर्गः + ल् = ल्/लँ्

एतेषु उदाहरणेषु अपदान्तात् अनुस्वारात् परतः वर्गीयव्यञ्जनम् अस्ति । एषु व्यञ्जनेषु परेषु अनुस्वारस्य स्थाने तत्तद्वर्गस्य पञ्चमवर्णः आदेशः भवति ।

एतानि उदाहरणानि परिशीलयत -

१. वर्णसं + करः = वर्णस + ङ् + क् + अरः = **वर्णसङ्करः / वर्णसंकरः** (गी.१.४१)
२. सं + जायते = स + ञ् + ज् + आयते = **सञ्जायते / संजायते** (गी.२.६२)
३. सं + प्रकीर्तितः = स + म् + प्र् + अकीर्तितः = **सम्प्रकीर्तितः / संप्रकीर्तितः** (गी.१८.४)
४. परमं + गुह्यम् = परम + ङ् + ग् + उह्यम् = **परमङ्गुह्यम् / परमं गुह्यम्** (गी.११.१)
५. अक्षरं + ब्रह्म = अक्षर + म् + ब्र् + अह्म = **अक्षरम्ब्रह्म / अक्षरं ब्रह्म** (गी.८.३)
६. अतिनीचं + चैलम् = अतिनीच + ञ् + च् + ऐलम् = **अतिनीचञ्चैलम् / अतिनीचं चैलम्** (गी.६.११)

एतेषु उदाहरणेषु पदान्तात् अनुस्वारात् परतः वर्गीयव्यञ्जनम् अस्ति । अत्र अनुस्वारस्य स्थाने तद्वर्गस्य पञ्चमवर्णः आदेशः विकल्पेन कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१. सं + यमः = सयँ् / सं + यमः = **सँय्यमः / संयमः**
२. सं + वदति = सवँ् / सं + वदति = **सँव्वदति / संवदति**
३. सं + लपति = सलँ् / सं + लपति = **सँल्लपति / संलपति**

एतेषु उदाहरणेषु पदान्तात् अनुस्वारात् परतः 'य्, व्, ल्, इत्येते वर्णाः सन्ति । अत्र अनुस्वारस्य स्थाने **'यँ् वँ्, लँ्'** इत्यादेशः विकल्पेन कृतः अस्ति ।

एतानि उदाहरणानि परिशीलयत -

१. इमान् + लोकान् = इमा + न् + ल् + ओकान् = इमा + लँ् + ल् + ओकान् (गी.१८.१७)
= **इमाँल्लोकान्**
२. श्रुतिमत् + लोके = श्रुतिम + त् + ल् + ओके = श्रुतिम + ल् + ल् + ओके (गी.१३.१३)
= **श्रुतिमल्लोके**

३. समन्ताद् + लोकान् = समन्ता + द् + ल् + ओकान् = समन्ता + ल् + ल् + ओकान् (गी.११.३०)
= **समन्ताल्लोकान्**

४. विपद् + लीनः = विप + द् + ल् + ईनः = विप + ल् + ल् + ईनः
= **विपल्लीनः**

एतेषु तवर्गात् परतः लकारः अस्ति । तत्र **'त् थ् द् ध्'** इत्येतेषां वर्णानां स्थाने 'ल्' इति आदेशः नकारस्य **'लँ्'** इत्यादेशः च कृतः अस्ति ।

अत्र अनुस्वारस्य वर्गीयव्यञ्जने (ययि) परे तद्वर्गस्य पञ्चमः वर्णः प्रयोक्तव्यः इति आदेशः भवति । पदान्ते स्थितस्य अनुस्वारस्य तु विकल्पेन । यवलेषु परेषु तु यँ् वँ् लँ् इत्यादेशो भवति । तवर्गस्य लकारे परे लकारादेशो भवति। तत्र नकारः अस्ति चेत् तस्य अनुनासिकलकारो भवति । अत्र पूर्वपदे अनुस्वारस्य स्थाने परवर्गीयसवर्णव्यञ्जनानि प्रयोक्तव्यानि इति आदेशाः भवन्ति । अतः अस्य नाम परसवर्णसन्धिः इति अस्ति ।

ड. सन्धिविच्छेदम् अथवा सन्धिपदं रिक्तस्थानेषु पूरयत -

१. भुवनाल्लोकाः	=	------------- + ---------------	(गी.८.१६)
२. श्रद्धावान् + लभते	=	-------------------------------	(गी.४.३९)
३. सम् + ------------	=	सन्नियम्य	(गी.१२.४)
४. ------ + ----------	=	सन्न्यासी	(गी.५.३)
५. सङ्ग्रामम्	=	------------- + ---------------	(गी.२.३३)
६. सम् + घातः	=	-------------------------------	(गी.१३.६)
७. -------- + ------------	=	शुभाँल्लोकान्	(गी.१८.७१)
८. तद् + लयः	=	-------------------------------	
९. महान् + लाभः	=	-------------------------------	
१०. ------- + ------------	=	नाहङ्कृतः	(गी.१८.१७)

ङमुडागमसन्धिः

ङमुट् = ङ्, ण्, न्

एतानि उदाहरणानि परिशीलयत -

१. धारयन् + अचलम् = धारय + न् + अ + चलम् (गी.६.१३)
= धारय + न् + न् + अ + चलम् = **धारयन्नचलम्**

२. प्रत्यङ् + आत्मा = प्रत्य + ङ् + आ + त्मा (गी.१.२८)
= प्रत्य + ङ् + ङ् + आ + त्मा = **प्रत्यङ्ङात्मा**

३. विषीदन्निदम् = विषीद + न् + इ + दम्
= विषीद + न् + न् + इ + दम् = **विषीदन्निदम्**

४. सुगण् + ईशः	=	सुग + ण् + ई + शः		(गी.५.९)
	=	सुग + ण् + ण् + ई + शः	=	**सुगण्णीशः**
५. गृह्णन् + उन्मिषन्	=	गृह्ण + न् + उ + न्मिषन्		(गी.६.१५)
	=	गृह्ण + न् + न् + उ + न्मिषन्	=	**गृह्णन्नुन्मिषन्**
६. युञ्जन् + एवम्	=	युञ्ज + न् + ए + वम्		
	=	युञ्ज + न् + न् + ए + वम्	=	**युञ्जन्नेवम्**
७. अस्मिन् + ऐक्यम्	=	अस्मि + न् + ऐ + क्यम्		
	=	अस्मि + न् + न् + ऐ + क्यम्	=	**अस्मिन्नैक्यम्**
८. तस्मिन् + औपचारिके	=	तस्मि + न् + औ + पचारिके		
	=	तस्मि + न् + न् + औ + पचारिके	=	**तस्मिन्नौपचारिके**

अस्मिन् सन्धौ ह्रस्वात् परतः '**ङ् ण् न्**' इति एते वर्णाः सन्ति । एतेभ्यः परतः स्वरवर्णाः सन्ति । अतः स्वरात् पूर्वं क्रमेण '**ङ् ण् न्**' एते आगमाः भवन्ति । नकारः पूर्वम् अस्ति चेत् नकारः, णकारः चेत् णकारः, ङकारः चेत् ङकारः भवति । अर्थात् ह्रस्ववर्णात् परतः '**ङ् ण् न्**' इत्येतेषां द्विरुच्चारणं भवति स्वरवर्णे परे ।

'ङमुट्' इत्यनेन (ङम्) प्रत्याहारस्य ग्रहणं भवति - '**ङ् ण् न्**' ङुट्, नुट्, णुट् इति, अत्र उट् इत्यत्र उकारः उच्चारणार्थः । 'ट्' इत्यस्य लोपः । ङम् + उट् = ङमुट् इति आगमः भवति । अतः अस्य सन्धेः नाम ङमुडागमसन्धिः इति ।

ढ. सन्धिपदम् अथवा सन्धिविच्छेदं रिक्तस्थानेषु पूरयत -

१.	शार्ङ्गिन् + एषोऽहम्	=	--------------------	
२.	------------- + आत्मा	=	प्रत्यङ्ङात्मा	
३.	------------- + ---------	=	सम्यङ्ङास्ते	
४.	------------- + ---------	=	युञ्जन्नेवम्	(गी.६.२८)
५.	कुर्वन् + अपि	=	--------------------	(गी.५.७)
६.	सन् + -----------------	=	सन्नव्ययात्मा	(गी.४.६)
७.	---------- + ----------	=	कुर्वन्नाप्नोति	(गी.४.२१)
८.	हसन् + ---------------	=	हसन्नस्ति	
९.	यशस्विन् + -------------	=	यशस्विन्नायाहि	
१०.	तस्मिन् + इति	=	---------------------	

पूर्वसवर्णसन्धिः

एतानि उदाहरणानि परिशीलयत -

१. एतद् + हि = एत + द् + ह् + इ = एत + द् + ध् / ह् + इ = **एतद्धि / एतद्हि** (गी. ६.४२)

२. धर्म्याद् + हि = धर्म्या + द् + ह् + इ = धर्म्या + द् + ध् / ह् + इ = **धर्म्याद्धि/धर्म्याद्हि** (गी. २.३१)

३. वाग् + हरिः = वा + ग् + ह् + अरिः = वा + ग् + घ् / ह् + अरिः = **वाग्घरिः / वाग्हरिः**

४. षड् + हेतवः = ष + ड् + ह् + एतवः = ष + ड् + ढ् / ह् + एतवः = **षड्ढेतवः / षड्हेतवः**

५. तद् + हितम् = त + द् + ह् + इतम् = त + द् + ध् / ह् + इतम् = **तद्धितम् / तद्हितम्**

एतेषु उदाहरणेषु ञमङणनान् विहाय वर्गीयव्यञ्जनानि सन्ति । एतेभ्यः परतः हकारः अस्ति । अत्र हकारस्य स्थाने विकल्पेन तत्तद्वर्गस्य चतुर्थः वर्णः अस्ति । अतः वर्गीयव्यञ्जनात् (जशः) परस्य हकारस्य तत्तद्वर्गीयचतुर्थव्यञ्जनं विकल्पेन आदेशः भवति । अस्मिन् सन्धौ हकारस्य पूर्वसवर्णः आदेशः भवति । अतः अस्य सन्धेः नाम पूर्वसवर्णसन्धिः इव ।

विशेषः - उदुपसर्गात् परस्य स्थाधातोः स्तम्भधातोः च आदौ स्थितस्य सकारस्य थकारादेशो भवति । यथा -

अभ्युत् + स्थानम् = अभ्यु + त् + स् + थानम् = अभ्यु + त् + थ् + थानम्

= **अभ्युत्थ्थानम् / अभ्युत्थानम्** (थकारस्य विकल्पेन लोपः) (गी.४.७)

उद् + स्तम्भनम = उ + द् + स् + तम्भनम् = उ + त् + थ् + तम्भनम्

= **उत्थ्तम्भनम् / उत्तम्भनम्** (थकारस्य विकल्पेन लोपः)

ण. सन्धिं कुरुत -

१. कामधुग् + हरति = ---------------- २. दिग् + हस्ती = ----------------

३. तद् + हानिः = ---------------- ४. एतद् + हर्म्यम् = ----------------

५. रत्नमुड् + हसति = ---------------- ६. उत् + स्थिता = ---------------- (गी.११.१२)

त. सन्धिविच्छेदं कुरुत -

१. उद्धरेत् = ---------------- + -------------- (गी.६.५)

२. गच्छद्धास्यम् = ---------------- + --------------

३. विड्ढसति = ---------------- + --------------

४. सुहृद्धृष्टः = ---------------- + --------------

छत्वसन्धिः

☞ (प्रथमव्यञ्जनम्) + श् = छ्

एतानि उदाहरणानि परिशीलयत -

१. तत् + शृणु = त + त् + श् + ऋणु = त + च् + श् + ऋणु (गी.७.१)

= त + च् + छ् + ऋणु = **तच्छृणु / तच्शृणु**

२. प्राक् + शेते = प्रा + क् + श् + एते = प्रा + क् + छ् + एते = **प्राक्छेते / प्राक्शेते**

३. युद्धात् + श्रेयः = युद्धा + त् + श् + रेयः = युद्धा + च् + श् + रेयः (गी.२.३१)

= युद्धा + च् + छ् + रेयः = **युद्धाच्छ्रेयः / युद्धात् श्रेयः**

एतेषु उदाहरणेषु पदान्ते स्थितेभ्यः वर्गीयव्यञ्जनेभ्यः परतः शकारः अस्ति । तत्र छकारः विकल्पेन कृतः अस्ति । शकारस्य

छकारः स्वरेषु यरलवमनेषु च परेषु एव भवति। अन्यथा न भवति। यथा - वाक् श्च्योतति इत्यत्र छत्वं न भवति। अतः तत्तद् वर्गीयव्यञ्जनात् परस्य शकारस्य स्थाने विकल्पेन छकारादेशो भवति। परन्तु शकारात्परतः स्वराः यरलवमनाश्च (अम्) भवेयुः। अस्मिन् सन्धौ छकारादेशः भवति। अतः अस्य नाम छत्वसन्धिः इति।

थ. सन्धिपदम् अथवा सन्धिविच्छेदं रिक्तस्थानेषु पूरयत -

१.	यच्छोकम्	=	--------------- + ---------------	(गी.२.८)
२.	उच्छोषणम्	=	--------------- + ---------------	(गी.२.८)
३.	यच्छ्रेयः	=	--------------- + ---------------	(गी.५.१)
४.	--------------------	=	तस्मात् + शास्त्रम्	(गी.१६.२४)
५.	व्यासप्रसादाच्छ्रुतवान्	=	व्यासप्रसादात् + ----------------	(गी.१८.७५)
६.	यत् + श्रद्धः	=	--------------------------------	(गी.१७.३)
७.	--------------------	=	उत् + शिष्टम्	(गी.१७.१०)
८.	--------- + --------	=	एतच्छ्रुतम्	(गी.१८.७२)
९.	तस्मात् + शपते	=	--------------------------------	
१०.	विद्वच्छ्रद्धा	=	--------------- + --------------	
११.	त्यागाच्छान्तिः	=	--------------- + ---------------	(गी.१२.१२)
१२.	तस्मात् + शास्त्रम्	=	--------------------------------	(गी.१६.२४)
१३.	शश्वच्छान्तिम्	=	--------------- + ---------------	(गी.९.३१)
१४.	तच्छलोकेन	=	--------------- + ---------------	

सत्वसन्धिः

नियमाः

☞ न् + (चछ) = ँश् / ंश

☞ न् + (टठ) = ँष् / ंष्

☞ न् + (तथ) = ँस् / ंस्

☞ (स) म् + (स्कृ) = ँस्

☞ स म् (+ स्कृ) = ंस्

एतानि उदाहरणानि परिशीलयत -

१. गणान् + चान्ये = गणा + **न्** + **च** + अन्ये
= गणाँ / गणां + **श्** + **च** + अन्ये
= गणाँश्चान्ये / गणांश्चान्ये (गी.१७.४)

२. सर्वान् + छात्रान् = सर्वा + **न्** + **छ्** + आत्रान्
= सर्वाँ / सर्वां + **श्** + **छ्** + आत्रान्
= सर्वाँश्छात्रान् / सर्वांश्छात्रान्

३. सखीन् + तथा = सखी + **न्** + **त** + था = सखीँ / सखीं + **स्** + **त** + था (गी.१.२६)
= **सखीँस्तथा / सखींस्तथा**

४. प्राणान् + त्यक्त्वा = प्राणा + **न्** + **त्** + यक्त्वा = प्राणाँ / प्राणां + **स्** + **त्** + यक्त्वा
= **प्राणाँस्त्यक्त्वा / प्राणांस्त्यक्त्वा** (गी.१.३३)

५. प्रज्ञावादान् + च = प्रज्ञावादा + न् + च = प्रज्ञावादां + स् + च
= **प्रज्ञावादाँश्च / प्रज्ञावादांश्च** (गी.१.३३)

अत्र नकारान्ताद् पदात् **'च् छ् ट् ठ् त् थ्'** (छव्) इत्येते वर्णाः सन्ति । अतः चछयोः परयोः नकारस्य शकारादेशः, टठयोः परयोः नकारस्य षकारादेशः, तथयोः परयोः नकारस्य सकारादेशः च कृतः अस्ति । आदेशात् पूर्वत्र स्थितः स्वरः अनुनासिकः अनुस्वारयुक्तः वा कृतः अस्ति । परन्तु एतत् सर्वं तदा एव भवति यदा चछादिभ्यः परे स्वराः यरलवमनाश्च (अम्) भवेयुः । अस्मिन् सन्धौ सकारादेशो भवति । अतः अस्य नाम **सत्वसन्धिः** इति अस्ति ।

द. यथोदाहरणं सन्धिं कुरुत -

१.	कामान् + तु	=	**कामाँस्तु / कामांस्तु**	(गी.२.५)
२.	पुमान् + चरति	=	------------------ / ------------------	(गी.२.७१)
३.	विद्वान् + तथा	=	------------------ / ------------------	(गी.३.२५)
४.	वादान् + च	=	------------------ / ------------------	(गी.२.३६)
५.	तान् + तथैव	=	------------------ / ------------------	(गी.४.११)

ध. सन्धिविच्छेदं कुरुत -

१.	विमूढांस्तान्	=	-------------------- + ------------------	(गी.३.३२)
२.	ऋषींश्च	=	-------------------- + ------------------	(गी.११.१५)
३.	देवांस्तव	=	-------------------- + ------------------	(गी.११.१५)
४.	उरगांश्च	=	-------------------- + ------------------	(गी.११.१५)
५.	सर्वांस्तथा	=	-------------------- + ------------------	(गी.११.१५)

यवलोपसन्धिः

एतानि उदाहरणानि परिशीलयत -

१. ये + एतेऽत्र	= य् + **ए** + **ए** + तेऽत्र	= य् + **अय्** + ए + तेऽत्र	(गी.१.२३)
	= य् + अय् / अ + ए + तेऽत्र	= **ययेतेऽत्र / य एतेऽत्र**	(अयादिसन्धिः)
२. गौर्यै + इदम्	= गौर्य् + **ऐ** + **इ** + दम्	= गौर्य् + **आय्** + इ + दम्	
	= गौर्य् + आय् / आ + इ + दम्	= **गौर्यायिदम् / गौर्या इदम्**	
३. शम्भो + अत्र	= शम्भ् + **ओ** + **अ** + त्र	= शम्भ् + **अव्** + अ + त्र	
	= शम्भ् + अव् / अ + अ + त्र	= **शम्भवत्र / शम्भ अत्र**	
४. अवनतौ + असौ	= अवनत् + **औ** + **अ** + सौ	= अवनत् + **आव्** + अ + सौ	
	= अवनत् + आव् / आ + अ + सौ	= **अवनतासौ / अवनता असौ**	
५. बान्धवाः + व्रजन्ति	= बान्धवा + **स्** + **व्र** + जन्ति	= बान्धवा + **र्** + व्र + जन्ति	

	= बान्धवा + य् + व्र + जन्ति	=	**बान्धवा व्रजन्ति**
६. पुत्राः + आयान्ति	= पुत्रा + **स्** + **आ** + यान्ति	=	पुत्रा + **र्** + **आ** + यान्ति
	= पुत्र + **य्** + **आ** + यान्ति	=	**पुत्रायायान्ति / पुत्रा आयान्ति**

अत्र अकार-आकारपूर्वकयोः यकार-वकारयोः विकल्पेन लोपः कृतः अस्ति। अस्मिन् सन्धौ यवयोः लोपकरणानन्तरं सन्धेः निमित्तम् अस्ति चेदपि सन्धिः न भवति। तत्र व्यञ्जनं परतः अस्ति चेत् यकारस्य नित्यं लोपः भवति। अतः पदान्ते स्थितस्य अकारपूर्वस्य आकारपूर्वस्य वा यकारस्य वकारस्य च स्वरे परे सति विकल्पेन लोपः भवति, व्यञ्जने परे सति तु नित्यं लोपः भवति। लोपे कृते निमित्तस्य सद्भावे अपि स्वरसन्धिः न भवति। (५-६ एतयोः उदाहरणयोः यः यकारः दृश्यते सः अवर्णपूर्वकसकारस्य स्थाने कृतः अस्ति। अवर्णपूर्वकसकारस्य स्थाने यकारः भवति 'अश्' प्रत्याहारे परे सति। अधः अभ्यासेषु अपि तथैव ज्ञातव्यम् इति।) अस्मिन् सन्धौ यकारवकारयोः लोपः भवति इति कारणेन अस्य नाम यव-लोपसन्धिः इति।

न. सन्धिं कुरुत -

१.	योत्स्ये + इति	=	------------- / -------------	(गी.१८.५९)
२.	वर्तन्ते + इति	=	------------- / -------------	(गी.५.९)
३.	पुत्र्यै + आनयति	=	------------- / -------------	
४.	प्रभो + अधुना	=	------------- / -------------	
५.	भानौ + अपि	=	------------- / -------------	
६.	देवाय् + उपविशन्ति	=	------------- -------------	
७.	निर्मानमोहाय् + जित	=	------------- -------------	(गी.१५.५)
८.	विभ्रान्ताय् + मोहजालम्	=	------------- -------------	(गी.१६.१६)

प. सन्धिविच्छेदं कुरुत -

१.	मोदिष्य इति	=	---------------- + ----------------	(गी.१६.१५)
२.	वृत्तिस्था अधो	=	---------------- + ----------------	(गी.१४.१८)
३.	स्थिरा हृद्याः	=	---------------- + ----------------	(गी.१७.८)
४.	वर्तन्त इत्येव	=	---------------- + ----------------	(गी.१४.२३)
५.	ध्यायन्त उपासते	=	---------------- + ----------------	(गी.१२.६)
६.	बाला आगतौ	=	---------------- + ----------------	

फ. यथोदाहरणं वर्णक्रमं प्रदर्श्य व्यञ्जनसन्धेः नाम लिखत -

तस्मात् + न	**तस्मा + त् + न् + अ**	**तस्मा + न् + न् + अ**	
	तस्मान्न	**अनुनासिकसन्धिः**	**(गी.१.३७)**
१. क्रोधात् + भवति	--------------------------	--------------------------	
	--------------------------	-------------------	(गी.२.६३)

२. तान् + तितिक्षस्व	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.१.१४)
३. कश्चित् + एनम्	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.२.२९)
४. मत् + मया	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.४.१०)
५. यच् + शोकम्	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.२.८)
६. इष्टः	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.१८.६४)
७. अस्मद् + शिष्यः	----------------------------	------------------------------	
	----------------------------	------------------------	
८. अविकं + पेन	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.१०.७)
९. पश्यन् + आत्मनि	----------------------------	------------------------------	
	----------------------------	------------------------	(गी.६.२०)
१०. विश्वराड् + नमति	----------------------------	------------------------------	
	----------------------------	------------------------	

ब. स्थूलाक्षरैः निर्दिष्टानां पदानां सन्धिच्छेदं विधाय कः सन्धिः इति यथोदाहरणं लिखत -

यथा - ॐ **तत्सदिति** निर्देशः (गी.१७.२३)	-	**तत्सत् + इति**	=	**जश्त्वसन्धिः**
१. **अकर्मणश्च** बोद्धव्यम् (गी.४.१७)	-	अकर्मणस् + च	=	-------------
२. अजोऽपि **सन्नव्ययात्मा** (गी.४.६)	-	--------- + अव्ययात्मा	=	-------------
३. **अनादित्वान्निर्गुणत्वात्** (गी.१३.३१)	-	--------- + -------	=	-------------
४. **अश्नन्गच्छन्स्वपञ्श्वसन्** (गी.५.८)	-	--------- + श्वसन्	=	-------------
५. **अहङ्कारं** बलं दर्पम् (गी.१६.१८)	-	--------- + -------	=	-------------
६. का प्रीतिः **स्याज्जनार्दन** (गी.१.३६)	-	--------- + --------	=	-------------
७. बहु **वल्लभा राजानः** श्रूयन्ते	-	--------- + --------	=	-------------
८. वेतसंग्र**हाच्छक्नोमि**	-	--------- + --------	=	-------------
९. **धर्म्याद्धि** युद्धाच्छ्रेयोऽन्यत् (गी.२.३१)	-	--------- + हि	=	-------------
१०. **तांस्तथैव** भजाम्यहम् (गी.४.११)	-	--------- + --------	=	-------------

भ. एतेभ्यः श्लोकेभ्यः व्यञ्जनसन्धियुक्तानि पदानि चित्वा पदविभाजनं च कृत्वा अधः प्रदत्तेषु रिक्तस्थानेषु यथोदाहरणं लिखत -

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ (गी.१८.६५) ॥
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ (गी.१५.१२) ॥
पश्यामि देवांस्तव देव देहे,
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ॥ (गी.११.१५) ॥
सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ (गी.५.१) ॥
यादृशैः सन्निविशते यादृशांश्चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥

१. अनुनासिकसन्धिः - **मत् + मना**

२. जश्त्वसन्धिः -

३. अनुस्वारसन्धिः -

४. श्चुत्वसन्धिः -
५. चर्त्वसन्धिः -
६. सत्वसन्धिः -
७. परसवर्णसन्धिः -
८. छत्वसन्धिः -

म. यथोदाहरणं प्रतिसन्धिपदं विभज्य विजातीयपदं निर्णयत -

यथा - पाण्डवाश्चैव	=	पाण्डवास् + चैव	=	श्चुत्वसन्धिः	(गी.१.१)
यज्ज्ञात्वा	=	यद् + ज्ञात्वा	=	श्चुत्वसन्धिः	(गी.४.१६)
यज्जुहोषि	=	यद् + जुहोषि	=	श्चुत्वसन्धिः	(गी.९.२७)
स्थितश्चलति	=	स्थितस् + चलति	=	श्चुत्वसन्धिः	(गी.६.२१)
बलवद्दृढम्	=	बलवत् + दृढम्	=	जश्त्वसन्धिः	(गी.६.३४)

बलवद्दृढम् इति विजातीयपदम्

१.	पृथिवीं चैव	=	------- + --------=	---------------	(गी.१.१९)
	विजयं कृष्ण	=	------- + --------=	---------------	(गी.१.३२)
	संयाति	=	------- + --------=	---------------	(गी.२.२२)
	संशयात्मा	=	------- + --------=	---------------	(गी.४.४०)
	सञ्ज्ञके	=	------- + --------=	---------------	(गी.८.१८)
	------------------------- इति विजातीयपदम्				
२.	अस्मान्निवर्तितुम्	=	------- + --------=	---------------	(गी.१.३९)
	कतरन्नः	=	------- + --------=	---------------	(गी.२.६)
	कृत्स्नविन्न	=	------- + --------=	---------------	(गी.३.२९)
	एतन्मे	=	------- + --------=	---------------	(गी.६.३९)
	स्यादात्मतृप्तः	=	------- + --------=	---------------	(गी.३.१७)
	-------------	=	इति विजातीयपदम्		
३.	स्याज्जनार्दन	=	------- + --------=	---------------	(गी.१.३६)
	प्रसिद्ध्येदकर्मणः	=	------- + --------=	---------------	(गी.३.८)
	सन्न्यसनादेव	=	------- + --------=	---------------	(गी.३.४)
	यज्ञाद्भवति	=	------- + --------=	---------------	(गी.३.१४)
	बन्धात्प्रमुच्यते	=	------- + --------=	---------------	(गी.५.३)
	-------------	=	इति विजातीयपदम्		
४.	उच्छ्रितम्	=	------- + --------=	---------------	(गी.६.११)
	तच्छक्यम्	=	------- + --------=	---------------	(गी.११.४)
	एतच्छ्रुत्वा	=	------- + --------=	---------------	(गी.११.३५)
	यच्छ्रद्धः	=	------- + --------=	---------------	(गी.१७.३)
	संयम्य	=	------- + --------=	---------------	(गी.३.६)
	-------------	=	इति विजातीयपदम्		
५.	एतांस्त्रीन्	=	------- + --------=	---------------	(गी.१४.२१)
	हतांस्त्वम्	=	------- + --------=	---------------	(गी.११.३४)
	योगिंस्त्वाम्	=	------- + --------=	---------------	(गी.१०.१७)
	विपरीतांश्च	=	------- + --------=	---------------	(गी.१८.३२)
	तन्निबध्नाति	=	------- + --------=	---------------	(गी.१४.७)
	-------------	=	इति विजातीयपदम्		
६.	श्रद्धावाँल्लभते	=	------- + --------=	---------------	(गी.४.३९)
	शुभाँल्लोकान्	=	------- + --------=	---------------	(गी.१८.७१)
	इमाँल्लोकान्	=	------- + --------=	---------------	(गी.१८.१७)
	श्रुतिमल्लोके	=	------- + --------=	---------------	(गी.१३.१३)
	यन्मम	=	------- + --------=	---------------	(गी.११.५२)

कर्मण्येवाधिकारस्ते

विसर्गसन्धिः ४

एतत् कथानकं सावधानं पठत -

रुक्मिण्याः करुणप्रार्थना



कृष्णस्य महिम्नः विषये **नारदऽपूर्वमेव** (नारदः पूर्वमेव) रुक्मिणीं बोधितवान् आसीत् । तस्मिन् समये सा **कृष्ण एव** (कृष्णः एव) मम **पतिर्भविष्यति** (पतिः भविष्यति) इति मनसा निश्चयं कृतवती । **विवाहकालो यदा सन्निहितस्तदा तस्या भ्रात्रा** (विवाहकालः यदा सन्निहितः तदा तस्याः भ्रात्रा) शिशुपालेन सह **विवाहो निश्चितः** । एतत् ज्ञात्वा रुक्मिणी व्याकुलतां गता । इदानीं मम कष्टस्य **परिहारऽकथं** (परिहारः कथं) भवेदिति चिन्तयन्त्याः तस्याः पुरतः **कुलपुरोहित उपस्थितः** (कुलपुरोहितः उपस्थितः) । तदा तं दृष्ट्वा प्रसन्नमुखी भूत्वा सा दुःखेन तस्मै पूर्वोक्तं समग्रं वृत्तान्तं निवेदितवती । उक्तवती च - "भवन्तं विना मम कार्यं **कोऽपि** साधयितुं न शक्नोति । सा तस्मै एकं पत्रं दत्त्वा उक्तवती यत् - मम इदं पत्रम् अल्पेन कालेन भवान् एव प्रापयितुम् अर्हति । अतः हे ब्रह्मदेव ! कृपया ममोपरि कृपा क्रियताम्" इति ।

ब्राह्मणऽकृष्णस्य (ब्राह्मणः कृष्णस्य) समीपम् अगच्छत् । कृष्णाय पत्रं प्रदाय सर्वं न्यवेदयत् च । तत् पत्रं दृष्ट्वा कृष्णः अविलम्बेन करुणया ब्राह्मणेन सह द्वारिकातः प्रस्थितः ।

एतस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि विसर्गसन्धियुक्तानि पदानि सन्ति । आवरणे सन्धिविभागोऽपि दर्शितः अस्ति ।

एतानि गीतावाक्यानि सावधानं परिशीलयत -

१. **शक्य एवंविधो द्रष्टुं** दृष्टवानसि मां यथा । (गी.११.५३)

२. **युयुधानो विराटश्च द्रुपदश्च** महारथः । (गी.१.४)

३. **सेनयोरुभयोर्मध्ये** रथं स्थापय मेऽच्युत । (गी.१.२१)

४. **कर्मण्येवाधिकारस्ते** मा फलेषु कदाचन । (गी.२.४७)

अधः प्रदत्तानां पदानां विच्छेदं पश्यत -

१.	शक्य एवंविधो द्रष्टुम्	-	**शक्यः + एवंविधः + द्रष्टुम्**
२.	युयुधानो विराटश्च द्रुपदश्च	-	**युयुधानः + विराटः + च, द्रुपदः + च**

३. सेनयोरुभयोर्मध्ये - **सेनयोः + उभयोः + मध्ये**

४. कर्मण्येवाधिकारस्ते - **कर्मण्येवाधिकारः + ते**

एतानि सर्वाणि विसर्गसन्धेः उदाहरणानि सन्ति ।

विसर्गसन्धिः

विसर्गस्य पञ्चविधाः परिणामाः दृश्यन्ते । ते च - **सकारः, जिह्वामूलीयः, उपध्मानीयः, रेफः, लोपः, उकारः** इति ।

➢ सकारः -

१. एते उदाहरणे परिशीलयत -

१.	दुर्योधनः + तदा	=	दुर्योधन + : + तदा	
		=	दुर्योधन + स् + तदा	(सकारः)
		=	दुर्योधनस्तदा	(गी.१.२)
२.	विराटः + च	=	विराट + : + च	
		=	विराट + स् + च	
		=	विराट + श् + च श्चुत्वसन्धिः	
		=	विराटश्च	(गी.१.४)

यत्र विसर्गात् परतः कखपफान् विहाय कर्कशव्यञ्जनानि (खर्-वर्णाः) भवन्ति तत्र विसर्गस्य सकारादेशः भवति ।

२. एतानि उदाहरणानि परिशीलयत -

१.	ततः + श्वेतैः	=	तत + : + श् + वेतैः	
		=	तत + स् / : + श् + वेतैः	(विकल्पेन सकारः)
		=	तत + श् / : + श् + वेतैः	(श्चुत्वसन्धिः)
		=	ततश्श्वेतैः / ततःश्वेतैः	(गी.१.१४)
२.	शुक्लः + षण्मासाः	=	शुक्ल + : + ष् + अण्मासाः	
		=	शुक्ल + स् / : + ष् + अण्मासाः	(विकल्पेन सकारः)
		=	शुक्ल + ष् / : + ष् + अण्मासाः	(ष्टुत्वसन्धिः)
		=	शुक्लष्षण्मासाः / शुक्लः षण्मासाः	(गी.८.२४)
३.	यच्छ्रद्धः + सः	=	यच्छ्रद्ध + : + सः	
		=	यच्छ्रद्ध + स् / : + सः	(विकल्पेन सकारः)
		=	यच्छ्रद्धस्सः / यच्छ्रद्धः सः	(गी.१७.३)

एतेषु उदाहरणेषु विसर्गात् परतः **श् ष् स्** इत्येतानि व्यञ्जनानि सन्ति । अत्र विकल्पेन सकारादेशः कृतः अस्ति । अत्र शकारपरकस्य सकारस्य स्थाने शकारादेशः, षकारपरकस्य सकारस्य स्थाने षकारादेशः च कृतः अस्ति । अतः

विसर्गस्य तथयोः परयोः **सकारः**, चछयोः परयोः **शकारः**, टठयोः परयोः **षकारः**, श् ष् स् इत्येतेषु परेषु यथासंख्यं (क्रमात्) विकल्पेन **श् ष् स्** इत्येते आदेशाः भवन्ति।

अभ्यासः

क. यथोदाहरणं सन्धिविच्छेदं कुरुत -

१.	सौमदत्तिस्तथैव	=	---------------- + ----------------	(गी.१.८)
२.	धृष्टकेतुश्चेकितानः	=	---------------- + ----------------	(गी.१.५)
३.	सन्तुष्टस्तस्य	=	---------------- + ----------------	(गी.३.१७)
४.	कर्मण्येवाधिकारस्ते	=	---------------- + ----------------	(गी.२.४७)
५.	विभ्रष्टश्छिन्नाभ्रमिव	=	---------------- + ----------------	(गी.६.३८)

ख. सन्धिं कुरुत -

१.	**पौत्राः + श्यालाः**	=	**पौत्राः श्यालाः / पौत्राश्श्यालाः**	**(गी.१.३४)**
२.	निरहङ्कारः + समदुःखसुखः	=	------------------ / --------------------	(गी.१२.१३)
३.	स्थितप्रज्ञः + तदोच्यते	=	--	(गी.२.५५)
४.	युधामन्युः + च	=	--	(गी.१.६)
५.	रामः + टीकते	=	--	

➢ जिह्वामूलीयः उपध्मानीयश्च -

एतानि उदाहरणानि परिशीलयत -

१.	मामकाः + पाण्डवाः	=	**मामका≍पाण्डवाः / मामकाः पाण्डवाः**	(गी.१.१)
२.	श्वशुराः + पौत्राः	=	**श्वशुरा≍पौत्राः / श्वशुराः पौत्राः**	(गी.१.३४)
३.	हेतोः + किम्	=	**हेतो≍किम् / हेतोः किम्**	(गी.१.३५)
४.	वायुः + खे	=	**वायु≍खे / वायुः खे**	(गी.७.४)

एतेषु उदाहरणेषु विसर्गात् परतः 'क् ख् प् फ्' इत्येतानि व्यञ्जनानि सन्ति। तत्र **विसर्गस्य** 'प् फ्' इत्येतयोः परयोः (≍) **उपध्मानीयादेशः** 'क् ख्' इत्येतयोः परयोः (≍) **जिह्वामूलीयादेशश्च** कृतः अस्ति।

ग. सन्धिं कुरुत -

१.	**सर्वशः + पृथिवीपते**	=	**सर्वश ≍ पृथिवीपते / सर्वशः पृथिवीपते**	**(गी.१.१८)**
२.	आचार्याः + पितरः	=	------------------ / ------------------	(गी.१.३४)
३.	कृपणाः + फलहेतवः	=	----------------- / -------------------	(गी.२.४९)
४.	यज्ञः + कर्मसमुद्भवः	=	---------------- / --------------------	(गी.३.१४)
५.	शब्दः + खे	=	--------------- / ---------------------	(गी.७.८)

➤ **रेफः**

एतानि उदाहरणानि परिशीलयत -

१.	शान्तिः + अशान्तस्य	=	शान्ति + : + अ + शान्तस्य			(गी.२.६६)
		=	शान्ति + र् +अ + शान्तस्य	=	**शान्तिरशान्तस्य**	
२.	रिपुः + आत्मनः	=	रिपु + : + आ + त्मनः			(गी.६.५)
		=	रिपु + र् + आत्मनः	=	**रिपुरात्मनः**	
३.	यज्ञैः + इष्ट्वा	=	यज्ञै + : + इ + ष्ट्वा			(गी.९.२०)
		=	यज्ञै + र् + इ + ष्ट्वा	=	**यज्ञैरिष्ट्वा**	
४.	हरिः + ईश्वरः	=	हरि + : + ई + श्वरः			
		=	हरि + र् + ई + श्वरः	=	**हरिरीश्वरः**	
५.	धनुः + उद्यम्य	=	धनु + : + उ + द्यम्य			(गी.१.२०)
		=	धनु + र् + उ + द्यम्य	=	**धनुरुद्यम्य**	
६.	शम्भुः + ऊर्ध्वम्	=	शम्भु + : + ऊ + र्ध्वम्			
		=	शम्भु + र् + ऊ + र्ध्वम्	=	**शम्भुरूर्ध्वम्**	
७.	फलैः + एवम्	=	फलै + : + ए + वम्			(गी.९.२८)
		=	फलै + र् + ए + वम्	=	**फलैरेवम्**	
८.	उभयोः + अपि	=	उभयो +: + अ + पि			(गी.२.१६)
		=	उभयो + र् + अ + पि	=	**उभयोरपि**	

एतेषु उदाहरणेषु विसर्गात् पूर्वम् अकारम् / आकारं विहाय अन्ये स्वराः सन्ति। विसर्गात् परतः अपि स्वराः सन्ति। अतः विसर्गस्य रेफादेशः कृतः अस्ति। **अकार-आकारौ विहाय अन्यस्वरात् परस्य विसर्गस्य रेफादेशः भवति स्वरे परे।**

एतानि उदाहरणानि परिशीलयत -

१.	भोगैः + जीवितेन	=	भोगै + : + ज् + ईवितेन			(गी.१.३२)
		=	भोगै + र् + ज् + ईवितेन	=	**भोगैर्जीवितेन**	
२.	दुर्बुद्धेः + युद्धे	=	दुर्बुद्धे + : + य् + उद्धे			(गी.१.२३)
		=	दुर्बुद्धे + र् + य् + उद्धे	=	**दुर्बुद्धेर्युद्धे**	
३.	देहान्तरप्राप्तिः + धीरः	=	देहान्तरप्राप्ति + : + ध् + ईरः			(गी.२.१३)
		=	देहान्तरप्राप्ति + र् + ध् + ईरः	=	**देहान्तरप्राप्तिर्धीरः**	
४.	अकीर्तिः + मरणात्	=	अकीर्ति + : + म् + अरणात्			(गी.२.३४)

		=	अकीर्ति + र् + म् + अरणात् = **अकीर्तिर्मरणात्**	
५.	बुद्धिः + व्यतितरिष्यति	=	बुद्धि + : + व् + यतितरिष्यति	(गी.२.५२)
		=	बुद्धि + र् + व् + यतितरिष्यति = **बुद्धिर्व्यतितरिष्यति**	
६.	वायुः + नावम्	=	वायु + : + न् + आवम्	(गी.२.६७)
		=	वायु + र् + न् + आवम् = **वायुर्नावम्**	
७.	कर्मफलप्रेप्सुः + लुब्धः	=	कर्मफलप्रेप्सु + : + ल् + उब्धः	(गी.१८.२७)
		=	कर्मफलप्रेप्सु + र् + ल् + उब्धः = **कर्मफलप्रेप्सुर्लुब्धः**	
८.	प्रभवैः + गुणैः	=	प्रभवै + : + ग् + उणैः	(गी.१८.४१)
		=	प्रभवै + र् + ग् + उणैः = **प्रभवैर्गुणैः**	
९.	शत्रुः + हनिष्ये	=	शत्रु + : + ह् + अनिष्ये	(गी.१६.१४)
		=	शत्रु + र् + ह् + अनिष्ये = **शत्रुर्हनिष्ये**	
१०.	बुद्धिः + बुद्धिमताम्	=	बुद्धि + : + बुद्धिमताम्	(गी.७.१०)
		=	बुद्धि + र् + ब्+उ+द्धिमताम् = **बुद्धिर्बुद्धिमताम्**	
११.	विदुः + देवाः	=	विदु + : + द् + एवाः	(गी.१०.१४)
		=	विदु + र् + द् + एवाः = **विदुर्देवाः**	
१२.	बुद्धिः + ज्ञानम्	=	बुद्धि + : + ज्ञ् + आनम्	(गी.१०.४)
		=	बुद्धि + र् + ज्ञ् + आनम् = **बुद्धिर्ज्ञानम्**	
१३.	बुद्धेः + भेदम्	=	बुद्धे + : + भ् + एदम्	(गी.१८.२९)
		=	बुद्धे + र् + भ् + एदम् = **बुद्धेर्भेदम्**	
१४.	आदिः + हि	=	आदि + : + ह् + इ	(गी.१०.२)
		=	आदि + र् + ह् + इ = **आदिर्हि**	

एतेषु उदाहरणेषु विसर्गात् पूर्वम् 'अ आ' इत्येतौ वर्णौ विहाय अन्ये स्वरवर्णाः सन्ति। विसर्गात् परतः मृदुव्यञ्जनानि सन्ति। अत्र विसर्गस्य रेफादेशः कृतः अस्ति। **अकार-आकारौ विना अन्यस्वरात् परस्य विसर्गस्य रेफादेशः भवति मृदुव्यञ्जने परे।**

एतानि उदाहरणानि परिशीलयत -

१.	पुनः + आवर्तिनः	=	पुन + : + आ + वर्तिनः	(गी.८.१६)
		=	पुन + र् + आ + वर्तिनः = **पुनरावर्तिनः**	
२.	पुनः + जन्म	=	पुन + : + ज् + अन्म	(गी.८.१६)
		=	पुन + र् + ज् + अन्म = **पुनर्जन्म**	
३.	बहिः + अन्तः	=	बहि + : + अ + न्त	

= बहि + र् + अ + न्त = **बहिरन्तः**

४. शनैः + उपरमेद् = शनै + : + उ + परमेद् (गी.६.२५)

= शनै + र् + उ + परमेद् = **शनैरुपरमेद्**

एतेषु उदाहरणेषु अव्ययसम्बन्धिनः विसर्गात् परतः स्वरः मृदुव्यञ्जनं वा अस्ति। अत्र विसर्गस्य स्थाने रेफादेशः कृतः अस्ति। **स्वरे मृदुव्यञ्जने वा परे अव्ययसम्बन्धिनः विसर्गस्य स्थाने रेफादेशः भवति।**

घ. सन्धिविच्छेदं कुरुत -

१. पुनर्योगम् = ------------------ + ------------------ (गी.५.१)

२. निराशीर्निर्ममः = ------------------ + ------------------ (गी.३.३०)

३. प्रकृतेर्गुणसम्मूढाः = ------------------ + ------------------ (गी.३.२९)

४. प्रकृतेर्ज्ञानवानपि = ------------------ + ------------------ (गी.३.३३)

५. बुद्धिर्यस्य = ------------------ + ------------------ (गी.१८.१७)

६. चिकीर्षुर्लोकसङ्ग्रहम् = ------------------ + ------------------ (गी.३.२५)

७. कृताञ्जलिर्वेपमानः = ------------------ + ------------------ (गी.११.३५)

८. कृताञ्जलिरभाषत = ------------------ + ------------------ (गी.११.१४)

९. केवलैरिन्द्रियैः = ------------------ + ------------------ (गी.५.११)

१०. ग्लानिर्भवति = ------------------ + ------------------ (गी.४.७)

ङ. सन्धिं कुरुत -

१. निः + गुणत्वात् = ------------------------------------ (गी.१३.३१)

२. प्रकृतेः + वशात् = ------------------------------------ (गी.९.८)

३. गतिः + दुःखम् = ------------------------------------ (गी.१२.५)

४. अग्निः + अहम् = ------------------------------------ (गी.९.१७)

५. जिज्ञासुः +अर्थार्थी = ------------------------------------ (गी.७.१६)

६. आरुरुक्षोः + मुनेः + योगम् = ------------------------------------ (गी.६.३)

७. त्रिभिः + नरः = ------------------------------------ (गी.१६.२२)

८. तुल्यनिन्दास्तुतिः + मौनी = ------------------------------------ (गी.१२.१९)

९. सौम्यवपुः + महात्मा = ------------------------------------ (गी.११.५०)

१०. वदनैः + ज्वलद्भिः = ------------------------------------ (गी.११.३०)

११. प्रवृत्तिः + आरम्भः = ------------------------------------ (गी.१४.१२)

➢ विसर्गस्य लोपः[1]

एतानि उदाहरणानि परिशीलयत -

१.	युक्तः + आसीत	=	युक्त् + अ + : + आ + सीत	
		=	युक्त् + अ + **य्** + आ + सीत /	
			युक्त् + अ + आ + सीत	विकल्पेन यकारस्य लोपः
		=	**युक्त आसीत / युक्तयासीत**	(गी.६.१४)
२.	क्षेत्रज्ञः + इति	=	क्षेत्रज्ञ् + अ + : + इ + ति	
		=	क्षेत्रज्ञ् + अ + **य्** + इ + ति /	
			क्षेत्रज्ञ् + अ + इ + ति	विकल्पेन यकारस्य लोपः
		=	**क्षेत्रज्ञ इति / क्षेत्रज्ञयिति**	(गी.१३.१)
३.	अव्ययः + ईश्वरः	=	अव्यय् + अ + : + ई + श्वरः	
		=	अव्यय् + अ + **य्** + ई + श्वरः /	
			अव्यय् + अ + ई + श्वरः	विकल्पेन यकारस्य लोपः
		=	**अव्यय ईश्वरः / अव्यययीश्वरः**	(गी.१५.१७)
४.	ध्यायन्तः + उपासते	=	ध्यायन्त् + अ + : + उ + पासते	
		=	ध्यायन्त् + अ + **य्** + उ + पासते /	
			ध्यायन्त् + अ + उ + पासते	विकल्पेन यकारस्य लोपः
		=	**ध्यायन्त उपासते / ध्यायन्तयुपासते**	(गी.१२.६)
५.	अतः + ऊर्ध्वम्	=	अत् + अ + : + ऊ + र्ध्वम्	
		=	अत् + अ + **य्** + ऊ + र्ध्वम् /	
			अत् + अ + ऊ + र्ध्वम्	विकल्पेन यकारस्य लोपः
		=	**अत ऊर्ध्वम् / अतयूर्ध्वम्**	(गी.१२.८)
६.	ओङ्कारः + ऋक्साम	=	ओङ्कार् + अ + : + ऋ + क्साम	
		=	ओङ्कार् + अ + **य्** + ऋ + क्साम /	
			ओङ्कार् + अ + ऋ + क्साम	विकल्पेन यकारस्य लोपः
		=	**ओङ्कार ऋक्सामः / ओङ्कारयृक्साम**	(गी.९.१७)
७.	सर्वतः + एव	=	सर्वत् + अ + : + ए + व	
		=	सर्वत् + अ + **य्** + ए + व /	
			सर्वत् + अ + ए + व	विकल्पेन यकारस्य लोपः
		=	**सर्वत एव / सर्वतयेव**	(गी.११.४०)

1. यद्यपि अत्र विसर्गस्य लोपः न भवति, तत्र विसर्गस्य स्थाने यकारादेशं कृत्वा यकारस्य लोपः भवति, तथापि तद् विसर्गसम्बधिकार्यम् अस्ति इति कारणेन अत्र विसर्गस्य लोपः इति व्यवहृतः ।

एतेषु उदाहरणेषु अकारात् परतः विसर्गो वर्तते । ततः परम् अकारं विना अन्ये स्वराः सन्ति । अतः विसर्गस्य स्थाने यकारादेशः किञ्च तस्य यकारस्य विकल्पेन लोपः कृतः अस्ति । यकारेण सहितः प्रयोगः विरलः एव । लोपे सति प्रकृतिभावः[1] भवति ।

एतानि उदाहरणानि परिशीलयत -

१.	दोषाः + अध्यात्मनित्याः	=	दोष् + आ + : + अ + ध्यात्मनित्याः	
		=	दोष् + आ + **य्** + अ + ध्यात्मनित्याः /	
			दोष् + आ + अ + ध्यात्मनित्याः	
		=	**दोषा अध्यात्मनित्याः/ दोषायध्यात्मनित्याः**	(गी.१५.५)
२.	अपहृतज्ञानाः + आसुरम्	=	अपहृतज्ञान् + आ + : + आ + सुरम्	
		=	अपहृतज्ञान् + आ + **य्** + आ + सुरम्	
			अपहृतज्ञान् + आ + आ + सुरम्	
		=	**अपहृतज्ञाना आसुरम् / अपहृतज्ञानायासुरम्**	(गी.७.१५)
३.	मणिगणाः + इव	=	मणिगण् + आ + : + इ + व	
		=	मणिगण् + आ + **य्** + इ + व /	
		=	मणिगण् + आ + इ + व	
		=	**मणिगणा इव / मणिगणायिव**	(गी.७.७)
४.	नित्ययुक्ताः + उपासते	=	नित्ययुक्त् + आ + : + उ + पासते	
		=	नित्ययुक्त् + आ + **य्** + उ + पासते /	
			नित्ययुक्त् + आ + उ + पासते	
		=	**नित्ययुक्ता उपासते / नित्ययुक्तायुपासते**	(गी.१२.२)
५.	कामोपभोगपरमाः + एतावत्	=	कामोपभोगपरम् + आ + : + ए + तावत्	
		=	कामोपभोगपरम् + आ + **य्** + ए + तावत्	
			कामोपभोगपरम् + आ + ए + तावत्	
		=	**कामोपभोगपरमा एतावत् / कामोपभोगपरमायेतावत्**	(गी.१६.११)
६.	देवाः + अपि	=	देव् + आ + : + अ + पि	
		=	देव् + आ + **य्** + अ + पि /	
			देव् + आ + अ + पि	
		=	**देवा अपि / देवायपि**	(गी.११.५२)

---

१. अत्र प्रकृतिभावः इति कथनेन सन्धिकार्याभावः इति ।

एतेषु उदाहरणेषु आकारात् परतः विसर्गः अस्ति । ततः परं स्वरवर्णाः सन्ति । अत्र विसर्गस्य यकारादेशः । विकल्पेन यकारस्य लोपः, लोपे सति प्रकृतिभावः च जातः अस्ति । अत्रापि लोपे सति अन्ये सन्धयः न जाताः सन्ति ।

एतानि उदाहरणानि परिशीलयत -

१.	शाखाः + गुणप्रवृद्धाः	=	शाख् + आ + : + ग् + उणप्रवृद्धाः	
		=	शाख् + आ + **य्** + ग् + उणप्रवृद्धाः	
		=	शाख् + आ + ग् + उणप्रवृद्धाः	
		=	**शाखा गुणप्रवृद्धाः**	(गी.१५.२)
२.	निर्मानमोहाः + जितसङ्गदोषाः	=	निर्मानमोह् + आ + : + ज् + इतसङ्गदोषाः	
		=	निर्मानमोह् + आ + **य्** + ज् + इतसङ्गदोषाः	
		=	निर्मानमोह् + आ + ज् + इतसङ्गदोषाः	
		=	**निर्मानमोहा जितसङ्गदोषाः**	(गी.१५.५)
३.	षण्मासाः + दक्षिणायनम्	=	षण्मास् + आ + : + द + क्षिणायनम्	
		=	षण्मास् + आ + **य्** + द + क्षिणायनम्	
		=	षण्मास् + आ + द + क्षिणायनम्	
		=	**षण्मासा दक्षिणायनम्**	(गी.८.२५)
४.	समागताः + धार्तराष्ट्रस्यैते	=	समागत् + आ + : + ध् + आर्तराष्ट्रस्यैते	
		=	समागत् + आ + **य्** + ध् + आर्तराष्ट्रस्यैते	
		=	समागत् + आ + ध् + आर्तराष्ट्रस्यैते	
		=	**समागता धार्तराष्ट्रस्यैते**	
५.	वेदाः + निस्त्रैगुण्यः	=	वेद् + आ + : + न् + इस्त्रैगुण्यः	
		=	वेद् + आ + **य्** + न् + इस्त्रैगुण्यः	
		=	वेद् + आ + न् + इस्त्रैगुण्यः	
		=	**वेदा निस्त्रैगुण्यः**	(गी.२.४५)
६.	मद्गतप्राणाः + बोधयन्तः	=	मद्गतप्राण् + आ + : + ब् + ओधयन्तः	
		=	मद्गतप्राण् + आ + **य्** + ब् + ओधयन्तः	
		=	मद्गतप्राण् + आ + ब् + ओधयन्तः	
		=	**मद्गतप्राणा बोधयन्तः**	(गी.१०.९)
७.	अन्यदेवताः + भक्ताः	=	अन्यदेवत् + आ + : + भ् + अक्ताः	
		=	अन्यदेवत् + आ + **य्** + भ् + अक्ताः	
		=	अन्यदेवत् + आ + भ् + अक्ताः	
		=	**अन्यदेवता भक्ताः**	(गी.९.२३)

८.	शूराः + मदर्थे	=	शूर् + आ + : + म् + अदर्थे	
		=	शूर् + आ + **य्** + म् + अदर्थे	
		=	शूर् + आ + म् + अदर्थे	
		=	**शूरा मदर्थे**	(गी.१.९)
९.	भीमार्जुनसमाः + युधि	=	भीमार्जुनसम् + आ + : + य् + उधि	
		=	भीमार्जुनसम् + आ + **य्** + य् + उधि	
		=	भीमार्जुनसम् + आ + य् + उधि	
		=	**भीमार्जुनसमा युधि**	(गी.१.४)
१०.	भावाः + राजसाः	=	भाव् + आ + : + र् + आजसाः	
		=	भाव् + आ + **य्** + र् + आजसाः	
		=	भाव् + आ + र् + आजसाः	
		=	**भावा राजसाः**	(गी.७.१२)
११.	कामकामाः + लभन्ते	=	कामकाम् + आ + : + ल् + अभन्ते	
		=	कामकाम् + आ + **य्** + ल् + अभन्ते	
		=	कामकाम् + आ + ल् + अभन्ते	
		=	**कामकामा लभन्ते**	(गी.९.२१)
१२.	त्रैगुण्यविषयाः + वेदाः	=	त्रैगुण्यविषय् + आ + : + व् + एदाः	
		=	त्रैगुण्यविषय् + आ + **य्** + व् + एदाः	
		=	त्रैगुण्यविषय् + आ + व् + एदाः	
		=	**त्रैगुण्यविषया वेदाः**	(गी.२.४५)
१३.	स्थिराः + हृद्याः	=	स्थिर् + आ + : + ह् + ऋद्याः	
		=	स्थिर् + आ + **य्** + ह् + ऋद्याः	
		=	स्थिर् + आ + ह् + ऋद्याः	
		=	**स्थिरा हृद्याः**	(गी.१७.८)
१४.	विमूढाः + न	=	विमूढ् + आ + : + न् + अ	
		=	विमूढ् + आ + **य्** + न् + अ	
		=	विमूढ् + आ + न् + अ	
		=	**विमूढा न**	(गी.१५.१०)

एतेषु उदाहरणेषु आकारात् परतः विसर्गः अस्ति। ततः परं मृदुव्यञ्जनानि सन्ति। एवं विसर्गस्य यकारादेशः यकारस्य लोपः च कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१. एषः + आदर्शः = एष् + अ + : + आ + दर्शः
= एष् + अ + य् + आ + दर्शः /
एष् + अ + आ + दर्शः विकल्पेन यकारस्य लोपः
= **एष आदर्शः / एषयादर्शः**

(यकारसहितं रूपं कदाचिदेव लभ्यते अतः अग्रे यकारोपेतं रूपं न लिख्यते)

२. सः + उच्यते = स् + अ + : + उ + च्यते
= स् + अ + उ + च्यते
= **स उच्यते** (गी.१४.२५)

३. सः एवायम् = स् + अ + : + ए + वायम्
= स् + अ + ए + वायम्
= **स एवायम्** (गी.८.१९)

एतेषु उदाहरणेषु 'एषः - सः' इति पदद्वये विसर्गात् परतः अकारं विहाय अन्ये स्वरवर्णाः सन्ति । अतः विसर्गस्य यकारादेशः कृतः अस्ति । विकल्पेन यकारस्य लोपः च कृतः अस्ति । अत्रपि लोपे कृते सति प्रकृतिभावः भवति ।

एतानि उदाहरणानि परिशीलयत -

१. एषः + क्रोधः = एष् + अ + : + क् + रोधः
= एष् + अ + क् + रोधः
= **एष क्रोधः** (गी.३.३७)

२. एषः + वः = एष् + अ + : + व् + अः
= एष् + अ + व् + अः
= **एष वः** (गी.३.१०)

३. एषः + ज्ञानम् = एष् + अ + : + ज्ञ् + आनम्
= एष् + अ + ज्ञ् + आनम्
= **एष ज्ञानम्** (गी.३.४०)

४. सः + गुणान् = स् + अ + : + ग् + उणान्
= स् + अ + ग् + उणान्
= **स गुणान्** (गी.१४.२६)

५. सः + घोषः = स + घोषः = **स घोषः** (गी.१.२७)

६. सः + च = स + च = **स च** (गी.१३.३)

७. सः + तया = स + तय = **स तया** (गी.७.२२)

८. सः + पश्यति = स + पश्यति = **स पश्यति** (गी.१३.२७)

९.	सः + बुद्धिमान्	=	स + बुद्धिमान्	=	**स बुद्धिमान्**	(गी.४.१८)
१०.	सः + भूयः	=	स + भूयः	=	**स भूयः**	(गी.१३.२३)
११.	सः + मन्तव्यः	=	स + मन्तव्यः	=	**स मन्तव्यः**	(गी.९.३०)
१२.	सः + याति	=	स + याति	=	**स याति**	(गी.८.१३)
१३.	सः + सर्वविद्	=	स + सर्वविद्	=	**स सर्वविद्**	(गी.१५.१९)
१४.	सः + शब्दः	=	स + शब्दः	=	**स शब्दः**	(गी.१.१३)
१५.	सः + सात्त्विकः	=	स + सात्त्विकः	=	**स सात्त्विकः**	(गी.१७.११)

एतेषु उदाहरणेषु 'एषः - सः' इति पदद्वये विसर्गात् परतः व्यञ्जनानि सन्ति। तत्र विसर्गस्य लोपः कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१.	अन्तः + राष्ट्रियः	=	अन्त् + अ + : + र् + आष्ट्रियः	
		=	अन्त् + अ + र् + आष्ट्रियः (विसर्गस्य लोपः)	
		=	अन्त् + **आ** + र् + आष्ट्रियः (पूर्वस्वरस्य दीर्घः)	
		=	अन्ता + राष्ट्रियः	= **अन्ताराष्ट्रियः**
२.	प्रातः + रम्यम्	=	प्रात् + अ + : + र् + अम्यम्	
		=	प्रात् + अ + र् + अम्यम्	
		=	प्रात् + आ + र् + अम्यम्	
		=	प्राता + रम्यम्	= **प्रातारम्यम्**
३.	निः + रोगः	=	न् + इ + : + र् + ओगः	
		=	न् + इ + र् + ओगः	
		=	न् + **ई** + र् + ओगः	
		=	नी + रोगः	= **नीरोगः**

एतेषु उदाहरणेषु अव्ययसम्बन्धिनः विसर्गात् परतः रेफः अस्ति। अतः अत्र विसर्गस्य लोपः पूर्वस्वरः दीर्घः च कृतः अस्ति।

एतानि उदाहरणानि परिशीलयत -

१.	हरिः + रक्षति	=	हर् + इ + : + र् + अक्षति	
		=	हर् + इ + र् + अक्षति	
		=	हर् + **ई** + र् + अक्षति	
		=	हरी + रक्षति	= **हरी रक्षति**

२.	प्रजापतिः रचयति	=	प्रजापत् + इ + : + र् + अचयति	
		=	प्रजापत् + इ + र् + अचयति	
		=	प्रजापत् + **ई** + **र्** + अचयति	
		=	प्रजापती + रचयति	= **प्रजापती रचयति**
३.	प्रभुः रामः	=	प्रभ् + उ + : + र् + आमः	
		=	प्रभ् + उ + र् + आमः	
		=	प्रभ् + ऊ + र् + आमः	
		=	प्रभू + रामः	= **प्रभू रामः**
४.	धेनुः + रक्षकः	=	धेन् + उ + : + र् + अक्षकः	
		=	धेन् + उ + र् + अक्षकः	
		=	धेन् + **ऊ** + **र्** + अक्षकः	
		=	धेनू + रक्षकः	= **धेनू रक्षकः**

एतेषु उदाहरणेषु अकारं विहाय अन्यस्वरात् परतः विसर्गो वर्तते। ततः परं रेफः अस्ति। अतः विसर्गस्य लोपः पूर्वस्वरः दीर्घः च कृतः अस्ति।

अवधेयम्

१. अकारात् परस्य विसर्गस्य लोपः भवति अकारं विहाय स्वरे मृदुव्यञ्जने (अशि) च परे।
२. 'एषः - सः' इति पदद्वये अकारं विहाय स्वरे परे सति विसर्गस्य यकारादेशः भवति। यकारस्य विकल्पेन लोपः च भवति।
३. 'एषः - सः' इति पदद्वये विसर्गस्य लोपः भवति व्यञ्जने परे।
४. अकारं विहाय अन्यस्मात् स्वरात् परस्य विसर्गस्य लोपः भवति रेफे परे। लोपानन्तरं पूर्वस्वरस्य दीर्घत्वं च भवति।
५. अकारात् परस्यापि अव्ययसम्बन्धिनः विसर्गस्य लोपः भवति रेफे परे। लोपानन्तरं पूर्वस्वरस्य स्थाने दीर्घस्वरादेशः भवति।

च. सन्धिं कुरुत -

१.	**देवाः + अपि**	=	**देवा अपि / देवायपि**	**(गी.११.५२)**
२.	निर्योगक्षेमः + आत्मवान्	=	------- ----------- / ---------------	(गी.२.४५)
३.	अक्षरः + इति	=	------- ----------- / ---------------	(गी.८.२१)
४.	षण्मासाः + उत्तरायणम्	=	------- ----------- / ---------------	(गी.८.२४)
५.	बहुशाखाः + ह्यनन्ताः	=	---------------- ------------------	(गी.२.४१)

६.	धार्तराष्ट्राः + रणे	=	----------------- -----------------	(गी.१.४६)
७.	आहाराः + राजसस्य	=	----------------- -----------------	(गी.१७.९)
८.	सततयुक्ताः + ये	=	----------------- -----------------	(गी.१२.१)
९.	पुण्याः + भक्ताः + राजर्षयः	=	----------- ----------- -----------	(गी.९.३३)
१०.	देहाः + नित्यस्योक्ताः	=	----------------- -----------------	(गी.२.१८)

छ. सन्धिं कुरुत -

१.	एषः + आगतः	=	------ ---------- / ------ ----------	
२.	एषः + रजोगुणसमुद्भवः	=	----------- -----------------------	(गी.३.३७)
३.	सः + मे	=	----------- -----------------------	(गी.१२.१६)
४.	सः + विस्मयाविष्टः	=	----------- -----------------------	(गी.११.१४)
५.	सः + परः	=	----------- -----------------------	(गी.८.२२)
६.	सः + हि	=	----------- -----------------------	(गी.७.१८)
७.	सः + संन्यासी	=	----------- -----------------------	(गी.६.१)
८.	सः + युक्तः	=	----------- -----------------------	(गी.४.१८)
९.	शम्भुः + रचयति	=	----------- -----------------------	
१०.	पुनः + रमते	=	----------- ----------------------	
११.	पाण्डवैः + रणनदी	=	----------- ----------------------	

➤ उकारः -

एतानि उदाहरणानि परिशीलयत -

१. नो गरीयः
= न् + अ + : + ग् + अरीयः
= न् + **अ** + **उ** + ग् + अरीयः
= न् + **ओ** + ग् + अरीयः गुणसन्धिः
= **नो गरीयः** (गी.२.६)

२. तपः + जनाः
= तप् + अ + : + ज् + अनाः
= तप् + **अ** + **उ** + ज् + अनाः
= तप् + **ओ** + ज् + अनाः गुणसन्धिः
= **तपो जनाः** (गी.१७.५)

३. आत्मभावस्थः + ज्ञानदीपेन
= आत्मभावस्थ् + अ + : + ज्ञ् + आनदीपेन
= आत्मभावस्थ् + **अ** + **उ** + ज्ञ् + आनदीपेन
= आत्मभावस्थ् + **ओ** + ज्ञ् + आनदीपेन
= **आत्मभावस्थो ज्ञानदीपेन** (गी.१०.११)

४.	शमः + दमः	=	शम् + अ + : + द् + अमः	
		=	शम् + **अ** + **उ** + द् + अमः	
		=	शम् + **ओ** + द् + अमः	गुणसन्धिः
		=	**शमो दमः**	(गी.१८.४२)
५.	युक्तः + धृत्यात्मानम्	=	**युक्तो धृत्यात्मानम्**	(गी.१८.५१)
६.	ध्यानयोगपरः + नित्यम्	=	**ध्यानयोगपरो नित्यम्**	(गी.१८.५२)
७.	शान्तः + ब्रह्मभूयाय	=	**शान्तो ब्रह्मभूयाय**	(गी.१८.५३)
८.	विजयः + भूतिः	=	**विजयो भूतिः**	(गी.१८.७८)
९.	ततः + माम्	=	**ततो माम्**	(गी.१८.५५)
१०.	कृष्णः + यत्र	=	**कृष्णो यत्र**	(गी.१८.७८)
११.	नः राज्यम्	=	**नो राज्यम्**	(गी.१.३३)
१२.	रजसः + लोभः	=	**रजसो लोभः**	(गी.१४.१७)
१३.	स्वधर्मः + विगुणः	=	**स्वधर्मो विगुणः**	(गी.१८.४७)
१४.	पितरः ह्येषाम्	=	**पितरो ह्येषाम्**	(गी.१.४२)

एतेषु उदाहरणेषु अकारात् परतः विसर्गो वर्तते। तस्मात् परतः मृदुव्यञ्जनानि सन्ति। तत्र विसर्गस्य उकारादेशः कृतः। उकारे कृते गुणसन्धिः च भवति।

एतद् उदाहरणं परिशीलयत -

१.	प्रियोऽसि	=	प्रिय् + **अ** + **:** + **अ** + सि	(गी.१८.६५)
		=	प्रिय् + **अ** + **उ** + **अ** + सि	(उकारः)
		=	प्रिय् + **ओ** + **अ** + सि	(गुणसन्धिः)
		=	प्रिय् + **ओऽ** + सि (पूर्वरूपसन्धिः) = **प्रियोऽसि**	

एतस्मिन् उदाहरणे अकारात् परतः विसर्गो विद्यते। तस्मात् परतः अकारः अस्ति। तत्र विसर्गस्य उकारादेशः कृतः। ततः परं गुणसन्धिः। तदनन्तरं पूर्वरूपसन्धिः च कृतः अस्ति।

अवधेयम्

१. अकारात् परस्य विसर्गस्य उकारादेशः भवति, ह्रस्व-अकारे मृदुव्यञ्जने (हशि) च परे। तदनन्तरं नित्यं गुणसन्धिः भवति। अकारे परे तु ततः परं पूर्वरूपसन्धिः अपि भवति।

२. निमित्ते सत्यपि अव्ययसम्बन्धिनः ऋकारान्तशब्द-सम्बोधनसम्बन्धिनः च विसर्गस्य उकारादेशः न भवति।

यथा - प्रातर् + अपि	=	प्रातरपि	स्वर् + वासी	=	स्वर्वासी
भोः भ्रातः + अत्र	=	भोः भ्रातरत्र !	हे धातः + भवान्	=	हे धातर्भवान् !

ज. सन्धिविच्छेदं कुरुत -

१.	तेजो धृतिः	=	------------- + ----------------	(गी.१८.४३)
२.	यो लोकत्रयम्	=	------------- + ----------------	(गी.१५.१७)
३.	अधो गच्छन्ति	=	------------- + ----------------	(गी.१४.१८)
४.	लुब्धो हिंसात्मकः	=	------------- + ----------------	(गी.१८.२७)
५.	श्रेयो हि	=	------------- + ----------------	(गी.१२.१२)
६.	योऽभ्यसूयति	=	------------- + ----------------	(गी.१८.६७)
७.	सोऽपि	=	------------- + ----------------	(गी.१८.७१)
८.	अनाशिनोऽप्रमेयस्य	=	------------- + ----------------	(गी.२.१८)
९.	युक्तो यया	=	------------- + ----------------	(गी.२.३९)
१०.	हतो वा	=	------------- + ----------------	(गी.२.३७)

झ. सन्धिं कुरुत -

१.	अधर्मः + अभिभवत्युत	=	-----------------------------	(गी.१.४०)
२.	नः + जयेयुः	=	-----------------------------	(गी.२.६)
३.	महतः + भयात्	=	-----------------------------	(गी.२.४०)
४.	दृष्टः + अन्तः	=	-----------------------------	(गी.२.१६)
५.	बुद्धिनाशः + बुद्धिनाशात्	=	-----------------------------	(गी.२.६३)
६.	ध्यायतः + विषयान्	=	-----------------------------	(गी.२.६२)
७.	वः + देवाः	=	-----------------------------	(गी.३.१२)
८.	शाश्वतः + अयम्	=	-----------------------------	(गी.२.२०)
९.	धृष्टद्युम्नः + विराटश्च	=	-----------------------------	(गी.१.१७)
१०.	नः + राज्येन	=	-----------------------------	(गी.१.३२)

मिश्रिताभ्यासः

ञ. यथोदाहरणं सन्धिं कुरुत -

यथा -	ततः + श्वेतैः	=	ततश्श्वेतैः	(गी.१.१४)
१.	श्वेतैः + हयैः + युक्ते	=	------------------------------------	(गी.१.१४)
२.	अस्माभिः + पापात्	=	------------------------------------	(गी.१.३९)
३.	एतैः कुलघ्नानाम्	=	------------------------------------	(गी.१.४३)
४.	दोषैः + एतैः	=	------------------------------------	(गी.१.४३)
५.	प्रपश्यद्भिः + जनार्दन	=	------------------------------------	(गी.१.३९)

६.	हृषीकेशः + देवदत्तम्	=	-----------------------------------	(गी.१.१५)
७.	श्रेयः + अनुपश्यामि	=	-----------------------------------	(गी.१.३१)
८.	सः + पुरुषः	=	-----------------------------------	(गी.२.२१)
९.	यावानर्थः + उदपाने	=	-----------------------------------	(गी.२.४६)
१०.	स्थिरबुद्धिः + असम्मूढः	=	-----------------------------------	(गी.५.२०)

ट. यथोदाहरणं सन्धिप्रक्रियां दर्शयत -

यथा - १.	**भोगाः + सुखानि**	=	**भोग् + आ + : + स् + उखानि**	
		=	भोग् + आ + : / स् + स् + उखानि	
		=	**भोगाः सुखानि / भोगास्सुखानि**	(गी.१.३३)
२.	मातुलाः + श्वशुराः	=	-----------------------------------	
		=	-----------------------------------	
		=	-------------------------- (श्चुत्वसन्धिः)	(गी.१.३४)
३.	सुखिनः स्याम	=	-----------------------------------	
		=	-----------------------------------	
		=	-----------------------------------	(गी.१.३७)
४.	उक्ताः + शरीरिणः	=	-----------------------------------	
		=	-----------------------------------	
		=	-----------------------------------	
		=	-----------------------------------	(गी.२. १८)
५.	कैः + मया	=	क् + ऐ + : + म् + अया	
		=	क् + ऐ + र् + म् + अया	
		=	**कैर्मया**	(गी.१.२२)
६.	मृत्युः + ध्रुवम्	=	---------------------------------	
		=	---------------------------------	
		=	---------------------------------	(गी.२.२७)
७.	विदुः + युक्तचेतसः	=	---------------------------------	
		=	---------------------------------	
		=	---------------------------------	(गी.७.३०)
८.	कर्मफलहेतुः + भूः	=	---------------------------------	
		=	---------------------------------	

= -------------------------------- (गी.२.४७)

९. विषयाः + विनिवर्तन्ते = विषय् + आ + : + व् + इनिवर्तन्ते

= विषय् + आ + व् + इनिवर्तन्ते

= **विषया विनिवर्तन्ते** (गी.२.५९)

१०. व्यवसिताः + वयम् = --

= --

= -- (गी.१.४५)

११. धार्तराष्ट्राः + रणे = --

= --

= -- (गी.१.४६)

१२. आपन्नाः + मूढाः = --

= --

= -- (गी.१६.२०)

१३. पर्जन्यः + यज्ञः = पर्जन्य् + अ + : + य् + अज्ञः

= पर्जन्य् + **अ** + **उ** + य् + अज्ञः

= पर्जन्य् + **ओ** + य् + अज्ञः

= **पर्जन्यो यज्ञः** (गी.३.१४)

१४. यः भुङ्क्ते = --------------------------------------

= --------------------------------------

= -------------------------------------- (गी.३.१२)

= --------------------------------------

१५. परयाविष्टः + विषीदन् = --------------------------------------

= --------------------------------------

= --------------------------------------

= -------------------------------------- (गी.१.२८)

ठ. मञ्जूषायां दत्तानां पदानां सन्धिविच्छेदं कृत्वा यथोदाहरणं लिखत -

१. **द्रुपदो द्रौपदेयाः** (गी.१.१८)	२. **स जीवति** (गी.३.१६)	३. **अपायिनोऽनित्याः** (गी.२.१४)
४. **हन्युस्तन्मे** (गी.१.४६)	५. **जातिधर्मा कुलधर्माश्च** (गी.१.४३)	६. **सेनयोरुभयोरपि** (गी.१.२७)
७. **अवस्थिताः प्रमुखे** (गी.२.६)	८. **बुद्धिरयुक्तस्य** (गी.२.६६)	९. **बुद्धिर्जनार्दन** (गी.३.१)
१०. **यस्त्वात्मरतिः** (गी.३.१७)	११. **स शब्दस्तुमुलोऽभवत्** (गी.१.१३)	१२. **स कौन्तेयः** (गी.१.२७)

यथा - १. द्रुपदः + द्रौपदेयाः

२. ----------- + ---------------

३. ----------- + ---------------

४. ----------- + ---------------

५. --------- + ----------- + ---

६. --------- + ----------- + ---

७. ----------- + ------------------

८. ------------ + -----------------

९. ------------ + -----------------

१०. --- + ----- + ----------------

११. --- + ------ + ------- + -------

१२. ----------- + ----------------

ड. यथोदाहरणं पदच्छेदं सन्धिविच्छेदं च कृत्वा वाक्यानि पुनः लिखत -

यथा - १. बहवो ज्ञानतपसा पूता मद्भावमागताः । (गी.४.१०)

बहवः ज्ञानतपसा पूताः मद्भावम् आगताः ।

२. इति मां योऽभिजानाति कर्मभिर्न स बध्यते । (गी.४.१४)

----

३. द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । (गी.४.२८)

----

४. एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे । (गी.४.३२)

----

५. यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम । (गी.११.१)

----

६. योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः । (गी.५.२४)

----

७. सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते । (गी.१३.२३)

----

८. अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च । (गी.१४.१३)

----

९. कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो । (गी.१४.२१)

----

१०. अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । (गी.१५.२)

ढ. पदच्छेदं सन्धिच्छेदं च कृत्वा श्लोकान् पुनः लिखत -

१. यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ (गी.१८.१७)

----

२. आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ (गी.१६.१५)

----

३. ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ (गी.१३.४)

----

४. यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ (गी.९.६)

****

सुराज्यं खलु युधिष्ठिरराज्यम्

समासः ५



एतं युधिष्ठिरराज्यमहिमवर्णनप्रसङ्गं सावधानं पठत -

लोकानुरागी युधिष्ठिरः **अत्यन्तोत्साहेन राष्ट्ररञ्जने** प्रवृत्तः अभवत्। **कर्तव्यपरायणः** सः स्वल्पेन कालेन एव राज्यम् **उन्नतिशिखरं** नीतवान्। **युधिष्ठिरराज्यम् आदर्शराज्यम्** अभवत्। स्वयं यथा युधिष्ठिरः **संयमशीलः, सदाचारी धर्मनिष्ठः** च आसीत् तथैव तस्य प्रजाः अपि आसान्। सर्वे **युधिष्ठिरगुणानुवादं** कुर्वन्तः **तच्चरणचिह्नम्** अनुसरन्तः आसन्।

युधिष्ठिरस्य **प्रीत्यर्थं** सर्वे **नियमसंयमैः** स्व-**स्वकर्तव्यपालनं** कुर्वन्ति स्म। सर्वे परस्परं **बन्धुभावेन** प्रेम्णा तिष्ठन्ति स्म। केषाञ्चित् अपि कैश्चित् सह **ईर्ष्याद्वेषौ** न आस्ताम्। केषाञ्चित् अपि कैश्चित् सह **दुर्व्यवहारः** न दृश्यते स्म। **रोगशोकौ** लेशमात्रेण अपि न आस्ताम्। **त्रिविधतापाः** कान् अपि न बाधन्ते स्म। जनाः **हृष्टपुष्टाः शोकरहिताः दीर्घजीविनः** च आसन्। सर्वे आनन्देन जीवन्ति स्म। कस्यापि **अकालमृत्युः** न भवति स्म। राज्ये कुत्रापि कलहः कोलाहलः उपद्रवः **स्वेच्छाचारः** वा न दृश्यते स्म।

युधिष्ठिरः **राष्ट्रियचरित्रस्य मर्यादास्थापनं** कृत्वा **सर्वोन्नतिद्वारम्** उद्घाटितवान्। तेन **राष्ट्रशक्तेः सम्पत्सभ्यतयोः** च **प्रतिदिनम्** उन्नतिः भवति स्म। जनाः बहूनि वर्षाणि यावत् **युधिष्ठिरप्रतिष्ठापितस्य** सुराज्यस्य **सुखवैभवं** भुञ्जानाः आसन्। अन्ततः युधिष्ठिरः **स्वजीवनकाले** अनेकानि **लोकोपयोगीनि** कार्याणि कृतवान्। एभिः अस्य महिमा **अखिलविश्वे** परिव्याप्तः जातः।

(क) अस्यां कथायां स्थूलाक्षरैः मुद्रितानि पदानि अत्र संगृह्णीत -

लोकानुरागी	-------------------	-------------------	-------------------
-------------------	-------------------	-------------------	-------------------
-------------------	-------------------	-------------------	-------------------

------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	

(ख) अधः दत्तानां विग्रहाणाम् उचितानि समस्तपदानि पाठात् चित्वा लिखत -

यथा - युधिष्ठिरस्य राज्यम् — युधिष्ठिरराज्यम्

१. लोके अनुरागी ------------------------------------ ।

२. राष्ट्रस्य रञ्जनम्, तस्मिन् ------------------------------------ ।

३. कर्तव्ये परायणः ------------------------------------ ।

४. उन्नतेः शिखरः, तम् ------------------------------------ ।

५. युधिष्ठिरगुणानाम् अनुवादः, तम् ------------------------------------ ।

६. तस्य चरणचिह्नम् ------------------------------------ ।

७. प्रीत्यै इदम् ------------------------------------ ।

८. रोगः च शोकः च ------------------------------------ ।

९. त्रिविधाः तापाः ------------------------------------ ।

१०. शोकेन रहिताः ------------------------------------ ।

११. स्वेच्छया आचारः ------------------------------------ ।

१२. मर्यादायाः स्थापनम् ------------------------------------ ।

१३. राष्ट्रस्य शक्तिः, तस्याः ------------------------------------ ।

१४. स्वस्य जीवनकालः, तस्मिन् ------------------------------------ ।

१५. अखिलं विश्वम्, तस्मिन् ------------------------------------ ।

(ग) पाठं पठित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि यथोदाहरणं लिखत -

यथा - युधिष्ठिरः कस्मिन् प्रवृत्तः अभवत् ?
युधिष्ठिरः राष्ट्ररञ्जने प्रवृत्तः अभवत् ।

१. युधिष्ठिरः स्वल्पकालेन एव राज्यं कुत्र नीतवान् ?

-- ।

२. युधिष्ठिरराज्यं कीदृशं राज्यम् अभवत् ?

-- ।

३. युधिष्ठिरः कीदृशः आसीत् ?

-- ।

४. युधिष्ठिरराज्ये प्रजाजनाः कस्य चरणचिह्नम् अनुसरन्तः आसन् ?

-- ।

५. सर्वे किं कुर्वन्ति स्म ?

-- ।

६. युधिष्ठिरराज्ये सर्वे परस्परं कथं तिष्ठन्ति स्म ?

-- ।

७. युधिष्ठिरराज्ये कौ लेशमात्रेण अपि न आस्ताम् ?

-- ।

८. युधिष्ठिरराज्ये कुत्रापि किं किं न दृश्यते स्म ?

-- ।

९. युधिष्ठिरः स्वजीवनकाले कानि कृतवान् ?

-- ।

१०. कस्य महिमा अखिलविश्वे परिव्याप्तः जातः ?

-- ।

अधस्तनानि गीतावाक्यानि पठित्वा तत्र स्थूलाक्षरैः मुद्रितानि पदानि सावधानं परिशीलयत -

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । (गी.१.१)
अत्र शूरा **महेष्वासा भीमार्जुनसमा** युधि । (गी.१.४)
अन्ये च बहवः शूरा मदर्थे **त्यक्तजीविताः** ।
नानाशस्त्रप्रहरणाः सर्वे **युद्धविशारदाः** ॥ (गी.१.९)
युधामन्युश्च विक्रान्त **उत्तमौजाश्च वीर्यवान्** । (गी.१.६)
अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् **कपिध्वजः** । (गी.१.२०)
हृषीकेशं तदा वाक्यमिदमाह **महीपते** । (गी.१.२१)
कुलक्षये प्रणश्यन्ति **कुलधर्माः** सनातनाः । (गी.१.४०)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि समाससहितानि सन्ति। तेषां विग्रहः एवं भवति -

धर्मक्षेत्रे	-	धर्मस्य क्षेत्रम् धर्मक्षेत्रम्, तस्मिन् (षष्ठीतत्पुरुषः)।
कुरुक्षेत्रे	-	कुरूणां क्षेत्रम् कुरुक्षेत्रम्, तस्मिन् (षष्ठीतत्पुरुषः)।
महेष्वासाः	-	महान् इष्वासः येषां ते महेष्वासाः (बहुव्रीहिः)।
भीमार्जुनौ	-	भीमः च अर्जुनः च भीमार्जुनौ (इतरेतरद्वन्द्वः)।
त्यक्तजीविताः	-	त्यक्तं जीवितं यैः ते त्यक्तजीविताः (बहुव्रीहिः)।
नानाशस्त्रप्रहरणाः		नानाशस्त्राणि प्रहरणानि येषां ते नानाशस्त्रप्रहरणाः (बहुव्रीहिः)।
युद्धविशारदाः	-	युद्धे विशारदाः युद्धविशारदाः (सप्तमीतत्पुरुषः)।
उत्तमौजाः	-	उत्तमम् ओजः यस्य सः उत्तमौजाः (बहुव्रीहिः)।
कपिध्वजः		कपिः ध्वजे यस्य सः कपिध्वजः (बहुव्रीहिः)।
हृषीकेशः		हृषीकाणाम् ईशः हृषीकेशः (षष्ठीतत्पुरुषः)।
महीपते	-	मह्याः पतिः महीपतिः, तत्सम्बुद्धौ महीपते (षष्ठीतत्पुरुषः)।
कुलक्षये		कुलस्य क्षयः कुलक्षयः तस्मिन् कुलक्षये (षष्ठीतत्पुरुषः)।
कुलधर्माः	-	कुलस्य धर्माः कुलधर्माः (षष्ठीतत्पुरुषः)।

समासः

समसनं (एकपदीभवनम्) समासः।

यदा पदद्वयम् अथवा इतोऽपि अधिकानि पदानि परस्परं मिलित्वा एकपदत्वं प्राप्नुवन्ति तदा सः '**समासः**' इति कथ्यते। समासकरणेन बहुभिः पदैः वक्तुं योग्यः अर्थः एकपदेन वक्तुं शक्यते।

एतत् वाक्यद्वयं परिशीलयत -

युधिष्ठिरः च भीमः च अर्जुनः च नकुलः च सहदेवः च पाण्डवाः।
युधिष्ठिरभीमार्जुननकुलसहदेवाः पाण्डवाः।

प्रथमवाक्ये वर्तमानानि युधिष्ठिरः, भीमः, अर्जुनः, नकुलः, सहदेवः इत्येतानि पदानि एव संयोज्य युधिष्ठिरभीमार्जुननकुलसहदेवाः एकपदत्वेन प्रयोगः कृतः। अतः अत्र समासः इति व्यवहारः। **युधिष्ठिरः, भीमः, अर्जुनः, नकुलः, सहदेवः** इति **व्यस्तप्रयोगः**। **युधिष्ठिरभीमार्जुननकुलसहदेवाः** इति **समस्तप्रयोगः**।

समासानां विषये अधिकज्ञानाय आदौ ज्ञातव्याः केचन अंशाः -

❖ **द्वयोः सुबन्तयोः अथवा बहूनां सुबन्तानां समासः भवति। तिङन्तयोः तिङन्तानां वा समासः तु न भवति। यथा -**

१. पाण्डवानाम् अनीकम् - पाण्डवानीकम्। (गी.१.२)
२. भीष्मः च द्रोणः च कृपः च विदुरः च - भीष्मद्रोणकृपविदुराः।

❖ **परस्परम् अन्वितयोः सुबन्तयोः एव समासः भवति। यत्र परस्परान्वयः नास्ति तत्र समासः न भवति। यथा -**

१. धर्मस्य क्षेत्रम् - धर्मक्षेत्रम्। अत्र द्वयोः पदयोः परस्परान्वयः अस्ति। अतः तयोः समासः कृतः अस्ति।

२. सम्मोहः भवति अर्जुनस्य, पुत्रः राधायाः कर्णः। (अर्जुनस्य सम्मोहः भवति, राधायाः पुत्रः कर्णः अस्तिः इति भावः)

अत्र अर्जुनस्य अन्वयः सम्मोहे, पुत्रस्य अन्वयः राधायाम्। अर्जुनशब्दस्य पुत्रशब्दस्य च परस्परम् अन्वयः नास्ति। अतः तयोः समासः न भवति।

❖ **समासे पूर्वं यत् पदम् अस्ति तस्य पूर्वपदम् इति, अनन्तरं यत् पदम् अस्ति तस्य उत्तरपदम् इति व्यवहारः भवति। यथा -**

अर्जुनस्य विषादः - अर्जुनविषादः। अत्र अर्जुनः इति पूर्वपदम्। विषादः इति उत्तरपदम्।

विग्रहः -

समासस्य अर्थस्य विवरणं कर्तुं यत् वाक्यं प्रयुज्यते तत् विग्रहवाक्यम् इति उच्यते। यथा -

समस्तपदम् - पाण्डुपुत्राः। **विग्रहवाक्यम्** - पाण्डोः पुत्राः।

विग्रहः द्विधा भवति -

१. **स्वपदविग्रहः** - यत्र समासस्य अर्थः समासघटकैः पदैः वर्ण्यते तत्र स्वपदविग्रहः भवति। स्वम् अर्थात् समस्यमानं पदम्, समस्यमानपदैः विग्रहः स्वपदविग्रहः इति।

यथा - **ग्रामगतः** इति समासः।

ग्रामं गतः इति **स्वपदविग्रहः**। अत्र समस्तपदस्य विग्रहं कर्तुम् अन्यस्य पदस्य साहाय्यं न स्वीकृतम्। '**ग्राम, गत**' इति समस्यमानपद्वयम् आधारीकृत्य एव विग्रहः कृतः वर्तते।

२. **अस्वपदविग्रहः** - यत्र समासस्य अर्थः समासघटकपदानि विहाय अन्यैः पदैः यदा वर्ण्यते तदा **अस्वपदविग्रहः** भवति। अर्थात् 'समस्यमानपदरहितं विग्रहवाक्यम् अस्वपदविग्रहः' इति। नित्यसमासे अस्वपदविग्रहः क्रियते। यथा - **उपकृष्णम्** इति समस्तपदम्। **कृष्णस्य समीपम्** इति **अस्वपदविग्रहः**। अत्र समीपम् इति पदं समस्यमानं पदम् न अस्ति, किन्तु विग्रहे प्रयुक्तम् अस्ति। अत्र विग्रहकरणाय अन्यत् पदं ('समीपम्' इति) स्वीकृतम् अस्ति अतः अयं विग्रहः अस्वपदविग्रहः इति कथ्यते।

'पाण्डोः पुत्रा' इति अत्र विग्रहवाक्ये 'पाण्डोः' इत्यत्र षष्ठीविभक्तिः, 'पुत्राः' इत्यत्र प्रथमाविभक्तिः च श्रूयते। समासः यदा क्रियते तदा तयोः द्वयोः अपि विभक्त्योः लोपः भवति। तदा 'पाण्डुपुत्र' इति शब्दः सिद्धः भवति। समस्तं तत् पदं प्रातिपदिकं भवति। तदनन्तरं तस्मात् प्रातिपदिकात् परे सुबादिप्रत्ययाः विधीयन्ते।

यथा - पाण्डु + ङस्, पुत्र + जस्। पाण्डु - पूर्वपदम्, ङस् - षष्ठी-एकवचनप्रत्ययः। पुत्र - उत्तरपदम्, जस् - प्रथमाबहुवचनप्रत्ययः। पाण्डु + पुत्र = पाण्डुपुत्र। पाण्डुपुत्र + जस् = पाण्डुपुत्राः।

समासभेदाः

समासे पूर्वपदस्य उत्तरपदस्य च कश्चन अर्थः भवति । तत्र कदाचित् पूर्वपदार्थस्य प्राधान्यं भवति, कदाचित् उत्तरपदार्थस्य प्राधान्यं भवति, कदाचित् द्वयोः अपि पदार्थयोः प्राधान्यं भवति । पुनः कदाचित् द्वयोः अपि पदार्थयोः प्राधान्यं न भवति । तत्र अन्यस्य एव पदार्थस्य प्राधान्यं भवति । पदार्थप्राधान्येन समासः चतुर्धा विभक्तः अस्ति -

१. पूर्वपदार्थप्रधानः - अव्ययीभावः । **२. उत्तरपदार्थप्रधानः - तत्पुरुषः ।**

३. उभयपदार्थप्रधानः - द्वन्द्वः । **४. अन्यपदार्थप्रधानः - बहुव्रीहिः ।**

समस्तपदे पूर्वोत्तरपदार्थयोः कतरः पदार्थः प्रधानः इति अवगन्तुं यत्किञ्चित् क्रियापदं स्वीकर्तव्यम् । ततः क्रियया सह कस्य अन्वयः भवति इति परिशीलनीयम् । यस्य पदार्थस्य क्रियायाम् अन्वयः भवति तस्य प्राधान्यम् । यस्य अन्वयः न भवति तस्य अप्राधान्यम् इति निर्णयः । यथा - कुन्तीपुत्रः युध्यते ।

अत्र '**कुन्तीपुत्रः**' इत्यस्य समस्तपदस्य '**कुन्त्याः पुत्रः**' इति विग्रहवाक्यम् । **कुन्ती** इति पूर्वपदम् । **पुत्रः** इति उत्तरपदम् । अत्र युद्धक्रियायां **पुत्रः** इति उत्तरपदस्य अर्थः एव अन्वितः भवति, न तु **कुन्ती** इति पूर्वपदस्य अर्थः । (युद्धं कुन्त्याः पुत्रः अर्जुनः भीमः वा करोति, न तु कुन्ती इति ज्ञायते एव) एवम् अत्र उत्तरपदार्थः प्रधानः इति निर्णयः । एवम् अन्यानि अपि उदाहरणानि ज्ञातव्यानि ।

अधः प्रदत्तान् गीताश्लोकान् सावधानं परिशीलयत-

पश्यैतां **पाण्डुपुत्राणामाचार्य** महतीं चमूम् ।
व्यूढां **द्रुपदपुत्रेण** तव शिष्येण धीमता ॥ (गी.१.३)

अस्माकं तु विशिष्टा ये तान्निबोध **द्विजोत्तम** ।
नायका मम सैन्यस्य **सञ्ज्ञार्थं** तान्ब्रवीमि ते ॥ (गी.१.७)

क्रोधाद्भवति सम्मोहः सम्मोहात्**स्मृतिविभ्रमः** ।
स्मृतिभ्रंशाद् **बुद्धिनाशो** बुद्धिनाशात्प्रणश्यति ॥ (गी.२.६३)

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ (गी.२.६४)

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ (गी.१७.१३)

(घ) अधः लिखितानां विग्रहवाक्याणाम् उचितानि समस्तपदानि उपरि प्रदत्तेभ्यः गीताश्लोकेभ्यः चित्वा यथोदाहरणं लिखत -

यथा - पाण्डोः पुत्राः, तेषाम् - पाण्डुपुत्राणाम् ।

१. द्रुपदस्य पुत्रः, तेन - -- ।
२. द्विजेषु उत्तमः (सम्बो.) - -- ।
३. संज्ञायै इदम् - -- ।
४. स्मृतेः विभ्रमः - -- ।

५. बुद्धेः नाशः - -- ।

६. रागः च द्वेषः च - रागद्वेषौ ताभ्यां रागद्वेषाभ्याम् - -- ।
रागद्वेषाभ्यां वियुक्ताः, तैः

७. आत्मनः वश्यानि, तैः - -- ।

८. विधेयः आत्मा यस्य सः - -- ।

९. विधिना हीनः, तम् - -- ।

१०. मन्त्रैः हीनः, तम् - -- ।

११. श्रद्धया विरहितः, तम् - -- ।

ज्ञानवर्धिनी

द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत्पुरुष कर्म धारय येनाहं स्यां बहुव्रीहिः ॥

कस्यचित् महाराजस्य सभां गत्वा कश्चन कविः एवं प्रार्थितवान् । अस्य अर्थः एवम् अस्ति - महाराज ! अहं द्वन्द्वः अस्मि (अहं मम पत्नी च), अहं द्विगुः अस्मि (मम सविधे गोद्वयम् अस्ति), मम गृहे नित्यम् अव्ययीभावः भवति (व्ययं कर्तुं धनमेव न भवति), तत्पुरुष ! (हे राजन्) कर्म धारय (कार्यं ददातु) येन अहं बहुव्रीहिः (बहुधान्यसम्पन्नः) स्याम् ।

तस्य कवेः अस्यां प्रार्थनायां सर्वाणि अपि समासनामानि चमत्कारिकतया निबद्धानि सन्ति ।

****

यथाभागम् अवस्थिताः

एतान् श्लोकान् सावधानं पठत -

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ गी.१.११ ॥

पदच्छेदः - अयनेषु, च, सर्वेषु, **यथाभागम्**, अवस्थिताः ।
भीष्मम्, एव, अभिरक्षन्तु, भवन्तः, सर्वे, एव, हि ॥
समस्तपदविग्रहः - भागम् अनतिक्रम्य = यथाभागम् ।

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ गी.३.३० ॥

पदच्छेदः - मयि, सर्वाणि, कर्माणि, संन्यस्य, **अध्यात्मचेतसा** ।
निराशीः, निर्ममः, भूत्वा, युध्यस्व, विगतज्वरः ॥
समस्तपदविग्रहः - आत्मनि इति = अध्यात्मम्

सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ गी.६.२१ ॥

पदच्छेदः - सुखम्, आत्यन्तिकम्, यत्, तत्, बुद्धिग्राह्यम्, **अतीन्द्रियम्** ।
वेत्ति, यत्र, न, च, एव, अयम्, स्थितः, चलति, तत्त्वतः ॥
समस्तपदविग्रहः - इन्द्रियम् अतिक्रान्तम् = अतीन्द्रियम् ।

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ गी.८.४ ॥

पदच्छेदः - **अधिभूतम्**, क्षरः, भावः, पुरुषः, च, **अधिदैवतम्** ।
अधियज्ञः, अहम्, एव, अत्र, देहे, देहभृताम्, वर ॥
समस्तपदविग्रहः - भूतेषु इति = अधिभूतम्
दैवतेषु इति = अधिदैवतम्

अभ्यासः

(क) यथोदाहरणं प्रदत्तानां पदानां विग्रहवाक्याणि लिखत -

यथा - यथाभागम् - भागम् अनतिक्रम्य ।

१. अध्यात्मम् - ------------------------------------ ।
२. अतीन्द्रियम् - ------------------------------------ ।
३. अधिभूतम् - ------------------------------------ ।
४. अधिदैवतम् - ------------------------------------ ।

अधो लिखितानि गीतावाक्यानि परिशीलयत -

१. किं तद्ब्रह्म किम**ध्यात्मं** किं कर्म पुरुषोत्तम । (गी.८.१)

२. **अधिभूतं** च किं **प्रोक्तमधिदैवं** किमुच्यते । (गी.८.१)

३. ये तु धर्म्यामृतमिदं **यथोक्तं** पर्युपासते । (गी.१२.२०)

४. **अध्यात्मज्ञाननित्यत्वं** तत्त्वज्ञानार्थदर्शनम् । (गी.१३.११)

(ख) उपरिस्थूलाक्षरैः अङ्कितानिपदानिअव्ययीभावसमासयुक्तानिसन्ति। अधःतेषांविग्रहवाक्याणि दृष्ट्वा उचितानि समस्तपदानि लिखत -

१. आत्मनि इति - -- ।

२. भूतेषु इति - -- ।

३. दैवेषु इति - -- ।

४. उक्तम् अनतिक्रम्य - -- ।

अव्ययीभावः -

प्रायः **पूर्वपदार्थप्रधानः अव्ययीभावः** । अर्थात् यस्मिन् समासे पूर्वपदार्थस्य प्रधानता भवति सः '**अव्ययीभावसमासः**' इति उच्यते । अधः तालिकायां प्रदत्तानि अव्ययीभावसमासस्य उदाहरणानि सावधानं पठत अवगच्छत च -

नाम	विग्रहः	समासः
समीपार्थकः	कृष्णस्य समीपम्	उपकृष्णम्
अभावार्थकः	शस्त्राणाम् अभावः	निश्शस्त्रम्
योग्यतार्थकः	रूपस्य योग्यम्	अनुरूपम्
वीप्सार्थकः	दिनं दिनं प्रति	प्रतिदिनम्
पदार्थानतिवृत्त्यर्थकः	शक्तिम् अनतिक्रम्य	यथाशक्ति
मर्यादार्थकः	आ हिमालयात्	आहिमालयम्
अभिविध्यर्थकः	आ बालेभ्यः	आबालम्
आभिमुख्यार्थकः	अग्निम् अभि	अभ्यग्नि
मात्रार्थकः	शाकस्य लेशः	शाकप्रति
अवधारणार्थकः	यावन्तः सैनिकाः	यावत्सैनिकम्

पारेशब्दयुक्तः	पारे समुद्रस्य	पारेसमुद्रम्
मध्येशब्दयुक्तः	मध्ये हस्तिनापुरस्य	मध्येहस्तिनापुरम्

अव्ययीभावसमासस्य नियमाः

- अव्ययीभावसमासे अकारान्तस्य आकारान्तस्य वा शब्दस्य अकारान्त-नपुंसक-लिङ्गशब्दस्य प्रथमाविभक्तेः एकवचनान्तं रूपम् इव भवति। यथा - कृष्णस्य समीपम् = उपकृष्णम्। शालायाः समीपम् = उपशालम्।
- अव्ययीभावसमासे इकारान्तस्य ईकारान्तस्य वा शब्दस्य वारिशब्दस्य प्रथमाविभक्तेः एकवचनान्तं रूपम् इव भवति। यथा - शक्तिम् अनतिक्रम्य = यथाशक्ति। आद्वारिकानगर्याः = आद्वारिकानगरि।
- अव्ययीभावसमासे उकारान्तस्य, ऊकारान्तस्य, ओकारान्तस्य, औकारान्तस्य वा शब्दस्य रूपाणि मधुशब्दस्य प्रथमाविभक्तेः एकवचनान्तरूपम् इव भवति। यथा - वस्तूनाम् अभावः = निर्वस्तु। चमूं चमूं प्रति = प्रतिचमु। गोः समीपम् = उपगु।
- अव्ययीभावसमासे ऋकारान्तानां शब्दानां च रूपाणि ऋकारान्त-नपुंसक-लिङ्गकस्य शबदस्य प्रथमाविभक्तेः एकवचनान्तं रूपम् इव भवति। यथा - योद्धारं योद्धारं प्रति = प्रतियोद्धृ।
  (सर्वाणि अपि अव्ययीभाव-समासयुक्तानि पदानि अव्ययानि भवन्ति। तेन सर्वासु विभक्तिषु प्रायेण तेषां रूपाणि समानानि एव भवन्ति)
- अव्ययीभावसमासे अन्नन्तः शब्दः समासान्त-टच्-प्रत्ययं प्राप्नोति। यदि शब्दः नपुंसकलिङ्गे भवति तर्हि विकल्पेन टच्-प्रत्ययं प्राप्नोति। टच्-प्रत्ययान्तः अयम् अन्नन्तः शब्दः अकारान्त-नपुंसकलिङ्गस्य प्रथमाविभक्तेः एकवचनान्तम् इव भवति। यथा - आत्मनि इति = अध्यात्मम्। कर्माणि अनतिक्रम्य = यथाकर्मम्/ यथाकर्म।

(ग) उपर्युक्तान् नियमान् पठित्वा यथोदाहरणं प्रदत्तानां पदानां विग्रहवाक्यानि लिखत -

यथा - उपकृष्णम् - कृष्णस्य समीपम्।

१. उपशालम् - ----------------------------------।
२. यथाशक्ति - ----------------------------------।
३. आद्वारिकानगरि - ----------------------------------।
४. निर्वस्तु - ----------------------------------।
५. प्रतिचमु ----------------------------------।
६. उपगु - ----------------------------------।
७. प्रतियोद्धृ - ----------------------------------।
८. अध्यात्मम् - ----------------------------------।
९. यथाकर्म ----------------------------------।

अव्ययीभावसमासस्य भेदाः

विभक्त्यर्थादिषु वर्तमानम् अव्ययं सुबन्तेन समस्यते। एषः अव्ययीभावः त्रिधा भवति।

१. अव्ययपूर्वपदः २. अव्ययोत्तरपदः ३. अव्ययपदरहितः

अत्र अधिहरि इत्यारभ्य यावन्नामम् इति पर्यन्तं नित्यसमासः। शाकप्रति इत्यपि नित्यसमासः। अतः एषु अस्वपदविग्रहः प्रदर्शितः। अन्यत्र तु विकल्पेन भवति।

१. अव्ययपूर्वपदः -

- **विभक्त्यर्थे** - हरौ इति = अधिहरि।
- **समीपार्थे** - कृष्णस्य समीपम् = उपकृष्णम्
- **समृद्ध्यर्थे** - मद्राणां समृद्धिः = सुमद्रम्
- **व्यृद्ध्यर्थे** - यवनानां व्यृद्धिः = दुर्यवनम् (व्यृद्धिः अर्थात् विगता ऋद्धिः)
- **अर्थाभावार्थे** - शस्त्राणाम् अभावः = निश्शस्त्रम्
- **अत्ययार्थे** - सैन्यस्य अत्ययः = अतिसैन्यम् (अत्ययः अर्थात् ध्वंसः)
- **असम्प्रत्यर्थे** - युद्धं सम्प्रति न युज्यते = अतियुद्धम्
- **शब्दप्रादुर्भावार्थे** - हरिशब्दस्य प्रकाशः = इतिहरि
- **पश्चादर्थे** - भीष्मस्य पश्चात् = अनुभीष्मम्
- **यथार्थश्चतुर्धा** -
  १. **योग्यतार्थे** - राज्यस्य योग्यम् = अनुराज्यम्
  २. **वीप्सार्थे** - रथं रथं प्रति = प्रतिरथम्
  ३. **पदार्थानतिवृत्त्यर्थे** - शक्तिम् अनतिक्रम्य = यथाशक्ति
  ४. **सादृश्यार्थे** - भीमस्य सादृश्यम् = सभीमम्
- **आनुपूर्व्यार्थे** - ज्येष्ठस्य आनुपूर्व्येण = अनुज्येष्ठम्
- **यौगपद्यार्थे** - चक्रेण युगपत् = सचक्रम्
- **सादृश्यार्थे** - शस्त्रेण सदृशः = सशस्त्रम्
- **सम्पत्त्यर्थे** - क्षत्राणां सम्पत्तिः = सक्षत्रम्
- **साकल्यार्थे** - तृणम् अपि अपरित्यज्य = सतृणम् (अत्ति)
- **अन्तार्थे** - गीताग्रन्थपर्यन्तम् (अधीते) = सगीतम्
- **अवधारणार्थे** - यावन्ति नामानि (तावन्तः अच्युतप्रणामाः) = यावन्नामम्।
- **मर्यादार्थे** - आ हिमालयात् = आहिमालयम् (मर्यादा अर्थात् तेन विना)
- **अभिविध्यर्थे** - आ हिमालयात् = आहिमालयम् (भारतदेशः) (अभिविधिः = तेन सह)
- **आभिमुख्यार्थे** - अग्निं प्रति = प्रत्यग्नि

२. **अव्ययोत्तरपदः अव्ययीभावः**

- **मात्रार्थे** - शाकस्य लेशः = शाकप्रति

३. **अव्ययपदरहितः अव्ययीभावः**

- **तिष्ठद्गुप्रभृतयः** - तिष्ठन्ति गावः यस्मिन् काले = तिष्ठद्गु
  आयत्यः गावः यस्मिन् काले = आयतीगवम्
- **पारेशब्दयुक्तः** - गङ्गायाः पारे = पारेगङ्गम्
- **मध्येशब्दयुक्तः** - युद्धस्य मध्ये = मध्येयुद्धम्

(घ) दत्तानां विग्रहवाक्याणाम् आधारेण समस्तपदानि लिखत -

१. कुरुक्षेत्रस्य समीपम् (उप) -------------------------------- ।
२. यज्ञशालायाः समीपम् (उप) -------------------------------- ।
३. कपटस्य अभावः (निर्) -------------------------------- ।
४. मत्याः योग्यम् (अनु) -------------------------------- ।
५. पारे गङ्गायाः -------------------------------- ।
६. मध्ये युद्धक्षेत्रस्य -------------------------------- ।
७. कृष्णम् अभि -------------------------------- ।
८. आ युद्धक्षेत्रात् -------------------------------- ।
९. आ हस्तिनापुरात् -------------------------------- ।
१०. आज्ञाम् अनतिक्रम्य (यथा) -------------------------------- ।
११. नीतिम् अनतिक्रम्य (यथा) -------------------------------- ।
१२. वीथीं वीथीं प्रति -------------------------------- ।
१३. बन्धूनां समीपम् (उप) -------------------------------- ।
१४. कुन्त्याः समीपम् (उप) -------------------------------- ।
१५. विधातुः समीपम् (उप) -------------------------------- ।
१६. सभां सभां प्रति -------------------------------- ।
१७. दध्नः अभावः (निर्) -------------------------------- ।
१८. द्रौपद्याः योग्यम् (अनु) -------------------------------- ।
१९. सूचनाम् अनतिक्रम्य (यथा) -------------------------------- ।
२०. मध्ये सभायाः -------------------------------- ।
२१. रथम् अभि -------------------------------- ।

(ङ) अधः लिखितानां पदानां विग्रहवाक्याणि समस्तपदानि वा लिखत -

१.	शक्तिम् अनतिक्रम्य	=	यथाशक्ति।
२.	--------------------------------------	=	यथाकालम्।
३.	--------------------------------------	=	यथावसरम्।
४.	एकम् एकं प्रति	=	--------------।
५.	--------------------------------------	=	प्रतिदिनम्।
६.	गृहात् पश्चात् इति	=	--------------।
७.	--------------------------------------	=	अनुशिक्षकम्।
८.	गन्धानाम् अभावः	=	--------------।
९.	--------------------------------------	=	निष्कण्टकम्।
१०.	गृहस्य समीपम्	=	--------------।
११.	------------------------------------	=	उपवनम्।
१२.	अश्वस्य समीपम्	=	--------------।
१३.	गुणस्य योग्यम्	=	--------------।
१४.	------------------------------------	=	अनुरागम्।
१५.	शैत्यस्य अत्ययः	=	--------------।

(च) कोष्ठके प्रदत्तस्य विग्रहवाक्यस्य समस्तपदेन रिक्तस्थानं यथोदाहरणं पूरयत -

यथा - व्यासः भगवद्गीतां मध्येमहाभारतं ग्रथितवान्। (महाभारतस्य मध्ये)

१. दुर्योधनः ------------------------------ गच्छति। (द्रोणस्य समीपम्)

२. अधिभूतं क्षरो भावः पुरुषश्च ------------------------------। (दैवतेषु इति) (गी.८.४)

३. नर्तक्यः ------------------------------ नृत्यन्ति। (मञ्चे इति)

४. अर्जुनः विषीदन् ------------------------------ रथोपस्थे उपविशति। (कृष्णस्य समीपम्)

५. सेनानायकाः सर्वेषु अयनेषु ------------------------------ अवस्थिताः सन्ति। (भागम् अनतिक्रम्य)

६. महानौकाः ------------------------------ सञ्चरन्ति। (समुद्रस्य मध्ये)

७. सञ्जयः धृतराष्ट्रं युद्धवार्तां ------------------------------ श्रावितवान्। (मतिम् अनतिक्रम्य)

८. कृष्णः रथचक्रं धरन् ------------------------------ अधावत्। (भीष्मम् अभि)

९. धृष्टद्युम्नः ------------------------------ युद्धतन्त्रं विवृणोति। (सेनानायकं सेनानायकं प्रति)

****

नरपुङ्गवः अर्जुनः



एतत् कथानकं सावधानं पठत -

परशुरामशिष्यः आचार्यद्रोणः स्वशिष्यैः सह आश्रमं सम्प्राप्य **शस्त्रशिक्षणं शास्त्रशिक्षणञ्च** प्रारब्धवान्। **सः राजपुत्रान्** एव शिक्षयति स्म। तेषु **पाण्डवकुमारः** अर्जुनः तस्य **प्रियशिष्यः** आसीत्। तं **प्रियशिष्यम्** अर्जुनं **श्रेष्ठधनुर्धरं** कर्तुं तस्य निश्चयः आसीत्। यतो हि अर्जुनस्य **शस्त्रज्ञानम्** अद्भुतम् आसीत्। **गाण्डीवशोभितः** सः **अदृश्यलक्ष्यम्** अपि भेत्तुं समर्थः आसीत्। अतः द्रोणः चिन्तयति स्म यत् अयम् अर्जुनः गाण्डीवार्थं योग्यः एव। **युद्धक्षेत्रगतः** सः **परन्तपः अजेयः** भविष्यति **अर्जुनभीताः** रिपवः **युद्धक्षेत्रात्** पलायिष्यन्ते। सज्जनाश्च **अर्जुनरक्षिताः** भविष्यन्ति इति।

कुन्तीपुत्रः नरपुङ्गवः अर्जुनः साक्षात् भगवतः अवतारः अस्ति इति द्रोणः जानाति स्म। किन्तु आचार्यः **सर्वशिष्यान्** समानतया शिक्षयति स्म। अर्जुनः अपि सतीर्थ्यैः सह सामान्यः छात्रः इव **शस्त्रशास्त्रशिक्षणे** अभिरतः आसीत्।

आचार्यद्रोणेन आश्रमे शिष्याणां कृते समुचिता दिनचरी निश्चिता आसीत्। **शस्त्रशास्त्रशिक्षणेन** सह अन्यान् अपि **जीवनोपयोगिनः** विषयान् **प्राचार्यः** यथासमयं शिक्षयति स्म। **सर्वशिष्येषु सुशिष्यः** अर्जुनः **आश्रम-पाठ्यचर्या-पालने** अग्रणी आसीत्। शीघ्रमेव अर्जुनः **स्वशिक्षणं** समाप्य **क्षत्रियधर्मपालनाय राष्ट्रहितकरणाय** च सिद्धः अभवत्।

अभ्यासः

(क) पाठानुगुणं निम्नप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -

यथा - प्रश्नः - आचार्यद्रोणः कैः सह आश्रमम् अगच्छत् ?
उत्तरम् - आचार्यद्रोणः स्वशिष्यैः सह आश्रमम् अगच्छत् ।

१. आचार्यद्रोणः स्वशिष्यैः सह आश्रमं सम्प्राप्य किम् प्रारब्धवान् ?
-- ।

२. सः (द्रोणः) कान् एव शिक्षयति स्म ?
-- ।

३. द्रोणस्य प्रियशिष्यः कः आसीत् ?
-- ।

४. कस्य शस्त्रज्ञानम् अद्भुतम् आसीत् ?
-- ।

५. कीदृशः सः अदृश्यलक्ष्यम् अपि भेत्तुं समर्थः आसीत् ?
-- ।

६. साक्षात् भगवतः अवतारः कः आसीत् ?
-- ।

७. कः सर्वशिष्यान् समानतया शिक्षयति स्म ?
-- ।

८. केन आश्रमे शिष्याणां कृते समुचिता दिनचरी निश्चिता आसीत् ?
-- ।

(ख) अधः लिखितानां विग्रहवाक्याणां समस्तपदानि यथोदाहरणं पाठात् चित्वा रिक्तस्थानेषु लिखत -

यथा -	**स्वस्य शिष्याः**	**स्वशिष्याः, तैः**	**स्वशिष्यैः ।**
१.	शस्त्रस्य शिक्षणम्	----------------------, तेन	------------------------ ।
२.	शास्त्रस्य शिक्षणम्	----------------------, तेन	------------------------ ।
३.	सर्वे शिष्याः	---------------------- । तान्	------------------------ ।
४.	शस्त्रशास्त्रयोः शिक्षणम्	----------------------, तेन	------------------------ ।

५.	सर्वे शिष्याः	----------------------।	-------------------------।
६.	स्वस्य शिष्यः	----------------------, तेन	-------------------------।
७.	क्षत्रियधर्मस्य पालनम्	----------------------, तस्मै	-------------------------।
८.	राष्ट्राय हितम्	----------------------, तस्मै	-------------------------।
९.	युद्धस्य क्षेत्रम्	----------------------, तस्मात्	-------------------------।

अधोलिखितानि गीतावाक्यानि परिशीलयत -

दृष्ट्वा तु **पाण्डवानीकं** व्यूढं दुर्योधनस्तदा।	(गी.१.२)
अधर्माभिवात्कृष्ण प्रदुष्यन्ति **कुलस्त्रियः**।	(गी.१.४१)
क्षुद्रं **हृदयदौर्बल्यं** त्यक्त्वोत्तिष्ठ परन्तप।	(गी.२.३)
ज्ञानयोगेन साङ्ख्यानां **कर्मयोगेन** योगिनाम्।	(गी.३.३)
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।	(गी.३.८)
बुद्ध्या युक्तो यया पार्थ **कर्मबन्धं** प्रहास्यसि।	(गी.२.३९)
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।	(गी.६.४४)
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः।	(गी.७.३०)
ज्ञानं **विज्ञानसहितं** यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।	(गी.९.१)
ते पुण्यमासाद्य **सुरेन्द्रलोकमश्नन्ति**।	(गी.९.२०)

(ग) उपरि स्थूलाक्षरैः लिखितानि पदानि तत्पुरुषसमासयुक्तानि सन्ति। अधः येषां विग्रहवाक्याणि दत्तानि सन्ति तेषां पुरतः उचितानि पदानि चित्वा लिखत -

यथा - ज्ञानस्य योगः (ज्ञानयोगः), तेन — **ज्ञानयोगेन**

१.	कर्मणः योगः, तेन	-------------------------।
२.	शरीरस्य यात्रा	-------------------------।
३.	कर्मणः बन्धः, तम्	-------------------------।
४.	पाण्डवानाम् अनीकम्	-------------------------।
५.	पूर्वः अभ्यासः, तेन	-------------------------।
६.	प्रयाणस्य कालः, तस्मिन्	-------------------------।
७.	हृदयस्य दौर्बल्यम्	-------------------------।
८.	विज्ञानेन सहितम्	-------------------------।
९.	सुरेन्द्रस्य लोकः, तम्	-------------------------।
१०.	कुलस्य स्त्रियः	-------------------------।

तत्पुरुषसमासः -

प्रायः **उत्तरपदार्थप्रधानः तत्पुरुषः** । यस्मिन् समासे उत्तरपदार्थस्य प्रधानता भवति सः 'तत्पुरुषः' इति उच्यते ।

यथा - राज्ञः पुरुषः = राजपुरुषः । देवस्य आलयः = देवालयः ।

जन्तूनां शाला = जन्तुशाला ।

एतेषु उदाहरणेषु पुरुषः, आलयः शाला च इति एतेषाम् उत्तरपदार्थानां प्राधान्यम् अस्ति । अतः एतेषु तत्पुरुषसमासः अस्ति ।

तत्पुरुषसमासस्य चत्वारः भेदाः भवन्ति - **सामान्यः, कर्मधारयः, द्विगुः नञ्-प्रभृतयः** इति । तत्र सामान्यः सप्तधा भवति - ते च प्रथमातत्पुरुषः, द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः इति । समासे श्रूयमाणं पदं विग्रहावस्थायां यद्विभक्त्यन्तं भवति तद्विभक्तिनाम्ना सः समासः निर्दिश्यते । यथा - **चोरात् भयम् = चोरभयम्** । एषः **पञ्चमीतत्पुरुषः** ।

१. प्रथमातत्पुरुषः

पूर्वशब्दः अर्धशब्दः च अवयविवाचकेन सुबन्तेन समस्यते । अवयविवाचकः एकवचनं च भवेत् ।

एकदेशवाचकाः शब्दाः कालवाचकेन शब्देन समस्यन्ते । यथा -

पूर्वं कायस्य	-	पूर्वकायः ।	अर्धं कायस्य	-	अर्धकायः ।
अर्धं पिप्पल्याः	-	अर्धपिप्पली ।	पूर्वम् अह्नः	-	पूर्वाह्णः ।
अर्धं रात्रेः	-	अर्धरात्रः ।	अपरम् अह्नः	-	अपराह्णः ।
मध्यम् अह्नः	-	मध्याह्नः ।			

२. द्वितीयातत्पुरुषः -

द्वितीयाविभक्त्यन्तं सुबन्तपदं **श्रित-अतीत-पतित-गत अत्यस्त-प्राप्त-आपन्न**-इत्यादिशब्दैः सह समासं प्राप्नोति । द्वितीयातत्पुरुषसमासे विग्रहवाक्येषु पूर्वपदं द्वितीयाविभक्त्यन्तम् एव भवति । यथा -

कृष्णं श्रितः	-	कृष्णश्रितः ।	सुखं प्राप्तः	-	सुखप्राप्तः ।
दुःखम् अतीतः	-	दुःखातीतः ।	संशयम् आपन्नः	-	संशयापन्नः ।
कूपं पतितः	-	कूपपतितः ।	सुखम् आपन्नः	-	सुखापन्नः ।
गृहं गतः	-	गृहगतः ।	मनः गतः	-	मनोगतः। (गी.२.५५)
द्वन्द्वम् अतीतः	-	द्वन्द्वातीतः । (गी.४.२२)	कामम् ईप्सुः	-	कामेप्सुः। (गी.१८.२४)
आदित्यं गतम्	-	आदित्यगतम् । (गी.१५.१२)			

३. तृतीयातत्पुरुषः -

तृतीयाविभक्त्यन्तं सुबन्तपदं **पूर्व-सदृश-सम-ऊनार्थक-कलह-मिश्र-संमिश्र-श्लक्ष्ण-अवर**-इत्यादिशब्दैः सह समस्यते । (ऊनार्थशब्देन ऊनार्थकबोधकानि पर्यायपदानि अपि बोद्धव्यानि) तृतीयातत्पुरुषसमासे विग्रहवाक्येषु पूर्वपदं तृतीयाविभक्त्यन्तम् एव भवति । यथा -

मासेन पूर्वः	-	मासपूर्वः ।	वर्षेण पूर्वः	-	वर्षपूर्वः ।
मात्रा सदृशः	-	मातृसदृशः ।	पित्रा सदृशः	-	पितृसदृशः ।
शिवेन समः	-	शिवसमः ।	एकेन ऊनम्	-	एकोनम् ।
वाचा कलहः	-	वाक्कलहः ।	घृतेन मिश्रः	-	घृतमिश्रः ।
गुडेन संमिश्रः	-	गुडसंमिश्रः ।	आचारेण श्लक्ष्णः	-	आचारश्लक्ष्णः ।
मासेन अवरः	-	मासावरः ।			

कर्तरि करणे च अर्थे या तृतीया, तद्विभक्त्यन्तं यत् पदं, तत् कृदन्तेन सह प्रायः समस्यते । यथा -

हरिणा त्रातः	-	हरित्रातः ।	
नखैः भिन्नः	-	नखभिन्नः ।	
व्यासेन प्रणीतम्	-	व्यासप्रणीतम् ।	
खड्गेन छिन्नः	-	खड्गछिन्नः ।	
यज्ञेन क्षपितम्		यज्ञक्षपितम् ।	(गी.४.३०)
ज्ञानेन दीपितः	-	ज्ञानदीपितः ।	(गी.४.२७)
श्रद्धया विरहितः	-	श्रद्धाविरहितः ।	(गी.१७.१३)
विधिना हीनः		विधिहीनः ।	(गी.१७.१३)
सत्त्वेन समाविष्टः	-	सत्त्वसमाविष्टः ।	(गी.१८.१०)
सङ्गेन रहितम्	-	सङ्गरहितम् ।	(गी.१८.२३)
गुणैः प्रवृद्धाः		गुणप्रवृद्धाः ।	(गी.१५.२)

४. चतुर्थीतत्पुरुषः -

चतुर्थीविभक्त्यन्तं सुबन्तपदं **तदर्थ-अर्थ-बलि-हित-सुख-रक्षितादिशब्दैः** समस्यते । अर्थशब्देन चतुर्थ्यन्तं पदं नित्यं समस्यते । तथा च अत्र विशेष्यस्य यत् लिङ्गं तत् लिङ्गम् एव समस्तपदस्य भवति । नित्यसमासत्वात् विग्रहवाक्ये अर्थशब्दस्य श्रवणं न भवति । यथा -

छात्राय अयम्	-	छात्रार्थः ।	द्विजाय अयम्	-	द्विजार्थः ।
कन्यायै इयम्	-	कन्यार्था ।	भूतेभ्यः बलिः	-	भूतबलिः ।
मित्राय इदम्	-	मित्रार्थम् ।	पुत्राय हितम्	-	पुत्रहितम् ।
यूपाय दारु	-	यूपदारु ।	राज्ञे सुखम्	-	राजसुखम् ।
अर्थाय व्यपाश्रयः	-	अर्थव्यपाश्रयः (गी.३.१८)	गवे रक्षितम्	-	गोरक्षितम् ।

५. पञ्चमीतत्पुरुषः -

पञ्चमीविभक्त्यन्तं सुबन्तं **भय-भीत-भीति-भी**-इत्यादिशब्दैः सह समस्यते । पञ्चमीतत्पुरुषसमासे विग्रहवाक्येषु पूर्वपदं पञ्चमीविभक्त्यन्तं भवति । यथा -

व्याघ्रात् भयम्	-	व्याघ्रभयम् ।	
सर्पात् भीः	-	सर्पभीः ।	
सिंहात् भीतः	-	सिंहभीतः ।	
अश्वात् पतितः	-	अश्वपतितः ।	
चौरात् भीतिः	-	चौरभीतिः ।	
योगात् भ्रष्टः	-	योगभ्रष्टः।	(गी.६.४१)
कर्मणः समुद्भवः	-	कर्मसमुद्भवः ।	(गी.३.१४)
अक्षरात् समुद्भवम्	-	अक्षरसमुद्भवम् ।	(गी.३.१५)
स्वभावात् प्रभवाः	-	स्वभावप्रभवाः ।	(गी.१८.४१)
अज्ञानात् सम्भूतः	-	अज्ञानसम्भूतः ।	(गी.४.४२)
प्रकृतेः सम्भवाः	-	प्रकृतिसम्भवाः ।	(गी.१४.५)

६. षष्ठीतत्पुरुषः -

षष्ठीविभक्त्यन्तं पदं सुबन्तेन समस्यते । अस्य विग्रहवाक्येषु पूर्वपदं षष्ठ्यन्तं भवति । यथा -

कुरूणां क्षेत्रम्, तस्मिन्	-	कुरुक्षेत्रे ।	(गी.१.१)
पाण्डोः पुत्राः, तेषाम्	-	पाण्डुपुत्राणाम् ।	(गी.१.३)
हृषीकाणाम् ईशः	-	हृषीकेशः ।	(गी.१.२४)
रणस्य समुद्यमः, तस्मिन्	-	रणसमुद्यमे ।	(गी.१.२२)
आदित्यस्य वर्णः	-	आदित्यवर्णः ।	(गी.८.९)
बुद्धेः नाशः	-	बुद्धिनाशः ।	(गी.२.६३)
कुलस्य धर्माः	-	कुलधर्माः ।	(गी.१.४०)
शरीरस्य यात्रा	-	शरीरयात्रा ।	(गी.३.८)
अश्वत्थस्य मूलम्	-	अश्वत्थमूलम् ।	
गीतायाः उपदेशः	-	गीतोपदेशः ।	
कर्मणः बन्धनम्	-	कर्मबन्धनम् ।	(गी.९.२८)

७. सप्तमीतत्पुरुषः -

सप्तमीविभक्त्यन्तं पदं **शौण्ड-धूर्त-कितव-प्रवीण-पटु-पण्डित-कुशल-चपल-निपुण-सिद्ध-शुष्क-पक्व-बन्ध**-इत्यादिशब्दैः समस्यते । अस्य विग्रहवाक्येषु पूर्वपदं सप्तम्यन्तं भवति । यथा -

अक्षेषु शौण्डः	-	अक्षशौण्डः ।	अक्षेषु धूर्तः	-	अक्षधूर्तः ।
वणिजि कितवः	-	वणिक्कितवः ।	शास्त्रे प्रवीणः	-	शास्त्रप्रवीणः ।
व्याकरणे पटुः	-	व्याकरणपटुः ।	वेदेषु पण्डितः	-	वेदपण्डितः ।

व्यवहारे कुशलः -	व्यवहारकुशलः।	स्वभावे चपलः	-	स्वभावचपलः।
शास्त्रेषु निपुणः -	शास्त्रनिपुणः।	जले सिद्धम्	-	जलसिद्धम्।
आतपे शुष्कम्	आतपशुष्कम्।	घृते पक्वम्	-	घृतपक्वम्।
व्रते बन्धः	व्रतबन्धः।			
ब्रह्मणि निर्वाणम् -	ब्रह्मनिर्वाणम्।	(गी.२.७२)		
मयि भक्तिः -	मद्भक्तिः।	(गी.१८.५४)		
श्रुतौ परायणाः -	श्रुतिपरायणाः।	(गी.१३.२५)		

(घ) यथोदाहरणम् अधोलिखितानां विग्रहवाक्याणां समस्तपदानि समासनाम च लिखत -

	विग्रहवाक्यम्	समस्तपदम्	समासनाम
यथा -	धर्मस्य क्षेत्रम्, तस्मिन्	धर्मक्षेत्रे (१.१)	षष्ठीतत्पुरुषः
१.	पाण्डवानाम् अनीकम्	------------------ (गी.१.२)	------------------ ।
२.	हृदयस्य दौर्बल्यम्	------------------ (गी.२.३)	------------------ ।
३.	बुद्धेः नाशः	------------------ (गी.२.६३)	------------------ ।
४.	स्मृतेः भ्रंशः, तस्मात्	------------------ (गी.२.६३)	------------------ ।
५.	स्वस्य धर्मः	------------------ (गी.३.३५)	------------------ ।
६.	परस्य धर्मः, तस्मात्	------------------ (गी.३.३५)	------------------ ।
७.	बुद्धेः भेदः, तम्	------------------ (गी.३.२६)	------------------ ।
८.	कर्मणः योगः	------------------ (गी.५.२)	------------------ ।
९.	शरीरस्य विमोक्षणम्, तस्मात्	------------------ (गी.५.२३)	------------------ ।
१०.	कर्मणः फलं, तत्	------------------ (गी.६.१)	------------------ ।
११.	नासिकायाः अग्रः, तम्	------------------ (गी.६.१३)	------------------ ।
१२.	प्रयाणस्य कालः, तस्मिन्	------------------ (गी.७.३०)	------------------ ।
१३.	आदित्यस्य वर्णः, तम्	------------------ (गी.८.९)	------------------ ।
१४.	योगस्य बलं, तेन	------------------ (गी.८.१०)	------------------ ।
१५.	रात्रेः आगमः, तस्मिन्	------------------ (गी.८.१९)	------------------ ।
१६.	विज्ञानेन सहितम्	------------------ (गी.९.१)	------------------ ।
१७.	राज्ञः विद्या	------------------ (गी.९.२)	------------------ ।
१८.	लोकस्य महेश्वरः, तम्	------------------ (गी.१०.३)	------------------ ।
१९.	जगतः पतिः, तत्सम्बुद्धौ	------------------ (गी.१०.१५)	------------------ ।
२०.	भूतानाम् ईशः, तत्सम्बुद्धौ	------------------ (गी.१०.१५)	------------------ ।

(ङ) यथोदाहरणं समस्तपदानां विग्रहवाक्यं लिखत -

यथा - राज्यसुखलोभः राज्यसुखे लोभः (गी.१.४५)

१. आत्मसंयमः आत्मनि संयमः (गी.४.२७)

२. श्रुतिविप्रतिपन्नाः -- । (गी.२.५३)

३. रजोगुणसमुद्भवः -- । (गी.३.३७)

४. परम्पराप्राप्तम् -- । (गी.४.२)

५. आत्मतृप्तः -- । (गी.३.१७)

६. बुद्धियुक्तः -- । (गी.२.५०)

७. द्वन्द्वातीतः -- । (गी.४.२२)

८. ज्ञानसञ्छिन्नः -- । (गी.४.४१)

९. कर्मफलासङ्गः -- । (गी.४.२०)

१०. मद्भावः -- । (गी.४.१०)

११. गुणसम्मूढाः -- । (गी.३.२९)

१२. ब्रह्मभूतः -- । (गी.५.२४)

१३. ब्रह्मनिर्वाणम् -- । (गी.५.२४)

१४. दुःखसंयोगवियोगः -- । (गी.६.२३)

१५. अहङ्कारविमूढः -- । (गी.३.२७)

१६. मद्गतः -- । (गी.६.४७)

१७. नराधमाः -- । (गी.७.१५)

१८. योगसंसिद्धः -- । (गी.४.३८)

१९. उभयविभ्रष्टः -- । (गी.६.३८)

२०. योगारूढः -- । (गी.६.४)

कर्मधारयसमासः -

एतानि वाक्यानि परिशीलयत -

वीरपुरुषः युद्धं करोति ।

मेघश्यामः कृष्णः अर्जुनम् उपादिशत् ।

राजर्षिः जनकः कर्मणा सिद्धिं प्राप्तवान् ।

ऋषयः **तपोधनं** संगृह्णन्ति ।

भगवद्गीताग्रन्थः अखिले विश्वे प्रसिद्धः अस्ति ।

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां समस्तपदानां विग्रहवाक्यम् एवं भवति -

वीरः पुरुषः	=	वीरपुरुषः
मेघ इव श्यामः	=	मेघश्यामः
राजा ऋषिः इव	=	राजर्षिः
तपः एव धनम्	=	तपोधनम्
भगवद्गीता इति ग्रन्थः	=	भगवद्गीताग्रन्थः

एतानि सर्वाणि कर्मधारयसमासस्य उदाहरणानि सन्ति । कर्मधारयसमासे पूर्वपदम् उत्तरपदं चेति पदद्वयमपि प्रथमाविभक्त्यन्तम् एव भवति इति विशेषः । यद्यपि कर्मधारयसमासस्य अनेके भेदाः सन्ति, तथापि अत्र प्रसिद्धाः केचन एव प्रदर्श्यन्ते -

१. विशेषणपूर्वपदः कर्मधारयः -

अत्र पूर्वपदं सर्वदापि विशेषणं भवति । **यथा -**

श्वेतं वस्त्रम्	=	श्वेतवस्त्रम्	पुराणः पुरुषः	=	पुराणपुरुषः
कृष्णः सर्पः	=	कृष्णसर्पः	उग्रं रूपम्	=	उग्ररूपम्
उत्तमं मित्रम्	=	उत्तममित्रम्	इष्टाः कामाः	=	इष्टकामाः
क्षुद्रा नदी	=	क्षुद्रनदी			

२. उपमानपूर्वपदः कर्मधारयः -

अत्र पूर्वपदं सर्वदापि उपमानवाचकं[1] भवति । (उत्तरपदं तु उपमेयवाचकं भवति) यथा -

वज्रम् इव कठोरम्	=	वज्रकठोरम्	विद्युत् इव चञ्चला	=	विद्युच्चञ्चला
कुसुमम् इव कोमलम्	=	कुसुमकोमलम्	गज इव स्थूलः	=	गजस्थूलः
हिमम् इव शीतलम्	=	हिमशीतलम्	चन्द्र इव मनोहरः	=	चन्द्रमनोहरः
अमृतम् इव मधुरम्	=	अमृतमधुरम्			

३. उपमानोत्तरपदः कर्मधारयः -

अत्र उत्तरपदं सर्वदा उपमानवाचकं भवति । (पूर्वपदम् उपमेयवाचकं भवति इति अर्थात् सिद्धमेव ।) यथा -

पुरुषः सिंहः इव	=	पुरुषसिंहः	कपिः कुञ्जरः इव	=	कपिकुञ्जरः
पुरुषः व्याघ्रः इव	=	पुरुषव्याघ्रः	अधरः पल्लवः इव	=	अधरपल्लवः
भरतः ऋषभः इव	=	भरतर्षभः	मुखं पद्मम् इव	=	मुखपद्मम्
करः किसलयम् इव	=	करकिसलयम्			

४. अवधारणापूर्वपदः कर्मधारयः -

यत्र पूर्वपदस्य अवधारणा (निश्चयः) इत्यर्थः प्रतीयते सः अवधारणापूर्वपदः कर्मधारयः । **निश्चयः इति अर्थं** द्योतयितुं विग्रहवाक्ये पूर्वपदात् परम् 'एव' इति अव्ययस्य प्रयोगः क्रियते । यथा -

कर्म एव बन्धः	=	कर्मबन्धः	(गी.२.४०)
ज्ञानम् एव योगः	=	ज्ञानयोगः	(गी.३.३)
संयमाः एव अग्नयः	=	संयमाग्नयः	
कमलम् एव आसनम्	=	कमलासनम्	(गी.११.१५)
तपः एव धनम्	=	तपोधनम्	
विद्या एव रत्नम्	=	विद्यारत्नम्	
गुरुः एव देवः	=	गुरुदेवः	
यशः एव धनम्	=	यशोधनम्	
ज्ञानम् एव सम्पत्तिः	=	ज्ञानसम्पत्तिः	
शोकः एव सागरः	=	शोकसागरः	
देहः एव पञ्जरः	=	देहपञ्जरः	
करः एव कमलम्	=	करकमलम्	
सज्जनाः एव षट्पदाः	=	सज्जनषट्पदाः	
भारतम् एव पङ्कजम्	=	भारतपङ्कजम्	
गीता एव अमृतम्	=	गीतामृतम्	

५. सम्भावनापूर्वपदः कर्मधारयः -

अत्र पूर्वपदं संज्ञापदम् एव भवति । अस्य विग्रहवाक्ये पूर्वपदात् अनन्तरम् 'इति' इत्यस्य अव्ययस्य प्रयोगः क्रियते । यथा -

महाभारतम् इति ग्रन्थः	=	महाभारतग्रन्थः	
हिमालयः इति पर्वतः	=	हिमालयपर्वतः	
मथुरा इति नगरी	=	मथुरानगरी	
गङ्गा इति नदी	=	गङ्गानदी	
आम्रः इति वृक्षः	=	आम्रवृक्षः	
पाञ्चजन्यः इति शङ्खः	=	पाञ्चजन्यशङ्खः	
गाण्डीवम् इति धनुः	=	गाण्डीवधनुः	
अध्यात्मम् इति संज्ञा	=	अध्यात्मसंज्ञा	(गी.११.१)
सङ्गः इति दोषः	=	सङ्गदोषः	(गी.१५.५)

1. यस्य सादृश्यम् अन्यत्र निरूप्यते तत् उपमानम् । यत्र निरूप्यते तत् उपमेयम् ।

६. मध्यमपदलोपी कर्मधारयः -

अत्र पूर्वपदस्य उत्तरपदस्य च मध्ये मध्यमम् अपि पदं दृश्यते। परन्तु तत् विहग्रवाक्ये एव दृश्यते। तत्र तत् पूर्वपदेन समस्तं दृश्यते। किन्तु समस्ते पदे तत् लोपं प्राप्नोति। अतः न दृश्यते। मध्यमस्य पदस्य लोपः भवति इत्यतः अस्य मध्यमपदलोपी कर्मधारयः इति नाम भवति। यथा -

छायाबहुलाः वृक्षाः	=	छायावृक्षाः	
द्विगुणितं शतम्	=	द्विशतम्	
अष्ट-अधिकाः दश	=	अष्टादश	
पञ्चगुणितं सहस्रम्	=	पञ्चसहस्रम्	
सिंहचिह्नाङ्कितम् आसनम्	=	सिंहासनम्	
प्रज्ञापूर्वकाः वादाः	=	प्रज्ञावादाः	(गी.२.११)
योगाधीना माया	=	योगमाया	(गी.७.२५)
सहस्रसंख्याकानि युगानि	=	सहस्रयुगानि	(गी.८.१७)
रणरूपा नदी	=	रणनदी	

(च) यथोदाहरणं रिक्तस्थानानि पूरयत -

विग्रहवाक्यम्	समस्तपदम्	समासनाम
यथा - उत्तमानि फलानि	उत्तमफलानि	विशेषणपूर्वपदकर्मधारयः।
१. ---------------------	गुह्यज्ञानम्	---------------------।
२. पुरुषः ऋषभः इव	---------------------	---------------------।
३. ---------------------	भरतर्षभः	उपमानोत्तरपदः कर्मधारयः।
४. अवाच्याः वादाः, तान्	---------------------	---------------------।
५. ---------------------	श्वेतपुष्पाणि	---------------------।
६. ---------------------	नीलकमलम्	---------------------।
७. कर्म एव बन्धनम्	---------------------	
८. जन्म एव बन्धः	---------------------	---------------------।
९. ---------------------	आम्रवृक्षः	सम्भावनापूर्वपदः कर्मधारयः।
१०. विद्युत् इव चञ्चला	---------------------	---------------------।
११. ---------------------	पुरुषव्याघ्रः	---------------------।
१२. विद्या एव धनम्	---------------------	---------------------।
१३. जपः इति यज्ञः	--------------------- (गी.१०.२५)	---------------------।
१४. ---------------------	दीर्घरज्जुः	विशेषणपूर्वपदकर्मधारयः।
१५. गीता इति उपदेशः	---------------------	---------------------।

१६.	मोहः एव कलिलम्	--------------------- (गी.२.५२)	--------------------- ।
१७.	शब्दरूपं ब्रह्म	--------------------- (गी.६.४४)	--------------------- ।
१८.	कर्म इति संज्ञा	---------------------	--------------------- ।
१९.	---------------------	आशापाशः (गी.१३.१२)	--------------------- ।
२०.	मृत्युयुक्तः संसारसागरः	--------------------- (गी.१२.७)	--------------------- ।
२१.	---------------------	जन्मबन्धः (गी.२.५१)	--------------------- ।
२२.	त्रिसंख्याका विद्या	---------------------	--------------------- ।
२३.	---------------------	ज्ञानासिः	--------------------- ।
२४.	---------------------	संसारसागरः (गी.१२.७)	--------------------- ।

(छ) अधः समस्तपदानि, विग्रहवाक्याणि समासभेदाः च लिखिताः सन्ति, परस्परं समुचितं मेलनं कृत्वा रिक्तस्थानेषु लिखत।

समस्तपदम्	**विग्रहवाक्यम्**	**समासभेदः**
भरतर्षभः	विद्या एव रत्नम्	अवधारणापूर्वपदः कर्मधारयः
उग्ररूपम्	द्वारका इति नगरी	अवधारणापूर्वपदः कर्मधारयः
विद्यारत्नम्	किसलय इव कोमलम्	मध्यमपदलोपी कर्मधारयः
सिंहासनम्	आदिः देवः	विशेषणपूर्वपदः कर्मधारयः
द्वारकानगरी	उग्रं रूपम्	**उपमानोत्तरपदः कर्मधारयः**
ज्ञानधनम्	विषयाः एव प्रवालाः	मध्यमपदलोपी कर्मधारयः
विषयप्रवालाः	द्विगुणितं शतम्	अवधारणापूर्वपदः कर्मधारयः
नामयज्ञः	**भरतः ऋषभः इव**	अवधारणापूर्वपदः कर्मधारय
द्विशतम्	आत्मा एव कारणम्	विशेषणपूर्वपदः कर्मधारयः
आदिदेवः	ज्ञानम् एव धनम्	सम्भावनापूर्वपदः कर्मधारयः
किसलयकोमलम्	शास्त्रसम्मतः विधिः	मध्यमपदलोपी कर्मधारयः
आत्मकारणम्	नामसम्पादकः यज्ञः	मध्यमपदलोपी कर्मधारयः
शास्त्रविधिः	सिंहचिह्नाङ्कितम् आसनम्	उपमानपूर्वपदः कर्मधारयः

यथा -	**भरतर्षभः**	**भरतः ऋषभः इव**	**उपमानोत्तरपदः कर्मधारयः**
१.	-------------	--------------------	-----------------------------
२.	-------------	--------------------	-----------------------------
३.	-------------	--------------------	-----------------------------
४.	-------------	--------------------	-----------------------------
५.	-------------	--------------------	-----------------------------

६. ------------- -------------------- --------------------------------
७. ------------- -------------------- --------------------------------
८. ------------- -------------------- --------------------------------
९. ------------- -------------------- --------------------------------
१०. ------------- -------------------- --------------------------------
११. ------------- -------------------- --------------------------------
१२. ------------- -------------------- --------------------------------

द्विगुसमासः -

एतानि वाक्यानि परिशीलयत -

षाण्मातुरः स्कन्दः तारकासुरं हतवान्।

एषः चैत्रमासस्य द्वितीयः **सप्ताहः** अस्ति।

श्रीकृष्णः **त्रिभुवनम्** अपि रक्षति।

पञ्चवटी इति सुन्दरं स्थानम् अस्ति।

देवेन **त्रिलोकी** रक्ष्यते।

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां विग्रहवाक्यम् एवं भवति -

षण्णां मातॄणाम् अपत्यं पुमान्	=	षाण्मातुरः
सप्तानाम् अह्नां समाहारः	=	सप्ताहः
त्रयाणां भुवनानां समाहारः	=	त्रिभुवनम्
पञ्चानां वटानां समाहारः	=	पञ्चवटी
त्रयाणां लोकानां समाहारः	=	त्रिलोकी

एतानि सर्वाणि अपि द्विगुसमासस्य उदाहरणानि सन्ति। एतेषु सर्वेषु पूर्वपदं संख्यावाचकम् अस्ति। (द्विगुसमासे पूर्वपदं संख्यावाचकम् एव भवति।)

द्विगुसमासस्य उदाहरणेषु उत्तरपदे तत्र तत्र विशेषः भवति। यथा -

त्रयाणां लोकानां समाहारः	=	त्रिलोकी
नवानां रात्रीणां समाहारः	=	नवरात्रम्
पञ्चानां गवां समाहारः	=	पञ्चगवम्
त्रयाणां पदानां समाहारः	=	त्रिपदी
सप्तानां शतस्य समाहारः	=	सप्तशती
अष्टानाम् अध्यायानां समाहारः	=	अष्टाध्यायी

अस्मिन् विषये अवधानं कर्तव्यम्।

(ज) **विग्रहवाक्यं समस्तपदं वा लिखत -**

१.	पञ्चानां पात्राणां समाहारः	=	-------------------- ।
२.	त्रयाणां गुणानां समाहारः	=	-------------------- ।
३.	--------------------------------	=	दशगवधनः ।
४.	सप्तानाम् अह्नां समाहारः	=	-------------------- ।
५.	--------------------------------	=	पञ्चवटी ।
६.	पञ्चानां दशानां समाहारः	=	--------------------- ।
७.	चतुर्णां पथां समाहारः	=	--------------------- ।
८.	--------------------------------	=	द्वैमातुरः ।
९.	पञ्चानां मूलानां समाहारः	=	--------------------- ।
१०.	------------------------------	=	चतुर्व्यूहम् ।

नञ्-समासः -

एतानि वाक्यानि परिशीलयत -

मनुष्येण **अधर्मः** न आचरणीयः ।
युधिष्ठिरेण कदापि **असत्यं** न उक्तम् ।
अचतुरः कष्टम् अनुभवति ।
अश्रद्धा मनुष्यं नाशयति ।
दुष्टाः सर्वदा **अहितम्** आचरन्ति ।
तव **अकीर्तिः** जनैः कथ्यते ।

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां विग्रहवाक्यम् एवं भवति -

न धर्मः अधर्मः ।	(गी.१.४१)	न सत्यम् असत्यम् ।	(गी.१६.८)
न चतुरः अचतुरः ।		न श्रद्धा अश्रद्धा । तया	(गी.१७.२)
न हितम् अहितम् ।		न कीर्तिः अकीर्तिः ।	(गी.२.३४)

एतानि सर्वाणि अपि नञ्-समासस्य उदाहरणानि सन्ति । एतेषु सर्वेषु पूर्वपदं 'न' एव भवति ।

अवधेयम्

- **नञ्-समासे पूर्वपदं नञ् इति अव्ययं भवति । तत् सुबन्तेन समासं प्राप्नोति । नञ् इत्यत्र 'अकारः' एव शिष्यते ।**
- **उत्तरपदं व्यञ्जनादि भवितुम् अर्हति, स्वरादि अपि भवितुम् अर्हति । व्यञ्जनादि अस्ति चेत् समस्तपदे केवलम् अकारस्य योजनं भवति ।**

यथा -

न शक्तः	अशक्तः। (गी.१२.२१)	न नीतिः	अनीतिः।
न चिन्त्यम्	अचिन्त्यम्। (गी.१२.३)	न गम्यम्	अगम्यम्।
न दाह्यः	अदाह्यः। (गी.२.२४)	न प्रमेयः	अप्रमेयः। (गी.२.१८)
न छेद्यः	अच्छेद्यः। (गी.२.२४)	न क्लेद्यः	अक्लेद्यः। (गी.२.२४)
न व्यक्तः	अव्यक्तः। (गी.२.२५)	न शोष्यः	अशोष्यः। (गी.२.२४)

❖ **उत्तरपदं यदि स्वरादि भवति तर्हि नञः अकारात् परतः 'न्' इत्यस्य वर्णस्य आगमः भवति। (अर्थात् 'अन्' इति युज्यते) यथा -**

न आरोग्यम्	अनारोग्यम्।	न ईशः	अनीशः।
न उत्साहः	अनुत्साहः।	न इच्छा	अनिच्छा।
न आलस्यम्	अनालस्यम्।	न ऐक्यम्	अनैक्यम्।
न उपस्थितः	अनुपस्थितः।	न अधिकारः	अनधिकारः।
न आगतः	अनागतः।	न ईश्वरः	अनीश्वरः।

(झ) यथोदाहरणम् अधः लिखितेषु गीतावाक्येषु स्थूलाक्षरैः मुद्रितानां नञ्-समासयुक्तानां पदानां विग्रहवाक्याणि लिखत -

अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन।	(गी.२.२)
नासतो विद्यते भावो **नाभावो** विद्यते सतः।	(गी.२.१६)
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।	(गी.६.१)
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु।	(गी.७.१)
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।	(गी.८.३)
रात्र्यागमेऽ**वशः** पार्थ प्रभवत्यहरागमे।	(गी.८.१९)
अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप।	(गी.९.३)

यथा - अनार्यजुष्टम् न आर्यजुष्टम्।

१.अस्वर्ग्यम्	------------।	२. अकीर्तिकरम्	--------------।
३.असतः	------------।	४. अभावः	--------------।
५.अनाश्रितः	------------।	६. असंशयम्	--------------।
७.अवशः	------------।	८. अश्रद्दधानाः	--------------।

(ञ) अधः लिखितानां विग्रहवाक्याणां समस्तपदानि लिखत -

	विग्रहवाक्यम्	समस्तपदम्
यथा -	न सम्मूढः	असम्मूढः
१.	न हिंसा	---------------
२.	न प्राप्य	---------------
३.	न आदिः	---------------
४.	न दक्षिणम्	---------------
५.	न ईश्वरः	---------------

(ट) अधः लिखितानि स्थूलाक्षरैः मुद्रितानि पदानि सावधानं पठित्वा तेषां पदानां विग्रहं समासनम च यथोदाहरणं लिखत -

१.	प्रसक्ताः **कामभोगेषु** पतन्ति नरकेऽशुचौ।	(गी.१६.१६)
२.	सर्वारम्भपरित्यागी **गुणातीतः** स उच्यते।	(गी.१४.२५)
३.	**अविभक्तं** च भूतेषु विभक्तमिव च स्थितम्।	(गी.१३.१६)
४.	इन्द्रि**यार्थेषु** वैराग्यम**नहङ्कार** एव च।	(गी.१३.८)
५.	**अनिष्टमिष्टं** मिश्रं च त्रिविधं कर्मणः फलम्।	(गी.१८.१२)
६.	उत्क्रामन्तं स्थितं वापि भुञ्जानं वा **गुणान्वितम्**।	(गी.१५.१०)
७.	कारणं कर्म कर्तेति त्रिविधः **कर्मसङ्ग्रहः**।	(गी.१८.१८)
८.	त्यागो हि **पुरुषव्याघ्र** त्रिविधः सम्प्रकीर्तितः।	(गी.१८.४)
९.	उत्तमः पुरुषस्त्वन्यः **परमात्मेत्यु**दाहृतः।	(गी.१५.१७)
१०.	यदादित्य**गतं** तेजो जगद्भासयतेऽखिलम्।	(गी.१५.१२)
११.	**अधर्मं** धर्ममिति या मन्यते तमसावृता।	(गी.१८.३२)
१२.	मां च यो**ऽव्यभिचारेण भक्तियोगेन** सेवते।	(गी.१४.२६)
१३.	**मत्कर्मकृ**न्मत्परमो **मद्भक्तः सङ्गवर्जितः**।	(गी.११.५५)

यथा -	**कामभोगेषु**	**कामस्य भोगाः कामभोगाः, तेषु**	**षष्ठीतत्पुरुषः**
१.	-------------	----------------------------	-----------------
२.	-------------	----------------------------	-----------------
३.	-------------	----------------------------	-----------------
४.	-------------	----------------------------	-----------------
५.	-------------	----------------------------	-----------------

६.	--------------	------------------------------	-------------------
७.	--------------	------------------------------	-------------------
८.	--------------	------------------------------	-------------------
९.	--------------	------------------------------	-------------------
१०.	--------------	------------------------------	-------------------
११.	--------------	------------------------------	-------------------
१२.	--------------	------------------------------	-------------------
१३.	--------------	------------------------------	-------------------
१४.	--------------	------------------------------	-------------------
१५.	--------------	------------------------------	-------------------
१६.	--------------	------------------------------	-------------------
१७.	--------------	------------------------------	-------------------

कुसमासः -

एतानि वाक्यानि परिशीलयत कोष्ठके दत्तानि कुसमासस्य विग्रहवाक्याणि च पश्यत -

१. **कुपुरुषाः** सज्जनान् निन्दन्ति। (कुत्सिताः पुरुषाः = कुपुरुषाः / कापुरुषाः)
२. कदापि **कदन्नं** न भक्षयेत्। (कुत्सितम् अन्नम् = कदन्नम्)
३. **कुपुत्रः** भवेत्, परन्तु **कुमाता** न भवेदेव। (कुत्सितः पुत्रः = कुपुत्रः, कुत्सिता माता = कुमाता)
४. चोराः **कुग्रामेषु** अपि वसन्ति। (कुत्सिताः ग्रामाः, तेषु = कुग्रामेषु)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि कुसमासस्य उदाहरणानि सन्ति।

कुशब्दः सुबन्तेन नित्यं समस्यते। यदि अस्मिन् समासे उत्तरपदम् अजादि भवति तर्हि कु इत्यस्य कद् आदेशः भवति।

कुत्सितः देशः = कुदेशः। कुत्सितः बालः = कुबालः।
कुत्सितः अश्वः = कदश्वः। कुत्सितम् अन्नम् = कदन्नम्।

प्रादिसमासः -

एतानि वाक्यानि परिशीलयत -

छात्रः **प्राचार्यं** प्रणमति। भारतं **सुपुरुषाणां** देशः।
सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यम**तीन्द्रियम्**। (गी.६.२१)
एतेषु स्थूलाक्षरैः प्रदत्तानि पदानि प्रादिसमासस्य उदाहरणानि सन्ति। एतेषां विग्रहं पश्यत -

प्रगतः आचार्यः - प्राचार्यः । शोभनः पुरुषः - सुपुरुषः।
अतिक्रान्तम् इन्द्रियम् - अतीन्द्रियम् ।

प्र परा अप इत्यादयः द्वाविंशतिः २२ उपसर्गाः प्रादयः इति उच्यते । एते विभिन्नेषु अर्थेषु वर्तमानानां प्रादीनां शब्दान्तरेण सह नित्यं समासः भवति ।

(ठ) यथोदाहरणं समस्तपदानि लिखत -

यथा - दुष्टं कृतम् दुष्कृतम्

१. सुष्ठु कृतम् -------------------
२. प्रगतः पितामहः -------------------
३. शोभनः जनः -------------------
४. शोभनं स्थानम् -------------------
५. अभिगतः मुखम् -------------------
६. दुराचारः पुरुषः -------------------
७. कुत्सितः विचारः -------------------
८. सुष्ठु आगतम् -------------------
९. प्रगता मातामही -------------------

उपपदसमासः -

एतानि वाक्यानि परिशीलयत -

१. **ब्रह्मविद्** ब्रह्मणि स्थितः । (गी.५.२०)
२. नहि **कल्याणकृत्** कश्चित् दुर्गतिं तात गच्छति । (गी.६.४०)
३. एतद्यो वेत्ति तं प्राहुः **क्षेत्रज्ञ** इति तद्विदः । (गी.१३.१)
४. रात्रौ **निशाकरः** नितरां शोभते ।
५. सारथिः **रथकारम्** आह्वयति ।
६. देवान् **देवयजो** यान्ति । (गी.७.२३)
७. **नभःस्पृशं** दीप्तमनेकवर्णम् । (गी.११.२४)
८. पणवानकगोमुखाः **भयङ्करं** शब्दम् अकुर्वन् ।
९. शकुन्तला **प्रियंवदाम्** असूचयत् ।
१०. एषः वः **इष्टकामधुक्** अस्तु । (गी.३.१०)
११. **योगस्थः** कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय । (गी.२.४८)
१२. त्रैविद्या मां **सोमपाः** पूतपापाः यजन्ते । (गी.९.२०)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि उपपदसमासस्य उदाहरणानि सन्ति । उपपदं नाम काचित् संज्ञा । उपपदसमासे पूर्वपदं यद् भवति तस्य उपपदम् इति नाम । अयं नित्यसमासः ।

उपरितनानां पदानां विग्रहवाक्यं पश्यत -

ब्रह्म वेत्ति ब्रह्मविद्	कल्याणं करोति कल्याणकृत् (कल्याणकरः)
क्षेत्रं जानाति क्षेत्रज्ञः	निशां करोति निशाकरः / निशाकृत्
रथं करोति रथकारः / रथकृत्	देवान् यजन्ति देवयजः
नभः स्पृशति नभःस्पृक्	भयं करोति भयङ्करः
प्रियं वदति प्रियंवदा	इष्टकामान् दोग्धि इष्टकामधुक्
योगे तिष्ठति योगस्थः	सोमं पिबन्ति सोमपाः

एतेषां प्रथमाविभक्तिरूपाणि त्रिषु वचनेषु एवं भवन्ति -

ए.व.	द्विव.	ब.व.
ब्रह्मविद्	ब्रह्मविदौ	ब्रह्मविदः
रथकृत्	रथकृतौ	रथकृतः
देवयज्	देवयजौ	देवयजः
नभःस्पृक्	नभःस्पृशौ	नभःस्पृशः
कामधुक्	कामदुहौ	कामदुहः
रथकारः	रथकारौ	रथकाराः
योगस्थः	योगस्थौ	योगस्थाः
सोमपः	सोमपौ	सोमपाः

(ड) यथोदाहरणम् अधः प्रदत्तानां विग्रहवाक्याणां समस्तपदानि त्रिषु वचनेषु रूपाणि च लिखत -

यथा - पुण्यं करोति	**पुण्यकृत्**	**पुण्यकृतौ**	**पुण्यकृतः**	
१. कर्म करोति	----------------	----------------	--------------	
२. तत्त्वं वेत्ति	----------------	तत्त्वविदौ	-------------	(गी.३.२८)
३. काव्यं करोति	----------------	----------------	-------------	
४. लोकक्षयं करोति	----------------	----------------	-------------	(गी.११.३२)
५. अन्यं भजति	अन्यभाक्	----------------	अन्यभाजः	(गी.९.३०)
६. यज्ञशिष्टामृतं भुङ्क्ते	यज्ञशिष्टामृतभुक्	----------------	-------------	
७. शस्त्रं बिभर्ति	शस्त्रभृत्	शस्त्रभृतौ	-------------	(गी.१०.३१)
८. मधु पिबति	----------------	----------------	--------------	
९. प्रकृतौ तिष्ठति	----------------	----------------	--------------	(गी.१५.७)

१०.	सर्वाणि बिभर्ति	------------------	सर्वभृतौ	--------------	(गी.१३.१४)
११.	दूरे तिष्ठति	------------------	------------------	--------------	(गी.१३.५)
१२.	कृत्स्नं वेत्ति	------------------	------------------	कृत्स्नविदः	
१३.	देहं बिभर्ति	देहभृत्	------------------	--------------	(गी.१४.१४)
१४.	सत्त्वे तिष्ठति	------------------	------------------	--------------	(गी.१४.१८)
१५.	अहोरात्रं वेत्ति	------------------	------------------	--------------	(गी.८.१७)
१६.	कुम्भं करोति	कुम्भकारः	------------------	-------------	
१७.	पत्रं करोति	------------------	------------------	-------------	
१८.	भाष्यं करोति	------------------	------------------	-------------	
१९.	एकस्मिन् तिष्ठति	------------------	------------------	-------------	(गी.१३.३०)
२०.	कमलासने तिष्ठति	------------------	कमलासनस्थौ	-------------	(गी.११.१५)
२१.	क्षीरं पिबति	------------------	------------------	-------------	
२२.	मधु लेढि	मधुलिट्	------------------	-------------	
२३.	धर्मं वेत्ति	------------------	------------------	-------------	
२४.	वेदं जानाति	------------------	------------------	वेदज्ञाः	
२५.	शास्त्रं जानाति	------------------	------------------	------------------	

****

सर्वगुणनिधानो कृष्णः

बहुव्रीहिसमासः

८



एतां कथां सावधानं पठत -

एकदा शौनकादयः ऋषयः सूतं पृष्टवन्तः - "हे व्यासशिष्य ! सम्प्रति अस्मिन् जगति कः एवम् **अनुपमगुणः**, **अमितवीर्यः**, **धर्मनिष्ठः**, **महारथः**, **प्रशान्तात्मा** ईर्ष्याद्वेषरहितः च अस्ति ? कः एवम् **अमितविक्रमः**, **प्रसन्नचित्तः**, **महेष्वासः**, वीरपुङ्गवः, ऐश्वर्यवान् च अस्ति यस्मिन् रणे क्रुद्धे जाते देवताः अपि भीताः भवन्ति । तस्य विगतस्पृहस्य महायोगिनः वृत्तान्तं भवतः मुखात् श्रोतुमिच्छामः । कृपया बोधयतु" इति ।

ऋषिवचनानि श्रुत्वा सूतः उक्तवान् - "सर्वगुणसम्पन्नाः जनाः तु लोके प्रायशः दुर्लभाः एव भवन्ति । तथापि अहं स्मरामि यत् एतत्सर्वगुणसम्पन्नः यदुवंशोद्भवः श्रीकृष्णः एव अस्ति, यस्मिन् एते सर्वे गुणाः एकत्रिताः सन्ति ।

सः श्रीकृष्णः **महातेजस्वी**, **सर्वलक्षणसम्पन्नः**, **अनुद्विग्नमनाः**, **उत्तमौजाः** महान् कर्मयोगी चास्ति । सः **शुद्धसत्त्वः**, **विनयशीलः**, क्षमाशीलः, **उदात्तमनाः**, नीतिज्ञः, समदर्शी लोकरञ्जकः च अस्ति ।

सर्वसमर्थः भूत्वापि सः अहङ्काररहितः, **धर्मप्रियः** **न्यायप्रियः** च अस्ति । सः श्रीकृष्णः महान् स्वाभिमानी, **दृढनिश्चयः**, **वीतरागभयक्रोधः**, **मुक्तसङ्गः**, **चक्रहस्तः**, **विश्वतोमुखः** कर्त्तव्यपालकः च अस्ति । धर्मपालने लोके तस्य समता नास्ति। सः स्वपराक्रमेण प्रबलतमं वैरिणम् अपि पराजेतुं शक्नोति । सः श्रीकृष्णः विद्याविनयसम्पन्नः कर्मवीरः च अस्ति । ऋषिवराः ! सः एकः आदर्शः नरनेता पूर्णपुरुषः चास्ति । बलबुद्धिपराक्रमेषु तस्य कुत्रापि समता नास्ति । सः धैर्ये हिमवान् इव, गाम्भीर्ये समुद्रः इव, पराक्रमे विष्णुः इव क्षमायां पृथिवी इव, प्रजापालने प्रजापतिः इव च अस्ति । स्वस्य एतैः गुणविशेषैः श्रीकृष्णः जगत्पूज्यः, सर्वप्रियः लीलाधरः च अस्ति ।"

इति उक्त्वा सूतः **सर्वगुणनिधानस्य** श्रीकृष्णस्य गौरवपूर्णं वृत्तान्तं शौनकादीन् ऋषीन् श्रावितवान् । सूतस्य गुणग्राहिणीं लोकोपयोगिनीं च वाचं श्रुत्वा ऋषयः नितरां प्रसन्नमनसः अभवन् ।

अभ्यासः

(क) पाठं पठित्वा अधः लिखितानां प्रश्नानाम् उत्तराणि एकपदेन यथोदाहरणं लिखत -

यथा - के सूतं पृष्टवन्तः ? शौनकादयः ऋषयः

१. यदुवंशोद्भवः कः अस्ति ? --------------------- ।

२. श्रीकृष्णे रणे क्रुद्धे जाते काः भीताः भवन्ति ? --------------------- ।

३. सर्वगुणसम्पन्नाः जनाः कुत्र प्रायशः दुर्लभाः भवन्ति ? --------------------- ।

४. लोकरञ्जकः कः उच्यते ? --------------------- ।

५. सर्वसमर्थः भूत्वापि कः अहङ्काररहितः अस्ति ? --------------------- ।

६. कः स्वपराक्रमेण प्रबलतमं वैरिणम् अपि पराजेतुं शक्नोति ? --------------------- ।

७. पराक्रमे श्रीकृष्णः कीदृशः आसीत् ? --------------------- ।

८. कः क्षमायां पृथिवी इव अस्ति ? --------------------- ।

९. सूतस्य गुणग्राहिणीं वाचं श्रुत्वा के नितरां प्रहृष्टाः अभवन् ? --------------------- ।

१०. पाठे 'व्यासशिष्य' इति सम्बोधनं कस्मै प्रयुक्तम् ? --------------------- ।

(ख) पाठं पठित्वा अधः लिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन यथोदाहरणं लिखत -

यथा - शौनकादयः ऋषयः व्यासशिष्यं सूतं कं प्रश्नं पृष्टवन्तः ?

उत्तरम् - शौनकादयः ऋषयः व्यासशिष्यं सूतं पृष्टवन्तः - "सम्प्रति अस्मिन् जगति कः एवम् **अनुपमगुणः**, **अमितवीर्यः**, **धर्मनिष्ठः**, **महारथः**, **प्रशान्तात्मा** ईर्ष्याद्वेषरहितः च अस्ति ? कः एवम् **अमितविक्रमः**, **प्रसन्नचित्तः**, **महेष्वासः**, वीरपुङ्गवः, ऐश्वर्यवान् च अस्ति ? यस्मिन् रणे क्रुद्धे जाते देवताः अपि भीताः भवन्ति। तस्य विगतस्पृहस्य महायोगिनः वृत्तान्तं वयं भवतः मुखात् श्रोतुमिच्छामः" इति।

१. मर्यादानुपालने लोके कस्य समता नास्ति ?

-- ।

२. लोके कीदृशाः जनाः दुर्लभाः भवन्ति ?

-- ।

३. श्रीकृष्णस्य धैर्यं गाम्भीर्यं च कीदृशम् अस्ति ?

-- ।

४. सर्वगुणनिधानस्य श्रीकृष्णस्य गुणगौरवं कः कं श्रावयति ?

-- ।

५. पाठात् श्रीकृष्णस्य पञ्च विशेषणानि चित्वा लिखत।

-- ।

(ग) यथोदाहरणं विग्रहवाक्याणि अथवा समस्तपदानि लिखत -

यथा - प्रसन्नं चित्तं यस्य सः = प्रसन्नचित्तः

१. अनुपमः गुणः यस्य सः = ---------------------- ।

२. ---------------------- = अमितविक्रमः

३. प्रसन्नः आत्मा यस्य सः = ---------------------- ।

४. उदात्तं मनः यस्य सः = ---------------------- ।

५. क्षमा शीलं यस्य सः = ---------------------- ।

६. ---------------------- = विनयशीलः

७. प्रियः धर्मः यस्य सः = ---------------------- । (प्रियधर्मा)

८. ---------------------- = न्यायप्रियः

९. शुद्धं सत्त्वं यस्य सः = ---------------------- ।

१०. मोघानि कर्माणि येषां ते = ---------------------- । (गी.९.१२)

एतेषु गीताश्लोकेषु स्थूलाक्षरैः मुद्रितानि पदानि परिशीलयत -

अत्र शूरा **महेष्वासा** भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च **महारथः** ॥ (गी.१.४)

अव्यक्तादीनि भूतानि **व्यक्तमध्यानि** भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ (गी.२.२८)

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ (गी.२.४१)

दुःखेष्वनुद्विग्नमनाः सुखेषु **विगतस्पृहः** ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ (गी.२.५६)

(घ) विग्रहवाक्यं दृष्ट्वा यथोदाहरणं रिक्तस्थानेषु समस्तपदानि लिखत -

यथा - महान् इष्वासः येषां ते = महेष्वासाः ।

१. महान् रथः यस्य सः = -- ।

२. अव्यक्तः आदिः येषां तानि = -- ।

३. व्यक्तं मध्यं येषां तानि = -- ।

४. अव्यक्तं निधनं येषां तानि = -- ।

५. व्यवसायः एव आत्मा यस्याः सा = -- ।

६. बह्व्यः शाखाः यासां ताः = -- ।

७. न विद्यते अन्तः यासां ताः = -- ।

८. अनुद्विग्नं मनः यस्य सः = ---।

९. विगता स्पृहा यस्मात् सः = ---।

१०. वीताः रागभयक्रोधाः यस्मात् सः = ---।

बहुव्रीहिसमासः

प्रायः अन्यपदार्थप्रधानः बहुव्रीहिः

एतानि वाक्यानि सावधानं परिशीलयत -

१. **प्राप्तोदकेषु** ग्रामेषु नगराणाम् अपेक्षया प्रदूषणं न्यूनं भवति।

२. **सञ्जातकुतूहलः** धृतराष्ट्रः सञ्जयम् उवाच।

३. **दत्तभोजनः** पुरुषः कृतज्ञतां निवेदयति।

४. **गतसन्देहः** पार्थः युद्धार्थं सज्जते।

५. **नीलकण्ठः** कैलासे वसति।

६. **बहुफले** वृक्षे वानराः चेष्टन्ते।

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां समस्तपदानां विग्रहवाक्याणि परिशीलयत -

प्राप्तम् उदकं यं सः	प्राप्तोदकः। (ग्रामः)
सञ्जातं कुतूहलं यस्मिन् सः	सञ्जातकुतूहलः। (धृतराष्ट्रः)
दत्तं भोजनं यस्मै सः	दत्तभोजनः। (पुरुषः)
गतः सन्देहः यस्मात् सः	गतसन्देहः। (पार्थः)
नीलः कण्ठः यस्य सः	नीलकण्ठः। (शिवः)
बहूनि फलानि यस्मिन् सः	बहुफलः। (वृक्षः)

उपरि दत्तानि सर्वाणि अपि उदाहरणानि बहुव्रीहिसमासस्य सन्ति।

यत्र समस्यमानपदार्थान् विहाय अन्यपदार्थस्य एव प्राधान्यं भवति तत्र बहुव्रीहिसमासः भवति। अस्मिन् समस्यमानपदानि अन्यपदार्थस्य विशेषणानि भवन्ति। अत्र न पूर्वपदार्थस्य प्राधान्यं भवति न वा उत्तरपदार्थस्य। अपि तु अन्यपदार्थस्य एव प्राधान्यं भवति।

यथा - 'पीताम्बरः गच्छति' इत्यत्र गमनक्रियायाः अन्वयः न पीतेन (वर्णविशेषेण) सह अस्ति न वा अम्बरेण (वस्त्रेण) सह। अपि तु पीतम् अम्बरं धृतवता विष्णुना सह अस्ति। परं सः विष्णुः न पूर्वपदस्यार्थः अस्ति न उत्तरपदस्यार्थः। सः तु अन्यः एव अर्थः। एवमेव - श्वेतम् अम्बरं यस्याः सा - श्वेताम्बरा (सरस्वती)। अत्र श्वेतवर्णविशेषस्य अम्बरस्य च अप्राधान्यम् अस्ति। श्वेतम् अम्बरं धृतवत्याः सरस्वत्याः एव प्राधान्यम्। एवं बहुव्रीहिसमासे सर्वत्र बोद्धव्यम्।

बहुव्रीहिसमासस्य भेदाः -

यद्यपि बहुव्रीहिसमासस्य बहवः भेदाः सन्ति तथापि अत्र प्रमुखाः केचन एव निरूप्यन्ते।

१. समानाधिकरणबहुव्रीहिः -

पूर्वं दर्शितेषु उदाहरणेषु महेष्वासाः, महारथः, अव्यक्तादीनि, व्यक्तमध्यानि, अव्यक्तनिधनानि, व्यवसायात्मिका, बहुशाखाः - इत्येतेषु विग्रहवाक्येषु पूर्वपदम् उत्तरपदं च प्रथमाविभक्त्यन्तम् अस्ति । एवं यत्र पदद्वयमपि समानविभक्त्यन्तं भवति सः समानाधिकरणबहुव्रीहिः इति उच्यते।

एतानि उदाहरणानि परिशीलयत -

१. अन्ये च बहवः शूरा मदर्थे **त्यक्तजीविताः**। (गी.१.९)
२. सौभद्रश्च **महाबाहुः** शङ्खान्दध्मुः पृथक् पृथक्। (गी.१.१८)
३. सततं कीर्तयन्तो मां यतन्तश्च **दृढव्रताः**। (गी.९.१४)
४. इन्द्रियार्थान्वि**मूढात्मा मिथ्याचारः** स उच्यते। (गी.३.६)
५. यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं **कर्मबन्धनः**। (गी.३.९)
६. तदर्थं कर्म कौन्तेय **मुक्तसङ्गः** समाचर। (गी.३.९)
७. कर्मणैव हि संसिद्धिमास्थिता **जनकादयः**। (गी.३.२०)
८. निराशीर्निर्ममो भूत्वा युध्यस्व **विगतज्वरः**। (गी.३.३०)
९. श्रेयान्स्वधर्मो **विगुणः** परधर्मात्स्वनुष्ठितात्। (गी.३.३५)
१०. **महाशनो महापाप्मा** विद्ध्येनमिह वैरिणम्। (गी.३.३७)

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां विग्रहवाक्यानि एवं भवन्ति -

१. त्यक्तं जीवितं यैः ते त्यक्तजीविताः (शूराः)
२. महान्तौ बाहू यस्य सः महाबाहुः (सौभद्रः)
३. दृढं व्रतं येषां ते दृढव्रताः (जनाः)
४. विमूढः आत्मा यस्य सः विमूढात्मा (जनः)
मिथ्या आचारः यस्य सः मिथ्याचारः (जनः)
५. कर्म बन्धनं यस्य सः कर्मबन्धनः (लोकः)
६. मुक्तः सङ्गः येन सः मुक्तसङ्गः (त्वम्)
७. जनकः आदिः येषां ते जनकादयः (ज्ञानिनः)
८. विगतः ज्वरः यस्मात् सः विगतज्वरः (त्वम्)
९. विगतः गुणः यस्मात् सः विगुणः (स्वधर्मः)
१०. महत् अशनं यस्य सः महाशनः (कामः)
महान् पाप्मा यस्मिन् सः महापाप्मा (कामः)

(ङ) यथोदाहरणं विग्रहवाक्याणां समस्तपदानि लिखत -

यथा -	**अव्ययः आत्मा यस्य सः**	**अव्ययात्मा**	**(गी.४.६)**
१.	वीताः रागभयक्रोधाः येभ्यः ते	-----------------	(गी.४.१०)
२.	यतौ चित्तात्मानौ येन सः	-----------------	(गी.४.२१)
३.	गतः सङ्गः यस्मात् सः (तस्य)	-----------------	(गी.४.२३)
४.	शब्दः आदिः येषां ते (तान्)	-----------------	(गी.४.२६)
५.	द्रव्यम् एव यज्ञः येषां ते	-----------------	(गी.४.२८)
६.	संशितं व्रतं येषां ते	-----------------	(गी.४.२८)
७.	यज्ञक्षपितं कल्मषं येषां ते	-----------------	(गी.४.३०)
८.	संयतानि इन्द्रियाणि येन सः	-----------------	(गी.४.३९)
९.	विशुद्धः आत्मा यस्य सः	-----------------	(गी.५.७)
१०.	सर्वात्मभूतः आत्मा यस्य सः	-----------------	(गी.५.७)

२. व्यधिकरणबहुव्रीहिः -

एतानि उदाहरणानि परिशीलयत -

१. अथ व्यवसितान् दृष्ट्वा धार्तराष्ट्रान् **कपिध्वजः**। (गी.१.२०)

२. यदि मामप्रतीकारम् अशस्त्रं **शस्त्रपाणयः**। (गी.१.४६)

३. दिव्यमाल्याम्बरधरं **दिव्यगन्धानुलेपनम्**। (गी.११.११)

४. किरीटिनं गदिनं **चक्रहस्तम्**इच्छामि त्वां द्रष्टुमहं तथैव। (गी.११.४६)

५. भजन्त्यन**न्यमनसो** ज्ञात्वा भूतादिमव्ययम्। (गी.९.१३)

६. एकत्वेन पृथक्त्वेन बहुधा **विश्वतोमुखम्**। (गी.९.१५)

७. यान्ति **देवव्रताः** देवान्पितॄन्यान्ति **पितृव्रताः**। (गी.९.२५)

८. क्षिप्रं भवति **धर्मात्मा** शश्वच्छान्तिं निगच्छति। (गी.९.३१)

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां विग्रहवाक्याणि एवं भवन्ति -

१. कपिः ध्वजेः यस्य सः कपिध्वजः (अर्जुनः)

२. शस्त्रं पाणौ येषां ते शस्त्रपाणयः (योद्धारः)

३. दिव्यगन्धस्य अनुलेपनं यस्मिन् तत् दिव्यगन्धानुलेपनम् (कृष्णस्य रूपम्)

४. चक्रं हस्ते यस्य सः चक्रहस्तः, तम् (कृष्णम्)

५. अन्यस्मिन् मनः येषां ते अन्यमनसः (न अन्यमनसः अनन्यमनसः - नञ्तत्पुरुषः) (महात्मानः)।

६. विश्वतः मुखानि यस्य सः विश्वतोमुखः, तम् (कृष्णम्)

७. देवेषु व्रतं येषां ते देवव्रताः (भक्ताः)

८. पितृषु व्रतं येषां ते पितृव्रताः (भक्ताः)
९. धर्मे आत्मा (मनः) यस्य सः धर्मात्मा (जनः)

एतेषु उदाहरणेषु एकं पदं प्रथमाविभक्त्यन्तम् अस्ति अन्यत्पदम् अन्यविभक्त्यन्तम्। एवं यत्र पूर्वपदम् उत्तरपदं च भिन्नविभक्त्यन्तं भवति सः व्यधिकरणबहुव्रीहिः।

(च) एतेषां विग्रहवाक्याणां समस्तपदं लिखत -

१. आत्मनि एव रतिः यस्य सः -------------------- । (गी.३.१७)
२. ब्रह्मकर्मणि समाधिः यस्य सः, तेन -------------------- । (गी.४.२४)
३. संशयः आत्मनि यस्य सः -------------------- । (गी.४.४०)
४. तस्मिन् बुद्धिः येषां ते -------------------- । (गी.५.१७)
५. तस्मिन् आत्मा येषां ते -------------------- । (गी.५.१७)
६. तस्मिन् निष्ठा येषां ते -------------------- । (गी.५.१७)
७. मयि चित्तं यस्य सः -------------------- । (गी.१८.५७)
८. मयि मनः यस्य सः -------------------- । (गी.१८.६५)

३. *सहपूर्वपदबहुव्रीहिः -*

एतानि उदाहरणानि परिशीलयत -

१. इहैकस्थं जगत्कृत्स्नं पश्याद्य **सचराचरम्**। (गी.११.७)
२. विसृज्य **सशरं** चापं शोकसंविग्नमानसः। (गी.१.४७)
३. **सहयज्ञाः** प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। (गी.३.१०)
४. यत्तु कामेप्सुना कर्म **साहङ्कारेण** वा पुनः। (गी.१८.२४)
५. एतत्क्षेत्रं समासेन **सविकारमु**दाहृतम्। (गी.१३.६)
६. सहजं कर्म कौन्तेय **सदोषम**पि न त्यजेत्। (गी.१८.४८)

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां विग्रहवाक्याणि एवं भवन्ति -

१. **चराचरैः** सह वर्तते इति **सचराचरम्** (जगत्)
२. शरेण सह वर्तते इति **सशरम्** (धनुः)
३. यज्ञेन सह वर्तन्ते इति **सहयज्ञाः** (प्रजाः)
४. अहङ्कारेण सह वर्तते इति **साहङ्कारः**, तेन (फलाभिलाषयुक्तः पुरुषः)
५. विकारेण सह वर्तते इति **सविकारम्** (शरीरम्)
६. दोषेण सह वर्तते इति **सदोषम्** (कर्म)

एतानि सर्वाणि सहपूर्वपदबहुव्रीहिसमासस्य उदाहरणानि सन्ति। अत्र सर्वत्र 'सह' इति अव्ययपदं तृतीयान्तेन पदेन समासं प्राप्नोति। समस्तपदे 'स' इत्येतावदेव दृश्यते। क्वचिद् 'सह' इत्यपि दृश्यते विकल्पकारणात्।

४. *प्रादिबहुव्रीहिः -*

एतानि गीतावाक्यानि परिशीलयत -

१.	**निर्द्वन्द्वो** नित्यसत्त्वस्थो **निर्योगक्षेम** आत्मवान्।	(गी.२.४५)
२.	**निराशीर्निर्ममो** भूत्वा युध्यस्व विगतज्वरः।	(गी.३.३०)
३.	त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो **निराश्रयः**।	(गी.४.२०)
४.	विषया विनिवर्तन्ते **निराहारस्य** देहिनः।	(गी.२.५९)
५.	निर्ममो **निरहङ्कारः** स शान्तिमधिगच्छति।	(गी.२.७१)
६.	अपि चेत्सु**दुराचारो** भजते मामनन्यभाक्।	(गी.९.३०)
७.	नि**र्मानमोहा** जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।	(गी.१५.५)
८.	स संन्यासी च योगी च न **निरग्निर्न** चाक्रियः।	(गी.६.१)

एतेषां समस्तपदानां विग्रहवाक्यम् एवं भवति -

१. निर्गतं द्वन्द्वं यस्मात् सः **निर्द्वन्द्वः** (पुरुषः)
निर्गतं योगक्षेमं यस्मात् सः **निर्योगक्षेमः** (पुरुषः)

२. निर्गता आशीः यस्मात् सः **निराशीः** (पुरुषः)
निर्गतः ममः यस्मात् सः **निर्ममः** (पुरुषः)

३. निर्गतः आश्रयः यस्मात् सः **निराश्रयः** (पुरुषः)

४. निर्गतः आहारः यस्य सः **निराहारः**, तस्य (योगी)

५. निर्गतः अहङ्कारः यस्मात् सः **निरहङ्कारः** (पुरुषः)

६. दुष्टः आचारः यस्य सः **दुराचारः** (पुरुषः)

७. निर्गतौ मानमोहौ येभ्यः ते **निर्मानमोहाः** (जनाः)

८. निर्गताः अग्नयः यस्मात् सः **निरग्निः** (जनः)

एतानि सर्वाणि प्रादिबहुव्रीहिसमासस्य उदाहरणानि सन्ति। प्रादयः उपसर्गाः इति वयं जानीमः। प्रादिभ्यः परं वर्तमानं धातुजप्रकृतिकं प्रथमाविभक्त्यन्तं पदम् अन्येन प्रथमा-विभक्त्यन्तेन पदेन सह समासं प्राप्नोति। तदा धातुजप्रकृतिकस्य पदस्य लोपः भवति। अतः समस्तपदे पूर्वपदस्य स्थाने उपसर्गः एव दृश्यते।

(छ) यथोदाहरणं विग्रहवाक्याणां समस्तपदानि लिखत -

यथा -	**प्रकृष्टः अञ्जलिः येषां ते**	**प्राञ्जलयः**	**(गी.११.२१)**
१.	प्रतिगतानि अनीकानि येषां तानि, तेषु	-------------------	(गी.११.३२)
२.	निर्गतं वैरं यस्मात् सः	-------------------	(गी.११.५५)
३.	निर्गताः गुणाः यस्मात् तत्	-------------------	(गी.१३.१४)
४.	निर्गतः दोषः यस्मात् तत्	-------------------	(गी.५.१९)

५. नञ्बहुव्रीहिः -

एतानि गीतावाक्यानि परिशीलयत -

१. बहुशाखा ह्य**नन्ता**श्च बुद्धयोऽव्यवसायिनाम्। (गी.२.४१)

२. जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यना**मयम्**। (गी.२.५१)

३. यदि माम**प्रतीकार**मशस्त्रं शस्त्रपाणयः। (गी.१.४६)

४. सर्वज्ञानविमूढांस्तान्विद्धि नष्टान**चेतसः**। (गी.३.३२)

५. इमं विवस्वते योगं प्रोक्तवानह**मव्ययम्**। (गी.४.१)

६. नायं लोकोऽस्त्य**यज्ञस्य** कुतोऽन्यः कुरुसत्तम। (गी.४.३१)

७. स ब्रह्मयोगयुक्तात्मा सुखम**क्षयम**श्नुते। (गी.५.२१)

८. इदं ते **नातपस्काय** नाभक्ताय कदाचन। (१८.६७)

९. श्रद्धावानन**सूय**श्च शृणुयादपि यो नरः। (१८.७१)

१०. यः सर्वत्रान**भिस्नेह**स्तत्तत्प्राप्य शुभाशुभम्। (२.५७)

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां विग्रहवाक्याणि एवं भवन्ति -

१. अविद्यमानः अन्तः यासां ताः अनन्ताः (शाखाः)
२. अविद्यमानः आमयः यस्मिन् तत् अनामयम् (पदम्)
३. अविद्यमानः प्रतीकारः यस्य सः अप्रतीकारः, तम् (अर्जुनः)
४. अविद्यमानं चेतः येषां ते अचेतसः (जनान्)
५. अविद्यमानः व्ययः यस्य सः अव्ययः, तम् (योगः)
६. अविद्यमानः यज्ञः यस्य सः अयज्ञः, तस्य (जनः)
७. अविद्यमानः क्षयः यस्य तत् अक्षयम्, तत् (सुखम्)
८. अविद्यमानं तपः यस्मिन् सः अतपस्कः, तस्मै (जनाय)
९. अविद्यमाना असूया यस्मिन् सः अनसूयः (जनः)
१०. अविद्यमानः अभिस्नेहः यस्य सः अनभिस्नेहः (जनः)

एतानि सर्वाणि नञ्बहुव्रीहिसमासस्य उदाहरणानि सन्ति। अविद्यमानम् इति पदं सुबन्तेन समासं प्राप्नोति। यदा समासः भवति तदा विद्यमानपदस्य विकल्पेन लोपः भवति। एतेषु सर्वेषु उदाहरणेषु लोपसहितं रूपमेव दर्शितम् अस्ति। (अतः अनघः इत्यर्थे अविद्यमानाघः इति अन्यत् रूपम्, एवम् अन्येषाम् अपि इति ज्ञातव्यम्।)

(ज) यथोदाहरणं निर्दिष्टान् श्लोकान् परिशील्य विग्रहवाक्याणां समस्तपदं लिखत -

यथा - अविद्यमानं सुखं यस्मिन् तत्	**असुखम्**	**(गी.९.३३)**
१. अविद्यमानं सत्यं यस्मिन् तत्	----------------	(गी.१६.८)
२. अविद्यमाना प्रतिष्ठा यस्मिन् तत्	----------------	(गी.१६.८)

३. अविद्यमानः ईश्वरः यस्मिन् तत् ---------------- (गी.१६.८)

४. अविद्यमाना दक्षिणा यत्र सः, तम् ---------------- (गी.१७.१३)

५. अविद्यमाना क्रिया यस्य सः ---------------- (गी.६.१)

६. अविद्यमानः आत्मा यस्य सः, तस्य ---------------- (गी.६.६)

७. अविद्यमानः परिग्रहः यस्य सः ---------------- (गी.६.१०)

८. अविद्यमानः क्षरः यस्य तत् ---------------- (गी.८.३)

९. अविद्यमानम् अघं यस्य सः, तत्सम्बुद्धौ ---------------- (गी.३.३)

(झ) अधः प्रदत्तानां विग्रहवाक्याणां समस्तपदानि यथोदाहरणं लिखत -

यथा - अविद्यमाना असूया यस्य सः अनसूयः (गी.१८.७१)

१. धृष्टः केतुः येन सः -- (गी.१.५)

२. उत्तमम् ओजः यस्य सः -- (गी.१.६)

३. विशाला बुद्धिः यस्य सः --

४. ज्ञानं मुद्रा यस्य सः --

५. तोत्रं पाणौ यस्य सः --

६. जयद्रथः एव जलं यस्याः सा --

७. गीताध्ययनं शीलं यस्य सः --

८. पद्मं नाभौ यस्य सः --

९. भुजगे शयनं यस्य सः --

१०. परमः इष्वासः यस्य सः -- (गी.१.१७)

११. महान्तौ बाहू यस्य सः -- (गी.१.१८)

१२. दुर्गता बुद्धिः यस्य सः -- (गी.१.२३)

१३. लोभोपहतं चेतः यस्य सः -- (गी.१.३८)

१४. जनकः आदिः येषां ते -- (गी.३.३०)

१५. शस्त्रं पाणौ येषां ते -- (गी.१.४६)

१६. भीमं कर्म यस्य सः -- (गी.१.१५)

१७. अनुद्विग्नं मनः यस्य सः -- (गी.२.५६)

१८. अविद्यमानं चेतः यस्य सः -- (गी.१७.६)

१९. नष्टः आत्मा येषां ते -- (गी.१६.९)

२०. वृकस्य उदरम् इव उदरं यस्य सः -- (गी.१.१६)

२१. मिथ्या आचारः यस्य सः -- (गी.३.६)

२२. शब्दः आदिः येषां ते -- (गी.४.२६)

२३. निर्गतं योगक्षेमं यस्मात् सः -- (गी.२.४५)

२४. कृतः अञ्जलिः येन सः -- (गी.११.३५)

(ञ) तत्तद संख्याकं गीताश्लोकं दृष्ट्वा मञ्जूषायां पदत्तानां विग्रहवाक्याणां समासरूपैः रिक्तस्थानानि पूरयत -

चराचरैः सह वर्तते इति तत् १. अनेकानि दिव्याभरणानि यस्मिन् तत् २. प्रकृष्टः ह्लादः यस्य सः ३. कुसुमानाम् आकरः यस्मिन् सः ४. मोघं ज्ञानं येषां ते ५. आदित्यस्य वर्णः इव वर्णः यस्य सः तम् ६. युक्तं चेतः येषां ते ७. सुविरूढानि मूलानि यस्य सः तम् ८. ज्ञानम् एव चक्षुषी येषां ते ९. छिन्नाः संशयाः यस्य सः १०. गता व्यथा यस्मात् सः ११. दीप्तहुताशः इव वक्त्रं यस्य सः तम् १२. दुर्गता मतिः यस्मात् सः १३. स्वप्नः शीलं यस्य सः तस्य १४. अनन्ताः बाहवः यस्य सः तम् १५. उत्सन्नः कुलधर्मः येषां ते तेषाम् १६. ज्ञानाग्निदग्धानि कर्माणि यस्य सः तम् १७. विभा वसु (धनम्) यस्य सः तस्मिन् १८. अविद्यमानं शस्त्रं यस्य सः तम् १९. निर्गतं त्रैगुण्यं यस्मात् सः।

यथा - इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्। (गी.११.७)

१. -- दिव्यानेकोद्यतायुधम्। (गी.११.१०)

२. -- चास्मि दैत्यानां कालः कलयतामहम्। (गी.१०.३०)

३. मासानां मार्गशीर्षोऽहमृतूनां --। (गी.१०.३५)

४. मोघाशा मोघकर्माणो -- विचेतसः। (गी.९.१२)

५. सर्वस्य धातारमचिन्त्यरूपम् -- तमसः परस्तात्। (गी.८.९)

६. प्रयाणकालेऽपि च मां ते विदुः --। (गी.७.३०)

७. अश्वत्थमेनं -- असङ्गशस्त्रेण दृढेन छित्त्वा। (गी.१५.३)

८. विमूढा नानुपश्यन्ति पश्यन्ति --। (गी.१५.१०)

९. त्यागी सत्त्वसमाविष्टो मेधावी --। (गी.१८.१०)

१०. अनपेक्षः शुचिर्दक्ष उदासीनो --। (गी.१२.१६)

११. पश्यामि त्वां -- स्वतेजसा विश्वमिदं तपन्तम्। (गी.११.१९)

१२. पश्यत्यकृतबुद्धित्वान्न स पश्यति --। (गी.१८.१६)

१३. न चाति -- जाग्रतो नैव चार्जुन। (गी.६.१६)

१४. अनादिमध्यान्तमनन्तवीर्यम् -- शशिसूर्यनेत्रम्। (गी.११.१९)

१५. -- मनुष्याणां जनार्दन। (गी.१.४४)

१६. -- तमाहुः पण्डितं बुधाः। (गी.४.१९)

१७. पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि --। (गी.७.९)

१८. यदि मामप्रतीकारम् -------------------------------- शस्त्रपाणयः। (गी.१.४६)

१९. त्रैगुण्यविषया वेदा ------------------------------------- भवार्जुन। (गी.२.४५)

अवधेयम्

१. ईकारान्ताः ऊकारान्ताः च स्त्रीलिङ्गशब्दाः ऋकारान्ताः शब्दाः च समानाधिकरण-बहुव्रीहौ कप्-प्रत्ययं प्राप्नुवन्ति। (नद्यृतश्च - अष्टाध्यायी ५. ४. १५३)

यथा - उत्तीर्णा रणनदी येन सः - **उत्तीर्णरणनदीकः**। दृष्टा चमूः येन सः - **दृष्टचमूकः**।
नदी माता यस्य सः - **नदीमातृकः**। बहवः कर्तारः यस्मिन् सः - बहुकर्तृकः (कार्यालयः)।

२. आकारान्तस्त्रीलिङ्गानां शब्दानां सकारादिशब्दानां च विकल्पेन कप्-प्रत्ययः भवति।

(शेषाद्विभाषा - अष्टाध्यायी ५. ४. १५४) आकारान्तः तु विकल्पेन ह्रस्वः भवति।

यथा - श्रुता गीता येन सः **श्रुतगीताकः** / **श्रुतगीतकः** / **श्रुतगीतः**
अविद्यमानं तपः यस्य सः **अतपस्कः**। (गी.१८.६७)
अनन्यं चेतः यस्य यः - **अनन्यचेतस्कः** / **अनन्यचेताः**

यथा - **अनन्यचेताः** सततं यो मां स्मरति नित्यशः। (गी.८.१४)

३. समानाधिकरणबहुव्रीहौ महत्-शब्दस्य तकारस्य आत्वं भवति।

(आन्महतः समानाधिकरणजातीययोः - अष्टाध्यायी ६. ३. ४६)

यथा - महत् अशनं यस्य सः - महाशनः। महान् पाप्मा यस्मिन् सः - महापाप्मा।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्। (गी.३.३७)

४. **नञ्, दुर्, सु इत्येतेभ्यः परतः विद्यमानाभ्यां प्रज्ञा-मेधाशब्दाभ्याम् असिच्प्रत्ययः भवति।** प्रत्यये कृते शब्दः सकारान्तः भवति।

यथा - अविद्यमाना मेधा यस्य सः - अमेधाः। शोभना प्रजा यस्य सः - सुप्रजाः।
दुर्गता मेधा यस्य सः - दुर्मेधाः। अल्पा मेधा यस्य सः - अल्पमेधाः।
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्। (गी.७.२३)

****

गीतामहिमा

एतानि गीतावाक्यानि परिशीलयत -

१. **शीतोष्णसुखदुःखेषु** तथा **मानापमानयोः** । (गी.६.७)
२. **सुखदुःखे** समे कृत्वा **लाभालाभौ जयाजयौ** । (गी.२.३८)
३. समं **कायशिरोग्रीवं** धारयन्नचलं स्थिरः । (गी.६.१३)
४. रसोऽहमप्सु कौन्तेय प्रभास्मि **शशिसूर्ययोः** । (गी.७.८)
५. **सिद्ध्यसिद्ध्योः** समो भूत्वा समत्वं योग उच्यते । (गी.२.४८)
६. बुद्धियुक्तो जहातीह उभे **सुकृतदुष्कृते** । (गी.२.५०)
७. यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य **शुभाशुभम्** । (गी.२.५७)
८. **सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु** । (गी.६.९)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि सर्वाणि पदानि द्वन्द्वसमासस्य उदाहरणानि सन्ति ।

अभ्यासः

क. अधः दत्तानां विग्रहवाक्याणां पुरतः उचितं समस्तपदं यथोदाहरणं लिखत -

यथा - शीतं च उष्णं च सुखं च दुःखं च, तेषु = शीतोष्णसुखदुःखेषु ।

१. मानश्च अपमानश्च तयोः = ------------------------------- ।
२. सुखं च दुःखं च = ------------------------------- ।
३. लाभश्च अलाभश्च = ------------------------------- ।
४. जयश्च अजयश्च = ------------------------------- ।
५. कायश्च शिरश्च ग्रीवा च एतेषां समाहारः = ------------------------------- ।
६. शशी च सूर्यश्च तयोः = ------------------------------- ।
७. सिद्धिश्च असिद्धिश्च तयोः = ------------------------------- ।
८. सुकृतं च दुष्कृतं च = ------------------------------- ।
९. शुभं च अशुभञ्च अनयोः समाहारः = ------------------------------- ।
१०. सुहृत् च मित्रं च अरिश्च उदासीनश्च मध्यस्थश्च द्वेष्यश्च बन्धुश्च, तेषु

= -- ।

सावधानं पठत -

श्रीमद्भगवद्गीता साक्षात् भगवतः दिव्या वाणी अस्ति। अस्याः महिमा अपारः अपरिमितश्च। अस्याः यथार्थवर्णनं कर्तुं न कोऽपि समर्थः। **शेषमहेशगणेशाः** अपि अस्याः महिमानं वक्तुमशक्ताः, एवं सति मनुष्याणां का कथा! **पुराणेतिहासेषु** अस्याः विस्तृतं वर्णनम् अस्ति, तथापि अस्याः विषये इदमित्थम् इति कथयितुं न शक्नुमः। सत्यं तु इदमस्ति यत् अस्याः महिमा **बुद्धिवचनाभ्याम्** अवर्णनीयः अपिरिमेयः च।

गीता कश्चन रहस्यमयः ग्रन्थः अस्ति। **वेदोपनिषत्पुराणानां** सारः अस्ति। अस्याः रचना सरला सुबोधा च अस्ति। गीता स्वल्पाभ्यासेन बोधगम्या भवति।

भगवतः **गुण-प्रभाव-स्वरूप-तत्त्वरहस्यानाम् उपासनाकर्मज्ञानानां** च वर्णनं गीतायां यथा अस्ति तथा अन्यत्र दुर्लभम्। अस्यामुक्तः उपदेशः अक्षरशः प्रामाणिकोऽस्ति। शास्त्रसारः इयं गीता कविकल्पनामात्रं नास्ति, अपि तु सर्वज्ञानानां सारः तत्त्वज्ञानं च अस्ति। ज्ञानवृद्धाः अस्याः तत्त्वज्ञानं मुक्तकण्ठेन गायन्ति। निखिले विश्वे इयं गीता प्रतिष्ठिता अस्ति।

अन्यानि कल्याणसाधनानि प्रायशः कर्मबन्धनम् उत्पादयन्ति। परन्तु इयं गीता सर्वविधकर्मबन्धनं छित्त्वा परमश्रेयः प्रददाति। अस्याः उपदेशेन मोहग्रस्तः अर्जुनः विगतमोहः अभवत्। गङ्गाजलेन जनाः **करचरणमुखनासिकस्य** शुद्धिं कुर्वन्ति, परन्तु गीतागङ्गोदकेन तेषां **बाह्याभ्यन्तरयोः** शुद्धिः भवति। सर्वधर्मावलम्बिनः नराः गीतागङ्गोदकेन स्नात्वा स्वकल्याणं कर्तुं शक्नुवन्ति इत्यत्र सन्देहः नास्ति। सर्वैः गीतायाः सम्यक् **श्रवणकीर्तनपठनपाठनमननधारणानि** करणीयानि। यतः **धर्मार्थकाममोक्षाणां** प्रदायिकाम् इमां गीतां स्वयं भगवान् पद्मनाभः स्वमुखेन उक्तवान्। यथा हि उक्तं श्रीमद्भगवद्गीतामहात्म्ये -

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥

ख. पाठानुगुणम् अधः लिखितानां प्रश्नानाम् उत्तराणि यथोदाहरणं पूर्णवाक्येन लिखत -

यथा - <u>का</u> भगवतः साक्षात् दिव्या वाणी अस्ति?
<u>श्रीमद्भगवद्गीता</u> भगवतः साक्षात् दिव्या वाणी अस्ति।

१. के गीतायाः महिमानं वक्तुमशक्ताः?

---।

२. कस्याः विषये इदमित्थम् इति कथयितुं न शक्नुमः ।

-- ।

३. बुद्धिवचनाभ्याम् अवर्णनीयः अपरिमेयः च कः ?

-- ।

४. निखिले विश्वे का प्रतिष्ठिता ?

-- ।

५. ज्ञानवृद्धाः मुक्तकण्ठेन किं गायन्ति ?

-- ।

६. गीतागङ्गोदकेन तेषां कथं शुद्धिः भवति ?

-- ।

७. सर्वैः कानि करणीयानि ?

-- ।

८. सर्वधर्मावलम्बिनः नराः केन स्नात्वा स्वकल्याणं कर्तुं शक्नुवन्ति ?

-- ।

९. इमां गीतां कः स्वमुखेन उक्तवान् ?

-- ।

१०. अन्यानि कल्याणसाधनानि प्रायशः किम् उत्पादयन्ति ?

-- ।

ग. अधः लिखितानां विग्रहवाक्यानां समस्तपदानि यथोदाहरणं लिखत -

यथा - शेषः च महेशः च गणेशः च	=	**शेषमहेशगणेशाः ।**
१. पुराणानि च इतिहासाः च, तेषु	=	------------------------------------ ।
२. ऋषयः च मुनयः च	=	------------------------------------ ।
३. बुद्धिः च वचनं च, ताभ्याम्	=	------------------------------------ ।
४. वेदाः च उपनिषदः च पुराणानि च, तेषाम्	=	------------------------------------ ।
५. गुणः च प्रभावः च स्वरूपं च तत्त्वं च रहस्यं च, तेषाम्	=	------------------------------------ ।
६. उपासना च कर्म च ज्ञानं च, तेषाम्	=	------------------------------------ ।
७. करौ च चरणौ च मुखं च नासिका च एतेषां समाहारः, तस्य	=	------------------------------------ ।
८. बाह्यः च आभ्यन्तरः च, तयोः	=	------------------------------------ ।

९. श्रवणं च कीर्तनं च पठनं च पाठनं च मननं च धारणं च = ------------------------------------ ।

१०. धर्मः च अर्थः च कामः च मोक्षः च, तेषाम् = ------------------------------------ ।

द्वन्द्वसमासः

प्रायः उभयपदार्थप्रधानः द्वन्द्वः

यदा समासे समस्यमानयोः द्वयोः पदयोः अथवा बहूनाम् अपि पदानां प्राधान्यं भवति तदा सः द्वन्द्वसमासः इति उच्यते । यथा - **भीष्मः च द्रोणः च** = भीष्मद्रोणौ । **युधिष्ठिरः च भीमः च अर्जुनः च नकुलः च सहदेवः च** = युधिष्ठिरभीमार्जुननकुलसहदेवाः ।

द्वन्द्वसमासः द्विधा भवति - १. इतरेतरद्वन्द्वः २. समाहारद्वन्द्वः

इतरेतरद्वन्द्वः -

मिलितानां पदानाम् एकस्मिन् क्रियापदे अन्वयः इतरेतरः इति उच्यते । इतरेतरः द्वयोः पदयोः भवति, बहूनाम् अपि पदानां भवति । परन्तु सर्वेषां समानं प्राधान्यम् । पदद्वयस्य समासे सति समस्तपदं द्विवचनान्तं भवति, ततोऽप्यधिकानां पदानां समासे सति समस्तपदं बहुवचनान्तं भवति । समस्तपदस्य तत् एव लिङ्गं भवति यत् लिङ्गं विग्रहवाक्ये समस्यमानस्य उत्तरपदस्य अन्तिमस्य वा भवति । यथा -

हरिः च हरः च	=	**हरिहरौ**
पुत्रः च कन्या च	=	पुत्रकन्ये
धनं च जनः च यौवनं च	=	धनजनयौवनानि
धर्मः च अर्थः च कामः च मोक्षः च	=	धर्मार्थकाममोक्षाः
मयूरी च कुक्कुटः च	=	मयूरीकुक्कुटौ
कुक्कुटः च मयूरी च	=	कुक्कुटमयूर्यौ
हरिः च हरः च गुरुः च	=	हरिहरगुरवः
माता च पिता च	=	मातापितरौ ।

समाहारद्वन्द्वः -

समाहारो नाम समूहः । इतरेतरवत् समाहारद्वन्द्वे द्वयोः अथवा बहूनाम् अपि पदानां समासः भवति । समाहारद्वन्द्वे समस्तपदं सदैव नपुंसकलिङ्गम् एकवचनान्तं च भवति । यथा -

मुखं च नासिका च अनयोः समाहारः	=	मुखनासिकम्
संज्ञा च परिभाषा च अनयोः समाहारः	=	संज्ञापरिभाषम्

अवधेयम्

अधो लिखितानां पदानां तु समाहारद्वन्द्वसमासः नित्यः भवति ।

१. प्राण्यङ्गानां तूर्याङ्गाणां सेनाङ्गानाञ्च ।

यथा -

प्राण्यङ्गानि -

पाणी च पादौ च एतेषां समाहारः	=	पाणिपादम्
करौ च चरणौ च एतेषां समाहारः	=	करचरणम्
मुखं च नासिका च एतयोः समाहारः	=	मुखनासिकम्
हस्तौ च पादौ च एतेषां समाहारः	=	हस्तपादम्

तूर्याङ्गाणि -

भेरी च पटहः च तयोः समाहारः	=	भेरीपटहम्
शङ्खः च दुन्दुभिः च तयोः समाहारः	=	शङ्खदुन्दुभि
मार्दङ्गिकाः च पाणविकाः च एतेषां समाहारः	=	मार्दङ्गिकपाणविकम्

सेनाङ्गानि -

रथिकाः च अश्वारोहाः च तेषां समाहारः	=	रथिकाश्वारोहम्

२. येषां च विरोधः शाश्वतिकः -

येषां जन्तूनां पारस्परिकः स्वाभाविकः विरोधः भवति तद्वाचकसुबन्तशब्दैः समाहारद्वन्द्वसमासः नित्यः भवति ।

यथा -

अहिः च नकुलः च अनयो समाहारः	=	अहिनकुलम्
अहयः च नकुलाः च एतेषां समाहारः	=	अहिनकुलम्
गौः च व्याघ्रः च अनयोः समाहारः	=	गोव्याघ्रम्
गावः च व्याघ्रः च एतेषां समाहारः	=	गोव्याघ्रम्

घ. यथोदाहरणम् अधः लिखितानां विग्रहवाक्याणां समस्तपदानि लिखत -

यथा -	**भीमः च अर्जुनः च**	=	**भीमार्जुनौ ।**
१.	द्वन्द्वः च मोहः च	=	---------------------------- ।
२.	रागः च द्वेषः च	=	---------------------------- ।
३.	नारी च नरः च	=	---------------------------- ।
४.	सुघोषः च मणिपुष्पकः च	=	---------------------------- ।
५.	योगः च क्षेमः च तयोः समाहारः	=	---------------------------- ।

६. यज्ञः च दानं च तपः च = ---------------------------- ।

७. सृष्टिः च स्थितिः च लयः च एतेषां समाहारः = ---------------------------- ।

८. हर्षः च अमर्षः च भयं च उद्वेगः च, तैः = ---------------------------- ।

९. केशवः च अर्जुनः च = ---------------------------- ।

१०. शिरः च ग्रीवा च तयोः समाहारः = ---------------------------- ।

ङ. यथोदाहरणं विग्रहवाक्यानि लिखत -

यथा - चराचराः चराश्च अचराश्च (गी.११.७)

१. यक्षरक्षसाम् -- । (गी.१०.२३)

२. अनलार्कौ -- । (गी.११.१७)

३. दुःखशोकामयाः -- ।

४. महर्षिसिद्धाः -- । (गी.११.२१)

५. कार्यकरणे -- ।

६. शरीरवाङ्मनोभिः -- । (गी.१८.१५)

७. कृषिगौरक्ष्यवाणिज्यम् -- । (गी.१८.४४)

८. इष्टानिष्टे -- ।

९. अक्षिशिरोमुखम् -- ।

१०. ब्राह्मणक्षत्रियविशाम् -- । (गी.१८.४१)

११. रुद्रादित्याः -- ।

१२. गन्धर्वासुरसिद्धाः -- । (गी.११.२२)

१३. लोष्टाश्मकाञ्चनानि -- ।

१४. मित्रारी -- । (गी.१४.२५)

१५. शशिसूर्यौ -- । (गी.११.१९)

१६. निन्दात्मसंस्तुती -- । (गी.१४. २४)

१७. प्राणापानौ -- । (गी.१५.१४)

च. अधः प्रदत्तानि गीतावाक्यानि परिशील्य तेषु स्थूलाक्षरैः मुद्रितानां पदानां समासं इतरेतरद्वन्द्वसमासं कृत्वा यथोदाहरणं पुनः लिखत -

यथा - प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मोक्षं च या वेत्ति सा सात्त्विकी बुद्धिः । (गी.१८.३०)

प्रवृत्तिनिवृत्ती कार्याकार्ये भयाभये बन्धमोक्षौ च या वेत्ति सा सात्त्विकी बुद्धिः ।

१. सात्त्विकप्रियाः आहाराः **रस्याः स्निग्धाः स्थिराः हृद्याः** च भवन्ति । (गी.१७.८)
सात्त्विकप्रियाः आहाराः -- भवन्ति ।

२. **ज्ञानं ज्ञेयं ज्ञानगम्यं** सर्वस्य हृदि स्थितम् । (गी.१३.१७)
-- सर्वस्य हृदि स्थितानि ।

३. **प्रकृतिं पुरुषं** चैव उभौ अनादी विद्धि । (गी.१३.१९)
-- चैव उभौ अनादी विद्धि ।

४. इति समासतः **क्षेत्रं ज्ञानं ज्ञेयं** च उक्तम् । (गी.१३.१८)
इति समासतः -- उक्तानि ।

५. **विकारान्** च **गुणान्** च प्रकृतिसम्भवान् विद्धि । (गी.१३.१९)
-- प्रकृतिसम्भवान् विद्धि ।

६. **सत्त्वं रजः तमः** इति गुणाः प्रकृतिसम्भवाः । (गी.१४.५)
-- इति गुणा प्रकृतिसम्भवाः ।

७. **लोभः प्रवृत्तिः कर्मारम्भः अशमः स्पृहा** च रजोगुणे प्रवृद्धे जायन्ते । (गी.१४.१२)
-- रजोगुणे प्रवृद्धे जायन्ते ।

८. भगवतः परमं धाम **सूर्यः शशाङ्कः पावकः** च न भासयन्ते । (गी.१५.६)
भगवतः परमं धाम ---------------------------------- न भासयन्ते ।

९. तामसप्रियं भोजनं **यातयामं गतरसं पर्युषितम् उच्छिष्टम् अमेध्यं** च भवति । (गी.१७.१०)
तामसप्रियाणां भोजनं -- भवति ।

१०. **अग्नौ चन्द्रमसि** च यत् तेजः अस्ति तत् ईश्वरीयं तेजः इति जानीहि । (गी.१५.१२)
------------------------------ यत् तेजः अस्ति तत् ईश्वरीयं तेजः इति जानीहि ।

११. द्वाविमौ पुरुषौ लोके **क्षरश्च अक्षर** एव च । (गी.१५.१६)
द्वाविमौ पुरुषौ लोके ---------------------------------- एव च ।

१२. द्वौ भूतसर्गौ लोकेऽस्मिन् **दैव आसुर** एव च । (गी.१६.६)
द्वौ भूतसर्गौ लोकेऽस्मिन् ---------------------------- एव च ।

१३. आसुराः जनाः **प्रवृत्तिं** च **निवृत्तिं** च न विदुः । (गी.१६.७)
आसुराः जनाः -- न विदुः ।

१४. **ब्रह्मणा ब्राह्मणाः वेदाश्च यज्ञाश्च** पुरा विहिताः । (गी.१७.२३)
ब्रह्मणा -- पुरा विहिताः ।

१५. यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। (गी.१८.५)

-------------------------- पावनानि मनीषिणाम्।

छ. यथोदाहरणं प्रदत्तेषु गीतावाक्येषु स्थूलाक्षरैः मुद्रितानां समस्तपदानां विग्रहान् लिखत -

यथा - विहारशय्यासनभोजनेषु। (११.४२) **विहारः च शय्या च आसनं च भोजनं च, तेषु।**

१. **मानापमानयोः**। (गी.१२.१८) --।

२. **धर्मकामार्थान्**। (गी.१८.३४) --।

३. **सुखदुःखानाम्**। (गी.१३.२०) --।

४. **प्रमादालस्यनिद्राभिः**। (गी.१४.८) --।

५. **मित्रारिपक्षयोः**। (गी.१४.२५) --।

६. **जन्ममृत्युजरादुःखैः**। (गी.१४.२०) --।

७. **कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः**। (गी.१७.९) --------------------------------
--।

८. **प्रमादमोहौ**। (गी.१४.१७) --।

९. **सिद्ध्यसिद्ध्योः**। (गी.१८.२६) --।

१०. **क्षेत्रक्षेत्रज्ञयोः**। (गी.१३.२) --।

११. **शुक्लकृष्णे**। (गी.८.२६) --।

ज. दैवीं सम्पदम् आसुरीं सम्पदं च प्राप्य जातस्य के गुणाः अवगुणाश्च भवन्ति इति मञ्जूषायां सूचितम् अस्ति। तदाधारेण यथोदाहरणं वाक्यानि रचयत -

दैवीं सम्पदं प्राप्य जातस्य

क. दमश्च दानं च यज्ञश्च भवति।	ख. ज्ञानं च अभयं च सत्त्वसंशुद्धिः च भवति।
ग. सत्यं च त्यागश्च अक्रोधश्च भवति।	घ. स्वाध्यायः च आर्जवं च तपश्च भवति।
ङ. दया च शान्तिः च भवति।	च. अचापलं च मार्दवं च भवति।
छ. क्षमा च धृतिः च तेजश्च भवति।	ज. शौचं च अद्रोहश्च भवति। (गी.१६.१/२/३)

आसुरीं सम्पदं प्राप्य अभिजातस्य

झ. दम्भः च दर्पः च अभिमानश्च भवति।	ञ. क्रोधश्च पारुष्यञ्च अज्ञानञ्च भवति। (गी.१६.४)

यथा - **दैवीं सम्पदं प्राप्य जातस्य <u>दमदानयज्ञाः भवन्ति</u> ।**

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

आसुरीं सम्पदं प्राप्य अभिजातस्य

८. -- ।

९. -- ।

****

नरोत्तमः अर्जुनः

कारकम्

१०

एतां कथां सावधानं पठत -

वनवाससमये अर्जुनः युधिष्ठिरस्य आज्ञया हिमालयपर्वते पाशुपतास्त्र-प्राप्त्यर्थं महादेवम् उद्दिश्य तपः आचरितवान् । दीर्घसमयानन्तरं महादेवः अर्जुनस्य धैर्यं परीक्षितुं निश्चितवान् । तदर्थं सः किरातवेषं धृत्वा अर्जुनस्य समीपम् आगतवान् । तस्मिन् एव समये तत्र 'मूकः' नाम दानवः वराहरूपेण अर्जुनस्य शरीरे आक्रमणं कृतवान् । तं दृष्ट्वा अर्जुनः किरातश्च अस्त्रेण प्रहारं कृतवन्तौ । एकस्मिन् एव समये द्वयोः अस्त्राभ्यां सः वराहः गतप्राणः अभवत् । यदा अर्जुनः वराहस्य शरीरे बाणद्वयं दृष्टवान् तदा सः अतीव क्रुद्धः अभवत् । सः किरातम् उक्तवान् - "एषः मम वराहः, मम बाणेन एषः हतः । अतः अस्मिन् मम अधिकारः वर्तते" । एतत् श्रुत्वा किरातः अपि क्रोधेन उक्तवान् - "नैव नैव । एषः तु मम मृगः । अहम् एतं प्रथमं दृष्टवान् । एषः मम बाणेन हतः" इति ।

शीघ्रमेव तयोः युद्धम् आरब्धम् । "अहम् आ दीर्घकालात् अत्र तपस्यां कुर्वन् अस्मि, अतः अत्र आगतेषु मृगेषु मम अधिकारः" इति उक्त्वा अर्जुनेन किरातं प्रति बाणाः प्रेरिताः । "अहं तु सर्वदा अरण्यवासी अस्मि, भवान् अत्रत्यः न दृश्यते । अतः वन्यजीवेषु मम एव आधिपत्यम्" इति वदता किरातेन बाणैः अर्जुनाय प्रत्युत्तरं दत्तम् । प्रवर्तमाने युद्धे "एतैः बाणैः मम किमपि अनिष्टं भवितुं न अर्हति, भवान् तु मम पुरतः बालकः इव भाति" इति किरातः अर्जुनम् उपहसितवान् । तेन कुपितः अर्जुनः तस्मिन् बाणवर्षाः कृतवान् । किञ्चित्कालानन्तरम् अर्जुनस्य अक्षयतूणीरः अपि रिक्तः अभवत् । तथापि किरातस्य काऽपि हानिः नाऽभवत् । तदा क्रुद्धः अर्जुनः गाण्डीवेन तं प्रहृतवान् । किन्तु गाण्डीवम् अपि गुप्तम् अभवत् । अर्जुनः खड्गेन किरातस्य मस्तके प्रहारं कृतवान् । परन्तु खड्गः अपि भग्नः जातः । तदा अर्जुनः चिन्तितवान् 'यद्यपि एषः किरातः न सामान्यः, यः मम प्रहारान् सोढवान् तथापि अधुना प्रारब्धं युद्धं तु करणीयम् एव । तत्र नास्ति अन्यविकल्पः' इति । अधुना अर्जुनः वृक्षैः प्रहारान् कृतवान् । शिलाखण्डान् क्षिप्तवान् । परन्तु किरातः पर्वतः इव सुस्थिरः भूत्वा तम् उपहसन् तान् सर्वान् नाशितवान् । अन्ते तयोः घोरं मुष्टियुद्धम् आरब्धम् । तदानीम् एव अर्जुनः सायं-पूजने भक्तैः शिवलिङ्गे अर्पितानि बिल्वपत्राणि किरातस्य मस्तके दृष्टवान् । बिल्वपत्राणां दर्शनेन विस्मितः अर्जुनः एषः किरातः साक्षात् शिवः एव, न अन्यः इति ज्ञातवान् ।

सः महादेवं साष्टाङ्गं नमस्कृतवान् । महादेवः स्वरूपं प्रदर्श्य तम् उक्तवान् - "भवतः पराक्रमेण अतुल्यधैर्येण च प्रसन्नोऽस्मि । वरं याचताम्" । अर्जुनः सविनयम् उक्तवान् - "प्रभो ! अहं पाशुपतास्त्रम् इच्छामि" । तदा महादेवः अर्जुनाय पाशुपतास्त्रं दत्तवान्, यत् प्राप्य अर्जुनः महाभारतयुद्धे अजेयः अभवत् ।

एतानि वाक्यानि सावधानं पठत विभक्तिरूपाणि च परिशीलयत -

१. **वनवासमये अर्जुनः** युधिष्ठिरस्य **आज्ञया हिमालयपर्वते** पाशुपतास्त्रप्राप्त्यर्थं **महादेवम्** उद्दिश्य **तपः** आचरितवान्।

२. श्रीकृष्णः **चक्रेण** शिशुपालं हतवान् ?

३. महादेवः **अर्जुनाय पाशुपतास्त्रं** दत्तवान्।

४. अर्जुनः **गाण्डीवेन** तं प्रहृतवान्।

५. अर्जुनः **महाभारतयुद्धे** अजेयः अभवत्।

६. **युधिष्ठिरः** धर्मसाम्राज्यस्य **संस्थापकः** ।

७. मन्दभाग्याः **भाग्यवते** असूयन्ति।

८. **तस्मै कृष्णाय** नमः।

९. अर्जुनः **श्रेष्ठरथे** उपविशति।

१०. पारिजातपुष्पाणि **वृक्षात्** पतन्ति।

११. **शस्त्रज्ञानं** विना युद्धं कठिनम्।

१२. गृध्रः **उन्नते आकाशे** डयते।

१३. **बीजेभ्यः** सस्यानि वर्धन्ते।

१४. **विदुराय** हरिभजनं रोचते।

१५. अलं **विषादेन**।

१६. **श्रीकृष्णः** भक्तिमुक्त्योः **प्रदाता** अस्ति।

१७. अर्जुनः युद्धकाले **विषादं** प्रकटितवान्।

१८. शिवः **किरातवेषं** धृत्वा अर्जुनस्य समीपम् आगतवान्।

१९. सूतः शौनकादीन् ऋषीन् **श्रीमद्भागवतं** श्रावितवान्।

२०. कौरवाः **रज्जुना** श्रीकृष्णं बन्धयितुम् इच्छन्ति स्म।

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितेषु शब्देषु विभिन्ना विभक्तिः प्रयुक्ता अस्ति।

अत्र अधः स्थूलाक्षरैः मुद्रितेषु शब्देषु 'उपपदविभक्तिः' अस्ति -

१. **कलियुगात्** पूर्वं द्वापरयुगम् आसीत्।
अत्र 'पूर्व' शब्दस्य योगे पञ्चमीविभक्तिः, 'कलियुगात्' इति रूपम्।

२. इन्द्राय **कवचेन** सह कुण्डलम् अपि ददाति।
अत्र 'सह'शब्दस्य योगे तृतीयाविभक्तिः, 'कवचेन' इति रूपम्।

प्रथमवाक्ये 'पूर्व' इति पदं निमित्तीकृत्य कलियुगशब्दात् पञ्चमीविभक्तिः आगता। द्वितीयवाक्ये 'सह' इति पदं निमित्तीकृत्य कवचशब्दात् तृतीयाविभक्तिः आगता। एवं किमपि पदं निमित्तीकृत्य या विभक्तिः प्रवर्तते सा उपपदविभक्तिः इत्युच्यते।

पूर्वं पठितेषु अन्येषु वाक्येषु स्थूलाक्षरैः मुद्रितेषु शब्देषु कारकविभक्तिः अस्ति। कारकं निमित्तीकृत्य प्रवृत्ता विभक्तिः कारकविभक्तिः इत्युच्यते। यथा -

१. **कृष्णः** यदुकुलश्रेष्ठः अस्ति।
२. विदुरः **कृष्णं** भजति।
३. **कृष्णेन** जगदिदं जायते।
४. **कृष्णाय** मे सर्वस्वम्। मम सर्वस्वं **कृष्णाय** अर्पितम्।
५. **कामात्** क्रोधः सञ्जायते।
६. **नद्यां** बहवः मीनाः सन्ति।

एतेषु वाक्येषु 'कृष्ण'शब्दे नानाविभक्तयः प्रयुक्ताः सन्ति। ताः सर्वाः कारकविभक्तयः। प्रथमे वाक्ये कृष्णः कर्तृकारकं, द्वितीये कर्मकारकं, तृतीये करणकारकं, चतुर्थे सम्प्रदानकारकं, पञ्चमे अपादानकारकं, षष्ठे अधिकरणकारकम्। कारकभेदात् विभक्तिभेदः दृश्यते।

कस्मिन् कारके का विभक्तिः इति पाणिनिना सूत्रैः निर्दिष्टम् अस्ति । कारकज्ञानाभावे वाक्यप्रयोगे दोषाः भवेयुः एव । यथा - **'गणेशः लेखन्या महाभारतं लिखति'** इति वाक्यं शुद्धम् । परन्तु **'गणेशः लेखनीं महाभारतं लिखति'** इति अशुद्धं वाक्यम् । यतः लेखनक्रियायां लेखनी करणम् । तस्याः तृतीयाविभक्तिः भवेत्, न तु द्वितीयाविभक्तिः । अतः **'गणेशः लेखन्या महाभारतं लिखति'** इति वाक्यं शुद्धम् । परन्तु लेखनक्रियायां गणेशस्य ईप्सिततमम् अस्ति महाभारतम् । अतः **'गणेशः महाभारतं लिखति'** इति वाक्यं प्रयोक्तव्यम् ।

किं नाम कारकम् ? क्रियान्वयि कारकम् । यत् क्रियया अन्वेति (सम्बन्धं प्राप्नोति) तत् कारकम् इति उच्यते । यथा -

गोविन्दः

१. **ओदनं पचति ।** — अत्र गोविन्दः पाकक्रियायाम् अन्वेति । अतः 'गोविन्द' कारकम् । तत् कर्तृकारकम् । ततः प्रथमा ।

२. **पाठं पठति ।** — अत्र पाठः पठनक्रियायाम् अन्वेति । अतः 'पाठ' कारकम् । तत् कर्मकारकम् । ततः द्वितीया ।

३. **वस्त्रेण आच्छादयति ।** — अत्र वस्त्रम् आच्छादनक्रियायाम् अन्वेति । अतः 'वस्त्र' कारकम् । तत् करणकारकम् । ततः तृतीया ।

४. **याचकाय अन्नं ददाति ।** — अत्र याचकः दानक्रियायाम् अन्वेति । अतः 'याचक' कारकम् । तत् सम्प्रदानकारकम् । ततः चतुर्थी ।

५. **आपणात् शर्कराम् आनयति ।** — अत्र आपणः आनयनक्रियायाम् अन्वेति । अतः 'आपण' कारकम् । तत् अपादानकारकम् । ततः पञ्चमी ।

६. **कटे उपविशति ।** — अत्र कटः उपवेशनक्रियायाम् अन्वेति । अतः 'कट' कारकम् । तत् अधिकरणकारकम् । ततः सप्तमी ।

कर्तृकारकं क्रियया साक्षात् अन्वेति । अन्यानि कारकाणि तु परम्परया क्रियया सह अन्वयं प्राप्नुवन्ति इति एतत् ज्ञेयम् ।

एतत् वाक्यं परिशीलयत -

दुर्योधनस्य मातुलः शकुनिः द्यूतक्रीडायाः नियमान् पत्रे विलिख्य राजभवनात् राजदूतेन युधिष्ठिराय प्रेषयति ।

अत्र कः प्रेषयति ? किं प्रेषयति ? केन प्रेषयति ? कस्मै प्रेषयति ? कस्मात् प्रेषयति ? कस्मिन् प्रेषयति ? इत्येतेषां प्रश्नानां शकुनिः प्रेषयति, नियमान् प्रेषयति, राजदूतेन प्रेषयति, युधिष्ठिराय प्रेषयति, राजभवनात् प्रेषयति, पत्रे विलिख्य प्रेषयति इत्येतानि वाक्यानि उत्तराणि भवन्ति । अतः प्रेषणक्रियायां षडपि कारकाणि अन्वितानि भवन्ति इति स्पष्टम् । कस्य नियमान् ? इति प्रश्नस्य तु 'द्यूतक्रीडायाः नियमान्' इति उत्तरं भवति । द्यूतक्रीडायाः अन्वयः नियमेषु एव, न तु प्रेषणक्रियायाम् । अतः एतादृशी षष्ठी कारकं न इति ज्ञातव्यम् ।

कारकाणि षट् सन्ति -

कर्तृकारकम्	**कर्मकारकम्**	**करणकारकम्**
सम्प्रदानकारकम्	**अपादानकारकम्**	**अधिकरणकारकम्**

कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ॥

कर्तृकारकम् -

एतानि वाक्यानि परिशीलयत -

एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
अपण्डितः प्रवदति ।	अपण्डितौ प्रवदतः ।	**अपण्डिताः प्रवदन्ति** । (गी.५.४)
अधर्मः अभिभवति । (गी.१.४०)	अधर्मौ अभिभवतः ।	अधर्माः अभिभवन्ति ।
सुखी क्षत्रियः लभते ।	**सुखिनौ क्षत्रियौ** लभेते ।	**सुखिनः क्षत्रियाः** लभन्ते । (गी.१२.३२)
त्वम् अर्हसि । (गी.३.२०)	युवाम् अर्हथः ।	यूयम् अर्हथ ।
अहम् आत्मानं सृजामि । (गी.४.७)	आवाम् आत्मानं सृजावः ।	वयम् आत्मानं सृजामः ।

अत्र **'अपण्डितः प्रवदति'** इत्यस्मिन् प्रथमे वाक्ये `वदनक्रियाम् **'अपण्डितः'** करोति । अतः **'अपण्डितः'** इति कर्ता अस्ति । अतः **यः क्रियां करोति सः कर्ता इति भवति । यः कर्ता भवति तत्र प्रथमाविभक्तिः भवति** । अयमेव 'कर्तरिप्रयोगः' कथ्यते । कर्तरिप्रयोगे क्रिया कर्तुः अनुसारेण भवति ।

(अर्थात् यदि कर्ता एकवचने भवति तर्हि क्रिया अपि एकवचने भवति । यथा - **'गाण्डीवं स्रंसते'** इति अत्र कर्ता **गाण्डीवम्** अस्ति । तत् एकवचने अस्ति । अतः **'स्रंसते'** इति क्रियापदम् अपि **एकवचने** अस्ति ।)

अपण्डितौ प्रवदतः इति **अपण्डितौ** इत्यत्र द्विवचनम् अस्ति अतः प्रवदतः इत्यत्र अपि द्विवचनम् अस्ति (अर्थात् यदि कर्ता द्विवचने भवति तर्हि क्रिया अपि द्विवचने भवति । यथा - **'योधौ युध्येते'** अत्र कर्ता **योधौ** इति **द्विवचने** अस्ति, **युध्येते'** इति क्रियापदम् अपि द्विवचने भवति ।)

तथैव **अपण्डिताः प्रवदन्ति** इत्यत्र अपि **अपण्डिताः** इत्यस्मिन् पदे **बहुवचनम्** अस्ति । अतः **प्रवदन्ति** इत्यत्र बहुवचनं कृतम् अस्ति । (अर्थात् यदि कर्ता बहुवचने भवति तर्हि क्रिया अपि बहुवचने भवति । यथा- **'अमूढाः गच्छन्ति'** अत्र कर्ता **अमूढाः** इति बहुवचने अस्ति, **'गच्छन्ति'** इति क्रियापदम् अपि **बहुवचने** अस्ति ।) एवमेव अन्यानि अपि वाक्यानि अवगन्तुं शक्नुमः ।

उपरि उक्तेषु वाक्येषु यत्र कर्ता एकवचने अस्ति तत्र क्रिया अपि एकवचने अस्ति । यत्र कर्ता द्विवचने बहुवचने वा अस्ति तत्र क्रिया अपि द्विवचने बहुवचने एव अस्ति । एवमेव यत्र कर्ता प्रथमपुरुषे तत्र क्रिया अपि प्रथमपुरुषे किञ्च यत्र कर्ता मध्यमपुरुषे उत्तमपुरुषे वा तत्र क्रिया अपि मध्यमपुरुषे उत्तमपुरुषे एव अस्ति । एवं सर्वत्र ज्ञेयम् ।

कर्मकारकम्

एतानि वाक्यानि परिशीलयत -

एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
स्थितप्रज्ञः **शान्तिम्** अधिगच्छति।	स्थितप्रज्ञौ **शान्तिम्** अधिगच्छतः।	स्थितप्रज्ञाः **शान्तिम्** अधिगच्छन्ति। (गी.२.७१)
यः यथा **मां** प्रपद्यते।	यौ यथा **मां** प्रपद्येते।	ये यथा **मां** प्रपद्यन्ते। (गी.४.११)
अहं **तान्** तथैव भजामि।	आवां **तान्** तथैव भजावः।	वयं **तान्** तथैव भजामः। (४.११)
यः **मां** सर्वत्र पश्यति।	यौ **मां** सर्वत्र पश्यतः।	ये **मां** सर्वत्र पश्यन्ति। (६.३०)
कश्चित् **मां** तत्त्वतः वेत्ति।	कौचित् **मां** तत्त्वतः वित्तः।	केचित् **मां** तत्त्वतः विदन्ति।

अत्र प्रथमवाक्ये स्थितप्रज्ञः अर्थात् कर्ता 'अधिगमन' इति क्रियया शान्तिं प्राप्तुम् इच्छति। **कर्तृद्वारा यद् वस्तु अभीप्सिततमं (सर्वाधिकम् इष्टम्) भवति तत् 'कर्म' इति भवति।** यत् कर्म भवति तत्र द्वितीयाविभक्तिः भवति। अतः अस्मिन् वाक्ये स्थितप्रज्ञेन प्राप्तुम् इष्टतमं वस्तु शान्तिः इति अस्ति। अतः तत् कर्मसंज्ञकम् भवति। कर्तरिप्रयोगे कर्मसंज्ञकशब्दे द्वितीयाविभक्तिः भवति।

(अर्थात् कर्तुः अनुसारं कर्मणः वचनस्य परिवर्तनं न भवति तथा च कर्मणः वचनानुसारं कर्तरि क्रियायां च परिवर्तनं न भवति। यथा - 'तत्परायणः जनः अपुनरावृत्तिं गच्छति' इति अत्र कर्ता एकवचने अस्ति क्रिया अपि एकवचने अस्ति कर्म अपि एकवचने अस्ति।)

अन्यानि वाक्यानि पश्यामः

'तत्परायणौ जनौ अपुनरावृत्तिं **गच्छतः'**। अत्र **कर्ता द्विवचने** अस्ति **क्रिया अपि द्विवचने** अस्ति परन्तु **कर्म एकवचने** अस्ति।

'तत्परायणाः जनाः अपुनरावृत्तिं **गच्छन्ति'** इति। (गी.५.१७) अत्र **कर्ता बहुवचने** अस्ति **क्रिया अपि बहुवचने** अस्ति परन्तु **कर्म एकवचने** अस्ति।

'अहं (अर्जुनः) देवं पश्यामि' इति। अत्र **कर्ता एकवचने** अस्ति **क्रिया अपि एकवचने** अस्ति **कर्म अपि एकवचने** अस्ति।

अहं (अर्जुनः) देवौ पश्यामि'। अत्र **कर्ता एकवचने** अस्ति **क्रिया अपि एकवचने** अस्ति परन्तु **कर्म द्विवचने** अस्ति।

'अहं (अर्जुनः) देवान् पश्यामि' इति। (११.१५) अत्र **कर्ता एकवचने** अस्ति **क्रिया अपि एकवचने** अस्ति परन्तु **कर्म बहुवचने** अस्ति।

उपर्युक्तवाक्यत्रये अपि कर्तरि क्रियायां च वचनदृष्ट्या भेदः अस्ति किन्तु **शान्तिः** इति कर्मसंज्ञकशब्दे भेदः नास्ति। एवमेव - अहं **तं** तथैव भजामि। अहं **तौ** तथैव भजामि। अहं **तान्** तथैव भजामि। (गी.४.११) इति अत्र त्रिषु वाक्येषु कर्मणि परिवर्तनम् अस्ति किन्तु कर्तरि क्रियायां च परिवर्तनं नास्ति। इत्थं सर्वत्र ज्ञेयम्।

यस्य शब्दस्य कर्मसंज्ञा भवति तस्मात् शब्दात् द्वितीयाविभक्तिः भवति।

अभ्यासः

क. एतानि वाक्यानि परिशील्य यथोदाहरणं तालिकायां दत्तानि रिक्तस्थानानि पूरयत -

१. वयं स्वबान्धवान् धार्तराष्ट्रान् हन्तुं न अर्हाः स्मः । (गी.१.३७)

२. अर्जुन ! क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ । (गी.२.३)

३. कौन्तेय ! त्वं युद्धे हतः भवसि चेत् स्वर्गं प्राप्स्यसि । (गी.२.३७)

४. कौन्तेय ! यदि त्वं युद्धं जेष्यसि तर्हि महीं भोक्ष्यसे । (गी.२.३७)

५. लोभोपहतचेतसः कुलक्षयकृतं दोषं न पश्यन्ति । (गी.१.३७)

६. ये मनः मयि आवेश्य माम् उपासते ते मे युक्ततमा मताः सन्ति । (गी.१२.२)

७. मधुसूदनः अश्रुपूर्णाकुलेक्षणं तम् इदं वाक्यम् उवाच । (गी.२.१)

८. ये तु इन्द्रियग्रामं सन्नियम्य ध्रुवम् अक्षरं मां पर्युपासते ते मां प्राप्नुवन्ति । (गी.१२.३)

९. यः एवं गुणैः सह पुरुषं प्रकृतिं च वेत्ति सः सर्वथा वर्तमानः अपि भूयो न अभिजायते । (गी.१३.२३)

१०. ते जगत् असत्यम् अप्रतिष्ठितम् अनीश्वरम् आहुः । (गी.१६.८)

क्रियापदम्	कर्ता	कर्म
स्मः	वयम्	स्वबान्धवान् / धार्तराष्ट्रान्

करणकारकम् -

एतानि वाक्यानि परिशीलयत -

बहवः **ज्ञानतपसा** पूताः (पवित्राः) जाताः । (गी.४.१०)

वयं **राज्यसुखलोभेन** स्वजनं हन्तुम् उद्यताः स्मः । (गी.१.४५)

त्वं सर्वं वृजिनं **ज्ञानप्लवेन** सन्तरिष्यसि । (गी.४.३६)

अस्माकं **राज्येन** किं प्रयोजनम् अस्ति ? (गी.१.३२)
जनकादयः **कर्मणा** एव संसिद्धिं प्राप्तवन्तः। (गी.३.१२)

यत् कारकं क्रियासिद्धौ अत्यन्तम् उपकारकं भवति तत् करणकारकम् इति उच्यते। करणकारके तृतीयाविभक्तिः भवति। उपरितनेषु वाक्येषु प्रथमवाक्ये बहूनां (जनानाम्) पवित्रीकरणक्रियायां ज्ञानतपः अत्यन्तम् उपकारकं साधनम् अस्ति। क्रियासिद्धौ यत् अत्यन्तम् उपकारकं भवति तस्य करणसंज्ञा भवति। यस्य करणसंज्ञा भवति तस्मात् शब्दात् तृतीयाविभक्तिः भवति। अस्मिन् वाक्ये ज्ञानतपः इति अत्यन्तम् उपकारकं साधनम् अस्ति। अतः तत् करणसंज्ञकं भवति। अतः एव अत्र तृतीयाविभक्तिः अस्ति।

अन्यानि वाक्यानि पश्यामः

➢ वयं **राज्यसुखलोभेन** स्वजनं हन्तुम् उद्यताः स्मः। (गी.१.४५) अस्मिन् वाक्ये अस्माकं स्वजनहननक्रियायां राज्यसुखलोभः अत्यन्तम् उपकारकं साधनम् अस्ति।[1]

➢ त्वं सर्वं वृजिनं **ज्ञानप्लवेन** सन्तरिष्यसि। (गी.४.३६) अस्मिन् वाक्ये तव (अर्जुनस्य) वृजिनसन्तरणक्रियायां ज्ञानप्लवः अत्यन्तम् उपकारकं साधनम् अस्ति।

➢ अस्माकं **राज्येन** किं प्रयोजनम् अस्ति ? (गी.१.३२) अस्मिन् वाक्ये अस्माकं (पाण्डवानाम्) प्रश्नवाचके किं शब्दे राज्यम् अत्यन्तम् उपकारकं साधनम् अस्ति।

➢ जनकादयः **कर्मणा** एव संसिद्धिं प्राप्तवन्तः। (गी.३.१२) अस्मिन् वाक्ये जनकादीनां संसिद्धिक्रियायां कर्म अत्यन्तम् उपकारकं साधनम् अस्ति।

एतानि सामान्यानि वाक्यानि अपि अवलोकयामः -

सञ्जयः **दिव्यदृष्ट्या** महाभारतयुद्धं दृष्टवान्। भीमः **गदया** दुःशासनं प्रहृतवान्।
श्रीकृष्णः अर्जुनं **गीतया** आत्मज्ञानं बोधितवान्।

एतेषु प्रथमवाक्ये सञ्जयस्य युद्धदर्शनक्रियायां **दिव्यदृष्टिः** अत्यन्तम् उपकारकं साधनम् अस्ति। द्वितीयवाक्ये भीमस्य प्रहारक्रियायां **गदा** अत्यन्तम् उपकारकं साधनम् अस्ति। तृतीयवाक्ये श्रीकृष्णस्य आत्मज्ञानबोधनक्रियायां गीता अत्यन्तम् उपकारकं साधनम् अस्ति। अतः **दिव्यदृष्टिशब्दस्य, गदाशब्दस्य गीताशब्दस्य** च करणसंज्ञा अभवत्। करणसंज्ञकेभ्यः शब्देभ्यः तृतीयाविभक्तिः भवति। अतः एतेभ्यः शब्देभ्यः तृतीयाविभक्तिः अभवत्। अत एव उपरि उक्तेषु वाक्येषु **दिव्यदृष्ट्या, गदया गीतया** इत्यत्र तृतीयाविभक्तिः दृश्यते। एवमेव अन्यत्र अपि ज्ञेयम्।

अवधेयम्

कर्मणिप्रयोगे भावेप्रयोगे च कर्तृकारकस्य अपि तृतीयाविभक्तिः भवति। यथा -

मोक्षकाङ्क्षिभिः विविधाः दानक्रियाः क्रियन्ते। (१७.२५) अस्य वाक्यस्य कर्तरि वाक्यं भवति -

---

1. यद्यपि इयं हेतौ तृतीया अस्ति, तथापि सरलतया बोधनाय करणतृतीया कथिता।

मोक्षकाङ्क्षिणः विविधाः दानक्रियाः कुर्वन्ति इति । अत्र मोक्षकाङ्क्षिणः इति कर्तृपदम् । उपर्युक्तवाक्ये अस्य एव कर्तुः कर्मवाच्ये तृतीयाविभक्तिः अभवत् ।

ख. अधः प्रदत्तेभ्यः वाक्येभ्यः तृतीयान्तं पदं चित्वा यथोदाहरणं कारकं निर्दिशत -

यथा - कृष्णेन गीता कथ्यते । (कर्मणिप्रयोगः)	**कृष्णेन**	**कर्तृकारकम्**
१. सेनापतिः सूच्या व्यूहं वर्णयति ।	------------------	------------------
२. भक्तेन मन्दिरं मार्ज्यते । (कर्मणिप्रयोगः)	------------------	------------------
३. भीष्मः बाणेन सेनायां भीतिं जनयति ।	------------------	------------------
४. सारथिः अश्वेन रथं चालयति ।	------------------	------------------
५. भीमेन दुःशासनः हन्यते । (कर्मणिप्रयोगः)	------------------	------------------
६. रात्रौ गुप्तचरेण सूचना प्राप्यते । (कर्मणिप्रयोगः)	------------------	------------------
७. द्रौपदी अक्षयपात्रेण भोजनं कारयति ।	------------------	------------------
८. पाण्डवाः पादाभ्याम् अरण्यं गच्छन्ति ।	------------------	------------------
९. कृष्णेन मोक्षः दीयते । (कर्मणिप्रयोगः)	------------------	------------------
१०. अर्जुनः बाणेन किरीटान् पातयति ।	------------------	------------------

सम्प्रदानकारकम् -

एतानि वाक्यानि परिशीलयत -

अपात्रेभ्यः दानं दीयते । (गी.१७.२२)
यः **देवेभ्यः** अप्रदाय भुङ्क्ते सः स्तेनः एव । (गी.३.१२)
शिवः **अर्जुनाय** पाशुपतास्त्रं ददाति ।
दुर्योधनः **द्यूतक्रीडायै**[2] युधिष्ठिरम् आह्वयति ।
कुन्ती **देवाय** पुष्पाणि समर्पयति ।

कर्ता कर्मणा यं सम्बन्धुम् इच्छति तत् सम्प्रदानकारकं भवति । सम्प्रदानकारके चतुर्थी विभक्तिः भवति । प्रथमवाक्ये कर्ता दानरूपकर्मणा अपात्रान् सम्बन्धुम् इच्छति । अत्र 'अपात्र' इति सम्प्रदानसंज्ञकं भवति । संप्रदानसंज्ञकात् अपात्र इति शब्दात् चतुर्थीविभक्तिः भवति ।

(अर्थात् कर्मसंज्ञकं वस्तु यः प्राप्नोति तस्य संप्रदानसंज्ञा भवति । यथा - सेवकः तूणीरम् अर्जुनाय ददाति इति अत्र तूणीरम् इति कर्मसंज्ञकं पदम् अस्ति । एतं तूणीरं कः प्राप्नोति ? अर्जुनः । यः प्राप्नोति तस्य का संज्ञा भवति ? संप्रदानसंज्ञा । संप्रदानसंज्ञकात् शब्दात् का विभक्तिः भवति ? चतुर्थीविभक्तिः । अतः एव अस्मिन् वाक्ये अर्जुनशब्दात् चतुर्थीविभक्तिः अभवत् । एवम् अन्येषु वाक्येषु अपि चिन्तयितुं शक्नुमः ।)

---

2 इयं तादर्थ्ये चतुर्थी अस्ति ।

अन्यानि वाक्यानि परिशीलयामः

- शिवः अर्जुनाय पाशुपतास्त्रं ददाति।
- दुर्योधनः द्यूतक्रीडायै युधिष्ठिरम् आह्वयति।
- कुन्ती देवाय पुष्पाणि समर्पयति।

एतेषु प्रथमवाक्ये शिवः स्वसमीपे विद्यमानं पाशुपतास्त्रदानरूपकर्मणा अर्जुनेन सह **सम्बन्धुम्** इच्छति। द्वितीयवाक्ये दुर्योधनः युधिष्ठिरस्य सम्बन्धः द्यूतक्रीडया भवतु इति इच्छति। एवं **तृतीयवाक्ये** कुन्ती पुष्पसमर्पणरूपकर्मणा देवेन सह सम्बन्धम् इच्छति। अतः **अर्जुनशब्दस्य, द्यूतक्रीडाशब्दस्य देवशब्दस्य** च सम्प्रदानसंज्ञा अभवत्। संप्रदानसंज्ञकेभ्यः शब्देभ्यः चतुर्थीविभक्तिः भवति। अत एव उपरि उक्तेषु वाक्येषु **अर्जुनाय, द्यूतक्रीडायै, देवाय** इत्यत्र चतुर्थीविभक्तिः दृश्यते। एवमेव अन्यत्र अपि ज्ञेयम्।

ग. मञ्जूषायां प्रदत्तानां पदानां साहाय्येन यथोदाहरणं रिक्तस्थानानि पूरयत -

परीक्षिते, कृष्णाय, शिष्यान्, भक्तेभ्यः, द्वारकाधीशाय, सैनिकेभ्यः, **वामनाय**, श्रोतृभ्यः, भीमाय, अर्जुनाय, अश्वेभ्यः

यथा - बलिः <u>वामनाय</u> त्रिपादमितां भूमिं ददाति।

१. शुकदेवः --------------------------- उपदेशं यच्छति।

२. गुरुः ------------------------- व्रतं बोधयति।

३. अर्चकः ---------------------------- प्रसादं वितरति।

४. भीष्मः -------------------------------- आसनं निवेदयति।

५. सेनापतिः ---------------------------- युद्धादेशं यच्छति।

६. रुक्मणी -------------------------- पत्रं प्रेषयति।

७. वक्ता ---------------------------- धन्यवादम् अर्पयति।

८. कृष्णः --------------------------- शान्तेः महत्त्वं बोधयति।

९. कृष्णः ------------------------------ दिव्यं चक्षुः दत्तवान्।

१०. सारथिः ------------------------ जलं ददाति।

अपादानकारकम् -

एतानि वाक्यानि परिशीलयत -

१. भीमः **कुरुक्षेत्रात्** आगच्छति।

२. कर्णः **रथात्** अवतरति।

३. दुर्योधनः **कोषागारात्** वितरति।

विश्लेषे (विभागे) साध्ये अवधिभूतं कारकम् अपादानसंज्ञकं भवति । अपादानसंज्ञकात् शब्दात् पञ्चमीविभक्तिः भवति । एतेषु प्रथमवाक्ये भीमस्य कुरुक्षेत्रस्य च विभागः जातः । कुरुक्षेत्रं विभागस्य आश्रयभूतम् अस्ति । द्वितीयवाक्ये रथस्य कर्णस्य च विभागः जातः । रथः विभागस्य आश्रयभूतः अस्ति । तृतीयवाक्ये धनस्य कोषागारस्य च विभागः जातः । कोषागारं विभागस्य आश्रयभूतम् अस्ति । अत एव **कुरुक्षेत्रशब्दस्य, रथशब्दस्य कोषागारशब्दस्य** च अपादानसंज्ञा अभवत् । अपादानसंज्ञकेभ्यः शब्देभ्यः पञ्चमीविभक्तिः भवति । अत एव उपरि उक्तेषु वाक्येषु **कुरुक्षेत्रात्, रथात्, कोषागारात्** इत्यत्र पञ्चमीविभक्तिः दृश्यते । एवमेव अन्यत्र अपि ज्ञेयम् ।

घ. एतानि वाक्यानि पठित्वा यथोदाहरणं तालिकायां दत्तानि रिक्तस्थानानि पूरयत -

१. द्रौपदी पुष्पवाटिकायाः पुष्पम् आनयति ।
२. अर्जुनः अरण्यात् अश्वत्थामानम् आनयति ।
३. अर्जुनस्य हस्तात् गाण्डीवं स्रंसते ।
४. दुर्योधनः पाण्डवान् हस्तिनापुरात् निष्कासयति ।
५. द्रौपदी अक्षयपात्रात् ओदनं परिवेषयति ।
६. महारथः रथात् अवतरति ।
७. सैनिकः तूणीरात् शरान् स्वीकरोति ।
८. कृष्णः मथुरायाः द्वारकां गतवान् ।
९. भीमः रथात् शत्रून् क्षिपति ।
१०. कुरुक्षेत्रात् कः पलायनं कृतवान् ?

	क्रिया	कयोः विभागः जातः ?	अपादानकारकम्
यथा - १.	आनयनक्रिया	पुष्पवाटिकायाः पुष्पस्य च	पुष्पवाटिका
२.			
३.			
४.			
५.			
६.			
७.			
८.			
९.			
१०.			

अधिकरणकारकम्

एतानि वाक्यानि परिशीलयत -

अर्जुनः **रथे** उपविशति। (गी.१.४७)

धार्तराष्ट्राः मां **रणे** हन्युः। (गी.१.४६)

अनियतं (दीर्घकालं यावत्) **नरके** वासः भवति। (गी.१.४४)

आत्मनि एव सन्तुष्टः भवति। (गी.३.१७)

योद्धारः **कुरुक्षेत्रे** युद्ध्यन्ते।

भीष्मः **शरशय्यायां** शेते।

कर्तुः कर्मणः च आधारः अधिकरणसंज्ञकः भवति । अधिकरणसंज्ञकेभ्यः शब्देभ्यः **सप्तमीविभक्तिः** भवति । प्रथमवाक्ये अर्जुनस्य आधारः रथः अस्ति । यः आधारः भवति तस्य **अधिकरणसंज्ञा भवति ।** अधिकरणसंज्ञकात् शब्दात् सप्तमीविभक्तिः भवति । भिन्नरूपेण पश्यामः यथा - **अर्जुनः रथे उपविशति** इति अस्मिन् वाक्ये **अर्जुनस्य उपवेशनक्रिया अस्ति** अर्थात् अर्जुनः उपविशति । अर्जुनः कस्मिन् उपविशति ? रथे । तर्हि अर्जुनस्य आधारः कः अभवत् ? रथः । यः आधारः भवति तस्य **का संज्ञा भवति ?** अधिकरणसंज्ञा । यस्य अधिकरणसंज्ञा भवति तस्मात् का विभक्तिः भवति ? सप्तमीविभक्तिः । अतः **रथ** इति शब्दात् सप्तमीविभक्तिः विहिता अस्ति । अन्यानि वाक्यानि पश्यामः -

योद्धारः **कुरुक्षेत्रे** युद्ध्यन्ते। भीष्मः **शरशय्यायां** शेते।

प्रथमवाक्ये योद्धृणाम् आधारः **कुरुक्षेत्रम्** अस्ति। द्वितीयवाक्ये भीष्मस्य आधारः **शरशय्या** अस्ति। अतः **कुरुक्षेत्रशब्दस्य शरशय्याशब्दस्य** च अधिकरणसंज्ञा अभवत्। अधिकरण-संज्ञकेभ्यः शब्देभ्यः सप्तमीविभक्तिः भवति। अत एव उपरि उक्ते वाक्यद्वये **कुरुक्षेत्रे, शरशय्यायाम्** इत्यत्र सप्तमीविभक्तिः दृश्यते। एवमेव अन्यत्र अपि ज्ञेयम्।

उपरि उक्तेषु उदाहरणेषु कर्तुः आधारस्य अधिकरणसंज्ञा विहिता । कर्मणः आधारस्य अपि अधिकरणसंज्ञा भवितुम् अर्हति । यथा - **धनञ्जयः कुरुक्षेत्रे बान्धवान् पश्यति ।** अत्र बान्धवान् इति कर्म अस्ति । तेषाम् आधारः कुरुक्षेत्रम् अस्ति । आधारकारणात् कुरुक्षेत्रशब्दस्य अधिकरणसंज्ञा अभवत् । अधिकरणसंज्ञाकारणात् कुरुक्षेत्रशब्दात् सप्तमीविभक्तिः अभवत् । एवमेव **कर्मकरः फलके सूचनां लिखति ।** अत्र **सूचना** कर्म अस्ति । तस्य सूचनारूपकर्मणः आधारः फलकम् अस्ति । अतः फलकशब्दात् सप्तमीविभक्तिः अभवत् ।

'धार्तराष्ट्राः मां <u>रणे</u> हन्युः ।' अस्मिन् वाक्ये **माम्** इति पदं कर्म अस्ति। एतस्य कर्मणः आधारः कः अस्ति ? रणः। आधारकारणात् अधिकरणसंज्ञा सप्तमीविभक्तिः च।

'अनियतं (दीर्घकालं यावत्) <u>नरके</u> वासः भवति ।' (गी.१.४४) अस्मिन् वाक्ये **अनियतम्** इति पदं कर्म अस्ति। एतस्य कर्मणः आधारः कः अस्ति ? नरकः। आधारकारणात् अधिकरणसंज्ञा सप्तमीविभक्तिः च।

एवमेव अन्यत्र अपि ज्ञेयम्।

ङ. मञ्जूषायां प्रदत्तानां पदानां साहाय्येन यथोदाहरणं रिक्तस्थानानि पूरयत -

भूमौ, एकादशाध्याये, तूणीरे, कुरुक्षेत्रे, गीतायाम्, नैमिषारण्ये, युद्धे, सर्वेषु, वने, सभायां, व्यूहे

यथा - वनवासकाले पाण्डवाः वने निवसन्ति स्म ।

१. अर्जुनस्य ---------------------- विविधाः बाणाः आसन् ।

२. गीतायाः ----------------------------- विराट्पुरुषस्य रूपं वर्णितमस्ति ।

३. तस्मिन् -------------------- अभिमन्युः प्रविष्टवान् ।

४. ---------------------------- शौनकादयः ऋषयः निवसन्ति ।

५. ---------------------------- सप्तशतं श्लोकाः सन्ति ।

६. कृष्णः ----------------------- विद्यते ।

७. अस्यां ------------------------------ द्रौपद्याः अपमानम् अभवत् ।

८. कर्णः ---------------------------- पतति ।

९. महाभारतयुद्धं ---------------------------------- अभवत् ।

१०. वीराः ---------------------- वीरगतिं प्राप्नुवन्ति ।

आधारः त्रिविधः भवति - १. औपश्लेषिकः २. अभिव्यापकः ३. वैषयिकः

औपश्लेषिकः = सः आधारः यत्र आधेयस्य एकदेशेन व्याप्तिः भवति ।
यथा - **कुरुक्षेत्रे** अर्जुनः अस्ति ।
अत्र अर्जुनः आधेयः कर्ता च । सः कुरुक्षेत्रस्य एकदेशे (एकस्मिन् भागे) अस्ति, न तु समग्रे क्षेत्रे अस्ति ।
एवम् आधेयस्य एकदेशेन व्याप्तिः इति अयम् आधारः **औपश्लेषिकः** आधारः अस्ति ।
यथा वा - **कपाटिकायां** कलशः अस्ति । **अरण्ये** व्याघ्रः भ्रमति ।

अभिव्यापकः = सः आधारः यत्र आधेयस्य सर्वदेशेन व्याप्तिः भवति ।
यथा - **गीतायां** ज्ञानम् अस्ति ।
अत्र ज्ञानम् आधेयं कर्तृ च । तत् गीतायां सर्वदेशे (सर्वस्मिन् भागे) अस्ति, न तु एकदेशे । एवम् आधेयस्य सर्वदेशेन व्याप्तिरिति अयम् आधारः **अभिव्यापकः** आधारः ।
यथा वा - **कृष्णे** ईश्वरत्वम् अस्ति । **चन्दनकाष्ठे** सुगन्धः अस्ति । **नृषु** पौरुषम् अस्ति । **सूर्ये** प्रभा अस्ति । **माणिक्ये** प्रभा अस्ति । **जले** रसः अस्ति । **शरीरे** रुधिरं प्रवहति ।

वैषयिकः = सः आधारः यत्र आधेयस्य विषयतादिना सम्बन्धः भवति ।
यथा - अर्जुनस्य **श्रीकृष्णे** श्रद्धा अस्ति ।
अत्र श्रद्धा आधेया कर्त्री च । सा **श्रीकृष्णे** विषयतासम्बन्धेन अस्ति । **श्रीकृष्णविषये** श्रद्धा अस्ति इति तात्पर्यम् । अतः अयम् आधारः **वैषयिकः** आधारः ।
यथा - मम **व्याकरणे** रुचिः वर्तते ।
स्वस्य **राष्ट्रियत्वे** अभिमानः आवश्यकः ।

च. अधः प्रदत्तानि वाक्यानि पठित्वा यथोदाहरणं तालिकां पूरयत -

यथा - तिलेषु तैलं वर्तते ।

१. लतायां पुष्पाणि विकसन्ति ।
२. लवकुशयोः सीतायां प्रीतिः वर्तते ।
३. अग्नौ तेजः अस्ति ।
४. समुद्रे लवणम् अस्ति ।
५. बलवति बलम् अस्ति ।
६. भक्ताः मुनौ विश्वासं कुर्वन्ति ।
७. गुरुषु श्रद्धां प्रदर्शयति ।
८. राज्ञी शरीरे आभूषणानि धरति ।
९. आकाशे शब्दः अस्ति ।
१०. दशरथस्य श्रीरामे वात्सल्यम् अस्ति ।
११. हिमालये भूर्जवृक्षान् प्राप्नुमः ।
१२. सूत्रे मणिः अस्ति ।
१३. गङ्गातीरे ग्रामः अस्ति ।
१४. पृथिव्यां गन्धः अस्ति ।

कः आधारः	कीदृशः आधारः		कः आधारः	कीदृशः आधारः
यथा - तिलाः	अभिव्यापकः आधारः		८.	
१.			९.	
२.			१०.	
३.			११.	
४.			१२.	
५.			१३.	
६.			१४.	
७.				

छ. वाक्येषु स्थूलाक्षरैः मुद्रितानां पदानां कारकं विभक्तिं च यथोदाहरणं तालिकायां लिखत -

१. **कुरुक्षेत्रे** योद्धारः शोभन्ते ।
२. **अभिमन्युः** चक्रव्यूहं प्रविशति ।
३. कृष्णः **अर्जुनम्** उपदिशति ।
४. सञ्जयः **दिव्यदृष्ट्या** महाभारतं पश्यति ।

५. द्रोणः **अर्जुनाय** दिव्यास्त्राणि ददाति।

६. युधिष्ठिरः **हस्तिनापुरात्** आगच्छति।

७. विदुरः **सभायां** नीतिवचनं कथयति।

८. सुदामा **द्वारकां** गच्छति।

९. द्रौपदी **दुःशासनाय** क्रुध्यति।

१०. **नकुलेन** सह सहदेवः व्यायामशालां गच्छति।

११. व्यासः **महाभारतं** रचयति।

१२. **गणेशः** महाभारतम् अलिखत्।

१३. धृतराष्ट्रः **गीतां** श्रावयितुं सञ्जयं प्रार्थयते।

१४. जयद्रथः **अभिमन्युं** मारयति।

१५. भीष्मः **शरशय्यायां** शेते।

१६. कुन्ती **श्रीकृष्णेन** सह चर्चां करोति।

१७. रथम् अभितः **कौरवपाण्डवयोः** सैन्यम् अस्ति।

१८. **अष्टादशदिनानि** यावत् महाभारतयुद्धं प्राचलत्।

कारकम्	विभक्तिः		कारकम्	विभक्तिः
यथा - १. अधिकरणम्	**सप्तमी**		१०.	
२.			११.	
३.			१२.	
४.			१३.	
५.			१४.	
६.			१५.	
७.			१६.	
८.			१७.	
९.			१८.	

ज. यथोदाहरणं कोष्ठके दत्तस्य पदस्य उचितविभक्तिरूपेण रिक्तस्थानानि पूरयत -

यथा - नौका गभीरे सागरे प्रविशति। (सागरः)

१. सञ्जयः ------------------------------ युद्धवृत्तान्तं श्रावयति। (धृतराष्ट्रः)

२. ------------- सात्त्विकाः राजसाः तामसाः भावाः सन्ति तान् मत्तः एव विद्धि। (यद्) (गी.७.१२)

३. अच्युतः ----------------------- मध्ये रथं स्थापितवान्। (सेने) (गी.१.२१)

४. अर्जुनस्य --------------------- गाण्डीवं स्रंसते। (हस्तः) (गी.१.३०)

५. मे ------------------------- वेपथुः रोमहर्षः च जायते। (शरीरम्) (गी.१.२९)

६. पाण्डवाः ------------------------------ पलायितवन्तः। (लाक्षागृहम्)

७. ------------------------ सनातनाः कुलधर्माः प्रणश्यन्ति। (कुलक्षयः) (गी.१.४०)

८. ------------ सदृशं पवित्रम् इह विद्यते। (ज्ञानम्) (गी.४.३८)

९. हे कौन्तेय ! तस्मात् ------------------ कृतनिश्चयः उत्तिष्ठ। (युद्धम्) (गी.२.३७)

१०. --------------------------- सेनायाः अग्रे तिष्ठति। (सेनानायकः)

११. पार्थ ! यः यदा मनोगतान् सर्वान् कामान् प्रजहाति आत्मना एव ------- तुष्टः तदा स्थितप्रज्ञः उच्यते। (आत्मा) (गी.२.५५)

१२. सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ समे कृत्वा ततः -------- युज्यस्व। (युद्धम्) (गी.२.३८)

१३. ---------------------- देहिनः रसवर्जं न हि वर्तन्ते। (निराहारः) (गी.२.५९)

१४. सः तया ----------------- युक्तः तस्याः आराधनम् ईहते। (श्रद्धा) (गी.७.२२)

१५. -------------- सामवेदः अस्मि। (वेदः) (गी.१०.२२)

झ. कोष्ठके निर्दिष्टान् गीताश्लोकान् परिशील्य यथोदाहरणम् शुद्धवाक्यानि लिखत -

	अशुद्धं वाक्यम्	**शुद्धं वाक्यम्**
यथा -	**रुद्रेभ्यः शङ्करः अस्मि।**	**रुद्राणां शङ्करः अस्मि। (गी.१०.२३)**

१. एते हि देवसमूहाः त्वया प्रविशन्ति। (गी.११.२१) -- ।

२. प्रसादे सति अस्मिन् सर्वदुःखानां हानिः उपजायते। (गी.२.६५) -- ।

३. अशान्तं कुतः सुखम्। (गी.२.६६)। -- ।

४. अर्जुन ! सर्वभूतैः यद् बीजं तद् अपि अहम्। (गी.१०.३२) -- ।

५. अहम् इदं कृत्स्नं जगत् एकांशः विष्टभ्यः स्थितः। (गी.१०.४२) -- ।

६. कौन्तेय हतः वा स्वर्गं प्राप्स्यसि जित्वा वा महीं भोक्ष्यसे। (गी.२.३७) -- ।

७. योगस्य जिज्ञासुः अपि शब्दब्रह्मम् अतिवर्तते। (गी.६.४४) -- ।

८. शस्त्राणि एतस्मिन् न छिन्दन्ति। (गी.२.२३) -- ।

९. यः अन्तकाले माम् एव स्मरन् कलेवरेण मुक्त्वा प्रयाति सः पुरुषः मद्भावेन याति। (गी.८.५) -- ।

१०. साधूनां परित्रातुं दुष्कृतां विनाशेन धर्मसंस्थापनान् च युगे युगे सम्भवति। (गी.४.८) -- ।

११. एवं ज्ञानचक्षुषे क्षेत्रक्षेत्रज्ञयोः अन्तरं भूतप्रकृतिमोक्षाय च ये विदुः ते परं ब्रह्म यान्ति । (गी.१३.३४)

--- ।

१२. कर्मणः एव ते अधिकारः । मा फलेषु कदाचन । (गी.२.४७) --

------------------------------------ ।

ज. यथोदाहरणम् अधः दत्तेषु पदेषु उचिताः कारकविभक्तीः योजयित्वा वाक्यनिर्माणं कुरुत-

यथा - कुरुक्षेत्रम्- योद्धा- शोभन्ते । **कुरुक्षेत्रे योद्धारः शोभन्ते ।**

१. अभिमन्युः- चक्रव्यूहः- प्रविशति । -- ।

२. कृष्णः - अर्जुनः - उपदिशति । -- ।

३. सञ्जयः - दिव्यदृष्टिः- महाभारतं पश्यति । -- ।

४. द्रोणः - अर्जुनः - दिव्यास्त्रं - ददाति । -- ।

५. युधिष्ठिरः - हस्तिनापुरम् - आगच्छति । -- ।

६. गान्धारी - भ्राता - शकुनिः - अस्ति । -- ।

७. विदुरः - सभा - नीतिवचनं - कथयति । -- ।

८. सुदामा - द्वारका - गच्छति । -- ।

९. द्रौपदी - दुःशासनः - क्रुध्यति । -- ।

१०. नकुलः - सह - सहदेवः - अश्वशाला - गच्छति । -- ।

ज्ञानवर्धिनी

कस्मिन् अवसरे का विभक्तिः भवति इति ज्ञानाय एतां तालिकां सावधानं परिशीलयत -

प्रथमाविभक्तिः	
कर्तरिप्रयोगे कर्तुः प्रथमाविभक्तिः भवति ।	युधिष्ठिरः पर्वतम् आरोहति ।
कर्मणिप्रयोगे कर्मणः प्रथमाविभक्तिः भवति ।	युधिष्ठिरेण पर्वतः आरुह्यते ।
द्वितीयाविभक्तिः	
कर्तरिप्रयोगे कर्मणः द्वितीयाविभक्तिः भवति ।	रुक्मिणी पूजां करोति ।
'परितः' प्रयोगे पूर्वपदे द्वितीयाविभक्तिः भवति ।	यज्ञकुण्डं परितः यजमानाः सन्ति ।
'विना' प्रयोगे पूर्वपदे द्वितीयाविभक्तिः भवति । (तृतीया पञ्चमी अपि भवतः)	स्वरज्ञानं विना वेदपठनं व्यर्थम् ।
द्विकर्मकधातूनां प्रयोगे कर्मणोः द्वितीयाविभक्तिः भवति ।	ध्रुवः भगवन्तं ध्रुवपदम् अयाचत ।

तृतीयाविभक्तिः	
करणकारकात् तृतीयाविभक्तिः भवति।	भीमः चषकेण क्षीरं पिबति।
कर्मणि भावे च प्रयोगे कर्तुः तृतीयाविभक्तिः भवति।	अर्जुनेन धनुः त्यज्यते। दीपेन ज्वल्यते।
'सह'प्रयोगे पूर्वपदे तृतीयाविभक्तिः भवति।	अर्जुनः सेनया सह युद्धक्षेत्रं गतवान्।
'सदृश'प्रयोगे पूर्वपदे तृतीयाविभक्तिः भवति। (षष्ठी अपि भवति।)	नेत्रे कमलेन सदृशे स्तः।
कारणवाचकात् तृतीयाविभक्तिः भवति। (पञ्चमी अपि भवति।)	अर्जुनस्य विषादेन श्रीकृष्णः गीताम् उक्तवान्।
चतुर्थीविभक्तिः	
'ददाति' इत्यर्थे यस्मै ददाति तस्मात् चतुर्थीविभक्तिः भवति।	वृक्षः पथिकेभ्यः फलानि ददाति।
'रोचते'प्रयोगे यस्मै रोचते तस्मात् चतुर्थीविभक्तिः भवति।	धनञ्जयाय युद्धं न रोचते।
'नमः'प्रयोगे चतुर्थीविभक्तिः भवति।	देवाय तस्मै नमः।
'कुप्यति / असूयति / क्रुध्यति / द्रुह्यति'प्रयोगे चतुर्थीविभक्तिः भवति।	दुर्योधनः अर्जुनाय कुप्यति। अनसूया कस्मै अपि न असूयति। कर्णः दुर्योधनाय न द्रुह्यति। दुर्योधनः भ्रात्रे क्रुध्यति।
पञ्चमीविभक्तिः	
विभागे सति अवधिभूतात् पञ्चमीविभक्तिः भवति।	तरणपटुः नौकायाः उत्पतति।
यस्मात् भयं भवति ततः पञ्चमीविभक्तिः भवति।	मूषकः बिडालात् बिभेति।
यस्मात् रक्षति ततः पञ्चमीविभक्तिः भवति।	पुस्तकं जलात् तैलात् अग्नेः च रक्षणीयम्।
'ऋते'प्रयोगे पञ्चमीविभक्तिः भवति।	आन्दोलनाद् ऋते स्वाधिकारः न प्राप्यते।
'प्रभृति / आरभ्य'प्रयोगे पञ्चमीविभक्तिः भवति।	अस्मात् मासात् प्रभृति चायं न पिबामि। जन्मनः आरभ्य भीमः बलशाली आसीत्।

'पूर्व-पर'-एतयोः प्रयोगे पञ्चमीविभक्तिः भवति ।	सत्ययुगं त्रेतायुगात् पूर्वम् । द्वापरयुगं त्रेतायुगात् परम् ।
षष्ठीविभक्तिः	
सम्बन्धे षष्ठीविभक्तिः भवति ।	कार्त्तिकेयः देवानां सेनापतिः । धृष्टद्युम्नः पाण्डवानां सेनापतिः ।
भाववाचकस्य (ल्युडन्तस्य) प्रयोगे षष्ठीविभक्तिः भवति ।	अपराधिनां दण्डनम् । ग्रामस्य गमनम् ।
क्रियायाः पदद्वयेन प्रतिपादने षष्ठीविभक्तिः भवति ।	प्राचार्यः पारितोषिकाणां वितरणं करोति । (वितरति = वितरणं करोति)
'उपरि / अधः / वामतः / दक्षिणतः / पुरतः / पृष्ठतः' प्रयोगे षष्ठीविभक्तिः भवति ।	गृहस्य उपरि छदः अस्ति । पत्युः वामतः पत्नी उपविशति । गृहस्य पुरतः तुलसी भवति ।
सप्तमीविभक्तिः	
आधारात् सप्तमीविभक्तिः भवति ।	यात्रिकः स्यूते धनं स्थापयति ।
'स्निह्यति / विश्वसिति'प्रयोगे सप्तमीविभक्तिः भवति ।	नकुलः सहदेवे स्निह्यति ।
	शिष्यः गुरौ विश्वसिति ।
पृथक्करणे सप्तमीविभक्तिः भवति । (षष्ठी अपि भवति ।)	भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
सत्सप्तमी	काष्ठे ज्वलिते सति धूमः प्रसरति ।

****

तस्य प्रज्ञा प्रतिष्ठिता

क्तप्रत्ययः ११

एतं संवादं सावधानं पठत -

कुरुक्षेत्रस्य धर्मयुद्धे उभयोः सेनयोः मध्ये कृष्णेन अर्जुनस्य रथः **स्थापितः**। तत्र पितृपितामहपुत्रादीन् स्वजनान् दृष्ट्वा अर्जुनः खिन्नः अभवत्। तेन योद्धुम् **अशक्तेन** अर्जुनेन भगवते श्रीकृष्णाय **निवेदितं** यत् "मम शरीरे वेपथुः जायते गाण्डीवं च हस्तात् स्रंसते। मनोऽपि भ्रमति" इति। अर्जुनस्य एतादृशानि वाक्यानि श्रुत्वा श्रीकृष्णः तं बोधयति -

श्रीकृष्णः - हे पार्थ ! तव बुद्धिः इदानीम् अविवेकरूपेण कालुष्येण **युक्ता** अस्ति। तेन तव आत्मानात्मविवेकः **नष्टः** अस्ति। यदा तव बुद्धिः तस्मात् कालुष्यात् **मुक्ता** भविष्यति तदा त्वम् अद्यावधि **श्रुतेषु** इतः परं श्रवणीयेषु च कर्मफलेषु अवश्यं वैराग्यं प्राप्स्यसि। हे अर्जुन ! अनेकविधानां **मतानां** श्रवणेन तव बुद्धिः **विचलिता** स्यात्। सा यदा स्थिरीभविष्यति **कम्पवर्जिता** च भविष्यति तदा त्वं समत्वरूपं योगम् अवाप्स्यसि।

अर्जुनः - केशव ! कः **स्थितप्रज्ञः** इति उच्यते ?

श्रीकृष्णः - पार्थ ! यदा मनसि **प्रविष्टाः** सर्वे अपि इच्छाभेदाः **परित्यक्ताः** भवन्ति, यदा च निरपेक्षः जनः परमार्थदर्शनात् अन्यस्मिन् सर्वस्मिन् अपि विषये **अनासक्तः** भवति तदा यः आत्मना एव **तुष्टः** भवति सः एव **स्थितप्रज्ञः** इति उच्यते।

अर्जुनः - **स्थितप्रज्ञस्य** लक्षणानि कानि ?

श्रीकृष्णः - **स्थितप्रज्ञस्य** मनः दुःखेषु **अनुद्विग्नं** भवति। सः **स्थितप्रज्ञः** सुखेषु स्पृहावान् न भवति। रागात् भयात् क्रोधात् च सः **अतीतः** भवति। सः **देहजीवितादिषु** सर्वत्र **स्नेहरहितः** भवति। सः शुभं प्राप्य **अभिनन्दितः**, अशुभं प्राप्य **द्वेषयुक्तः** वा न भवति।

अर्जुनः - **स्थितप्रज्ञः** यदा बहिर्मुखः भवति तदा कथं भाषते ? कथं सः उपविशति ? कथं गच्छति ?

श्रीकृष्णः - इन्द्रियाणि सर्वेषु अपि शब्दादिषु विषयेषु **प्रवृत्तानि** भवन्ति। भयकारणेन यथा कूर्मस्य अङ्गानि **संकुचितानि** भवन्ति तथा यदा अयं ज्ञाननिष्ठायां **प्रवृत्तः** जनः सर्वाणि इन्द्रियाणि शब्दादिभ्यः संकोचयति तदा तस्य प्रज्ञा **प्रतिष्ठिता** भवति। सः च **स्थितप्रज्ञः** भवति।

अर्जुनः - हे भगवन्! अहं कथम् एतादृशः भवितुं शक्नोमि ?

श्रीकृष्णः - हे पार्थ ! यः रोगपीडि**तः** भवति तस्य निराहारत्वात् सर्वे अपि विषयाः **अपगताः** भवन्ति। किन्तु तद्विषयकस्नेहः न अपगच्छति। सः यदा **अवहितः** सन् परत्वम् अनुसन्धत्ते तदा विषयस्नेहः अपि अपगच्छति। हे कौन्तेय ! इन्द्रियाणि प्रमथनशीलानि भवन्ति। तानि समाधौ प्रयत्नं कुर्वतः मेधाविनः अपि पुरुषस्य मनः बलात् आकर्षन्ति। योगी तानि सर्वाणि संयम्य मत्परः सन् **स्थितः** भवेत्। एवं यः तिष्ठति तस्य प्रज्ञा **प्रतिष्ठिता** भवति।

अभ्यासः

क. पाठे स्थूलाक्षरैः मुद्रितानि पदानि क्तप्रत्ययान्तानि सन्ति, तानि चित्वा अधः लिखत -

स्थापितः	-------------	-------------	-------------
-------------	-------------	-------------	-------------
-------------	-------------	-------------	-------------
-------------	-------------	-------------	-------------
-------------	-------------	-------------	-------------
-------------	-------------	-------------	-------------
-------------	-------------	-------------	-------------
-------------	-------------		

- **क्तप्रत्ययस्य प्रयोगः धातोः परं भवति।**

यथा - कृ + क्त (त) = **कृतम्**। कृधातोः क्तप्रत्यये कृते **कृत** इति रूपम्।

पठ् + क्त (इत) = **पठितम्**। पठ् धातोः क्तप्रत्यये कृते पठित इति रूपम्।

कृधातोः **क्त**प्रत्यये कृते **'कृत'** इति रूपं भवति। परन्तु पठ्धातोः **क्त**प्रत्यये कृते **'पठित'** इति रूपं भवति। अत्र कारणं तु 'इड्' (इ) एव। तत्सम्बन्धी विशेषः अयम् अस्ति -

धातुः त्रिविधः - **सेट्, अनिट्, वेट्** च। यत्र धातुः सेट् तत्र क्तप्रत्यये कृते 'इत'(इकारसहितं रूपम्) दृश्यते। यत्र धातुः अनिट् तत्र क्तप्रत्यये कृते 'त' इति (इकाररहितं रूपम्) दृश्यते। यत्र पुनः धातुः 'वेट्' भवति तत्र क्तप्रत्यये कृते 'त' इति 'इत' इति वा दृश्यते।

कतिचन उदाहरणानि -

धातुः	**क्तप्रत्ययान्तं रूपम्**	**धातुः**	**क्तप्रत्ययान्तं रूपम्**
हस्	हसितम्	रम्	रतम्
धाव्	धावितम्	नम्	नतम्

- **'क्त' प्रत्ययान्तानां प्रयोगः त्रिषु लिङ्गेषु त्रिषु वचनेषु च भवति। अर्थात् एतेषां शब्दानां प्रयोगः विशेषणरूपेण भवति।**

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	
यथा -	गतः	गतौ	गताः	**(पुंलिङ्गे)**
	गता	गते	गताः	**(स्त्रीलिङ्गे)**
	गतम्	गते	गतानि	**(नपुंसकलिङ्गे)**

- क्तप्रत्ययान्तानि रूपाणि पुंलिङ्गे **रामशब्दवत्** स्त्रीलिङ्गे **लताशब्दवत्** नपुंसकलिङ्गे **फलशब्दवत्** च भवन्ति।

- **क्तप्रत्ययान्तरूपस्य प्रयोगः भूतकालार्थे भवति।**

कर्मणि प्रयोगः - **यथा -** मया कार्यं **कृतम्**। (अहं कार्यं कृतवान् इति अर्थः।)

भावे प्रयोगः - **यथा -** मया **हसितम्**। (अहं हसितवान् इत्यर्थः।)

- **क्तप्रत्ययान्तस्य रूपस्य प्रयोगेण रचितं वाक्यं तथा च कर्मणि लङ्लकारस्य प्रयोगेण रचितं वाक्यं समानार्थकं भवति।**

	कर्मणि क्तः	**कर्मणि लङ्**
यथा -	तेन श्लोकः **पठितः**।	तेन श्लोकः **अपठ्यत**।
	तया स्तोत्रं **गीतम्**।	तया स्तोत्रम् **अगीयत**।
	तैः कथाः **श्रुताः**।	तैः कथाः **अश्रूयन्त**।

- **भावे प्रयोगे अपि तथैव भवति।**

	भावे क्तः	**भावे लङ्**
यथा -	अर्जुनेन **स्थितम्**।	अर्जुनेन **अस्थीयत**।
	कृष्णेन **प्रहसितम्**।	कृष्णेन **प्राहस्यत**।

➢ **अधः प्रदत्तानि रूपाणि परिशीलयत -**

क्तप्रत्ययान्तानि पदानि

धातुः	**पुंसि**	**स्त्रियाम्**	**नपुंसके**
कृ	कृतः	कृता	कृतम्
नी	नीतः	नीता	नीतम्
गै	गीतः	गीता	गीतम्
पा	पीतः	पीता	पीतम्

भू	भूतः	भूता	भूतम्
स्मृ	स्मृतः	स्मृता	स्मृतम्
मृ	मृतः	मृता	मृतम्
श्रु	श्रुतः	श्रुता	श्रुतम्
जि	जितः	जिता	जितम्
क्षि	क्षीणः	क्षीणा	क्षीणम्
दा	दत्तः	दत्ता	दत्तम्
अधि- इ	अधीतः	अधीता	अधीतम्
गम्	गतः	गता	गतम्
दृश्	दृष्टः	दृष्टा	दृष्टम्
पठ्	पठितः	पठिता	पठितम्
खाद्	खादितः	खादिता	खादितम्
स्वप्	सुप्तः	सुप्ता	सुप्तम्
श्वस्	श्वसितः	श्वसिता	श्वसितम्
लुप्	लुप्तः	लुप्ता	लुप्तम्
पत्	पतितः	पतिता	पतितम्
कम्प्	कम्पितः	कम्पिता	कम्पितम्
लज्ज्	लज्जितः	लज्जिता	लज्जितम्
युज्	युक्तः	युक्ता	युक्तम्
प्रेष्	प्रेषितः	प्रेषिता	प्रेषितम्
आप्	आप्तः	आप्ता	आप्तम्
ग्रह्	गृहीतः	गृहीता	गृहीतम्
हन्	हतः	हता	हतम्
दंश्	दष्टः	दष्टा	दष्टम्
वृध्	वृद्धः	वृद्धा	वृद्धम्
चि	चितः	चिता	चितम्
स्था	स्थितः	स्थिता	स्थितम्
कृत (संशब्दने)	कीर्तितः	कीर्तिता	कीर्तितम्
षद्लृ (सद्)	सन्नः	सन्ना	सन्नम्
हृष्	हृष्टः	हृष्टा	हृष्टम्
स्रंस्	स्रस्तः	स्रस्ता	स्रस्तम्

दह्	दग्धः	दग्धा	दग्धम्
भ्रम्	भ्रान्तः	भ्रान्ता	भ्रान्तम्

कानिचन विशेषरूपाणि

धातुः	पुंसि	स्त्रियाम्	नपुंसके
धा	हितः	हिता	हितम्
पच्	पक्वः	पक्वा	पक्वम्
रभ्	रब्धः	रब्धा	रब्धम्
रमु	रतः	रता	रतम्
प्रच्छ्	पृष्टः	पृष्टा	पृष्टम्
वह्	ऊढः	ऊढा	ऊढम्
जन्	जातः	जाता	जातम्
अस्	भूतः	भूता	भूतम्
सृज्	सृष्टः	सृष्टा	सृष्टम्
सह्	सोढः	सोढा	सोढम्
वच्	उक्तः	उक्ता	उक्तम्
बन्ध्	बद्धः	बद्धा	बद्धम्
कृष्	कृष्टः	कृष्टा	कृष्टम्
शुष्	शुष्कः	शुष्का	शुष्कम्

ख. अधः तालिकायां प्रदत्तानां धातूनां क्त-प्रत्ययान्तानि रूपाणि यथोदाहरणं पूरयत -

		एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	दृश् (पुं.)	दृष्टः	दृष्टौ	दृष्टाः
१.	निर् + ईक्ष् (पुं.)		निरीक्षितौ	
२.	स्था (पुं.)	स्थितः		
३.	शक् (पुं.)			
४.	निस् + सृ (स्त्री.)			
५.	दुष् (स्त्री.)			
६.	हन् (स्त्री.)			हताः
७.	भुज् (नपुं.)	भुक्तम्		

८.	विद् (नपुं.)	विन्नम्		
९.	जि - (नपुं.)			
१०.	शुच् - (पुं.)	शोचितः		

ग. पाठे आगतानि क्तप्रत्ययान्तानि पदानि तेषां विशेष्येण सह यथोदाहरणं लिखत -

विशेष्यम् - क्तप्रत्ययान्तपदानि	विशेष्यम् - क्तप्रत्ययान्तपदानि
यथा - बुद्धिः युक्ता	आत्मानात्मविवेकः नष्टः

घ. अधः प्रदत्तानां क्तान्तपदानां निर्दिष्टविभक्तेः रूपाणि वचनानुसारं तालिकायां लिखत -

क्तप्रत्ययान्तपदानि	विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
१. मोहितः	प्रथमा			
२. हुतम्	द्वितीया			
३. सुनिश्चितम्	तृतीया			
४. युक्तः	चतुर्थी			
५. सक्तः	पञ्चमी			
६. समाहितः	षष्ठी			
७. स्मृता	सप्तमी			
८. निरुद्धम्	तृतीया			
९. प्रोतम्	चतुर्थी			

१०. विमूढः	सप्तमी			
११. ज्ञातः	षष्ठी			
१२. आस्थितः	पञ्चमी			
१३. नियतः	चतुर्थी			
१४. प्रव्यथितम्	द्वितीया			
१५. विस्मितः	प्रथमा			

ङ. लङ्लकारस्य क्रियापदस्य स्थाने क्तप्रत्ययान्तं पदं प्रयुज्य यथोदाहरणं वाक्यानि लिखत -

यथा - १. स्मृतिभ्रष्टेन बुद्धिनाशात् प्राणश्यत । स्मृतिभ्रष्टेन बुद्धिनाशात् प्रणष्टम् ।

२. पाण्डवैः धार्तराष्ट्राः अहन्यन्त । -------------------------------------- ।
३. अर्जुनेन पाण्डवानीकम् अदृश्यत । -------------------------------------- ।
४. अहङ्कारिणा अहं कर्ता इति अमन्यत । -------------------------------------- ।
५. अज्ञानेन ज्ञानम् आव्रियत । -------------------------------------- ।
६. भगवता अभ्युत्थानार्थम् आत्मा असृज्यत । -------------------------------------- ।
७. अखिलेन कर्मणा ज्ञाने परिसमाप्यत । -------------------------------------- ।
८. ज्ञानिना गुरुणापि दुःखेन न व्यचाल्यत । -------------------------------------- ।
९. परमेण ज्ञानेन हृदि व्यवास्थीयत । -------------------------------------- ।
१०. कृष्णेन पार्थाय ऐश्वरं रूपम् अदर्श्यत । -------------------------------------- ।

भगवद्गीतायाः श्लोकाभ्यासः

भगवद्गीतायाः तृतीयाध्यायस्य नाम अस्ति कर्मयोगः । तत्र षट्त्रिंशत्तमे श्लोके अर्जुनस्य कश्चन प्रश्नः अस्ति । "अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ?" इति । सप्तत्रिंशत्तमश्लोकात् आरभ्य त्रिचत्वारिंशत्तमश्लोकपर्यन्तं भगवतः श्रीकृष्णस्य उत्तरम् अस्ति । तान् श्लोकान् उच्चैः पठत । श्लोकेषु स्थितानि क्तप्रत्ययान्तरूपाणि एकत्र संगृह्णीत च ।

- **सर्वेभ्यः सकर्मकधातुभ्यः कर्मणि क्तप्रत्ययः भवति ।**

यथा - दुर्योधनेन आचार्यः **पृष्टः** । कृष्णेन रथः **स्थापितः** ।
नरेण नववस्त्रं **गृहीतम्** । भगवता जगत् इदं ततम् ।

- **सकर्मकधातुषु ये गत्यर्थकाः धातवः सन्ति, तेभ्यः धातुभ्यः कर्तरि अपि क्तप्रत्ययो भवति । ('गमनम्' इति येषाम् अर्थः ते गत्यर्थकाः)**

यथा -

छात्रः पाठशालां गतः ।	मुनिः पर्वतं व्रजितः ।	भक्तः मन्दिरं प्राप्तः ।
मित्राणि गृहम् आगतानि ।	अर्जुनः कृष्णम् अनुगतः ।	भक्तः ईश्वरं शरणं यातः ।

एतानि उदाहरणानि परिशीलयत -

कर्तरि लङ्	कर्तरि क्तः	कर्मणि क्तः
१. कृष्णः द्वारकाम् अगच्छत्।	कृष्णः द्वारकां गतः।	कृष्णेन द्वारका गता।
२. बालिका विद्यालयम् अगच्छत्।	बालिका विद्यालयं गता।	बालिकया विद्यालयः गतः।
३. चक्राणि नगरम् आगच्छन्।	चक्राणि नगरम् आगतानि।	चक्रैः नगरम् आगतम्।
४. योगिनः मोहनदीम् उदतरन्।	योगिनः मोहनदीम् उत्तीर्णाः।	योगिभिः मोहनदी उत्तीर्णा।
५. भक्ताः मन्दिरम् अव्रजन्।	भक्ताः मन्दिरं व्रजिताः।	भक्तैः मन्दिरं व्रजितम्।

- **सर्वेषाम् अकर्मकधातूनां तु कर्तरि अपि क्तप्रत्ययः भवति।**

यथा - अर्जुनः **विषण्णः**। कृष्णः **विहसितः**। गाण्डीवं **स्रस्तम्**।
रोमहर्षः **जातः**। मुनिः **जागरितः**। फलानि **पतितानि**।

- **सर्वेषाम् अकर्मकधातूनां भावे क्तप्रत्ययः भवति।**

यथा - अर्जुनेन **विषण्णम्**। कृष्णेन **विहसितम्**। गाण्डीवेन **स्रस्तम्**।
रोमहर्षेण **जातम्**। मुनिना **जागरितम्**। फलैः **पतितम्**।

एतानि उदाहरणानि परिशीलयत -

भावे लङ्	भावे क्तः	कर्तरि क्तः
१. शस्त्रसम्पातेन प्रावृत्यत।	शस्त्रसम्पातेन प्रवृत्तम्।	शस्त्रसम्पातः प्रवृत्तः।
२. अर्जुनेन व्यसद्यत।	अर्जुनेन विषण्णम्।	अर्जुनः विषण्णः।
३. मनसा अभ्रम्यत।	मनसा भ्रान्तम्।	मनः भ्रान्तम्।
४. कुलधर्मेण अनश्यत।	कुलधर्मेण नष्टम्।	कुलधर्मः नष्टः।
५. हृषीकेशेन अहस्यत।	हृषीकेशेन हसितम्।	हृषीकेशः हसितः।

भावेप्रयोगे क्तप्रत्ययान्तं रूपं सर्वदा नपुंसकलिङ्गम् एकवचनान्तं च भवति। कर्तरि क्तप्रत्ययान्तं रूपं विशेषणं भवति। अतः तत् विशेष्यस्य लिङ्गं वचनं विभक्तिं च अनुसरति।

च. यथोदाहरणं भावे प्रयुक्तानि वाक्यानि कर्तरिप्रयोगे परिवर्तयत -

भावेप्रयोगः	कर्तरिप्रयोगः
यथा - अर्जुनेन स्थितम्।	अर्जुनः स्थितः।

१. आत्मना न मृतम्। ----------------------------------- ।
२. गाण्डीवेन स्रस्तम्। ----------------------------------- । (गी.१.३०)
३. मम मनसा भ्रान्तम्। ----------------------------------- । (गी.१.३०)
४. जातिधर्मैः उत्सादितम्। ----------------------------------- । (गी.१.४३)
५. विश्वरूपं दृष्ट्वा अर्जुनेन भीतम्। ----------------------------------- ।
६. अर्जुनेन उभयोः सेनयोः मध्ये स्थितम्। ----------------------------------- ।
७. धीरेण न मुग्धम्। ----------------------------------- । (गी.२.१३)
८. असतः भावेन न विन्नम्। ----------------------------------- । (गी.२.१६)

छ. तालिकायां दत्तानि वाक्यानि यथोदाहरणं परिवर्तयत -

कर्तरि लङ्	कर्मणि / भावे लङ्	कर्मणि /भावे क्तः
यथा - अर्जुनः अगच्छत्।	**अर्जुनेन अगम्यत।**	**अर्जुनेन गतम्।**
१. सः उपाविशत्।		
२. सः अभाषत।		
३. पण्डिताः गतासून् न अन्वशोचन्।		
४. स्थितः तत्त्वतः अचलत्।		
५. देवः भक्तानां योगक्षेमम् अवहत्।		
६. देवव्रताः देवान् अयान्।		
७. मत्तः सर्वं प्रावर्तत।		
८. कश्चिद् एनम् आश्चर्यवत् अपश्यत्।		
९. प्रसक्ताः कामभोगेषु अपतन्।		

ज. कर्मार्थकानि क्तप्रत्ययुक्तानि वाक्यानि यथोदाहरणं कर्त्रर्थकत्वेन वाक्यत्वेन परिवर्तयत-

कर्मार्थकक्तप्रत्यययुक्तवाक्यानि — **कर्त्रर्थकक्तप्रत्यययुक्तवाक्यानि**

यथा - पतङ्गैः ज्वलनः विष्टः। — **पतङ्गाः ज्वलनं विष्टाः।**

१. ब्रह्मविद्भिः जनैः ब्रह्म गतम्। -- । (गी.८.२४)
२. योगिना परमपुरुषः उपेतः। -- । (गी.८.१०)
३. देवयग्भिः देवाः याताः। -- । (गी.७.२३)
४. भगवच्छरणैः माया तीर्णा। -- । (गी.७.१४)
५. सैनिकैः कुरुक्षेत्रम् आगतम्। -- ।
६. भक्तैः भगवत्परीक्षा उत्तीर्णा। -- ।

७. कर्मकरेण ग्रामः गतः। -- ।

८. अतिथिभिः गृहम् आगतम्। -- ।

९. पाण्डवैः रणनदी उत्तीर्णा। -- ।

१०. योगिना निर्वाणपरमा शान्तिः अधिगता। -- । (गी.६.१६)

११. ज्ञानिना ज्ञानप्लवेन वृजिनं सन्तीर्णम्। -- ।

१२. यज्ञशिष्टामृतभुग्भिः सनातनं ब्रह्म यातम्। -- । (गी.४.३१)

१३. कुरुपाण्डवैः कुरुक्षेत्रे समवेतम्। -- ।

श्लिषादिभ्यः कर्तरि क्तः

श्लिष्-शीङ्-स्था-आस-वस-जन-रुह-जीर्यतयः श्लिषादयः धातवः सन्ति । तेभ्यः कर्तरि क्तप्रत्ययः भवति। यथा -

१. हरिः लक्ष्मीम् **आश्लिष्टः**।

२. विष्णुः शेषम् **अधिशयितः**।

३. शिवः कैलासम् **अधिष्ठितः**।

४. अर्जुनः शिवम् **उपासितः**। (परिचर्यां कृतवान्)

५. भक्तः हरिदिनम् **उपोषितः**। (उपवासं कृतवान्)

६. भीमः युधिष्ठिरम् **अनुजातः**। (अनुसृत्य जातः)

७. अर्जुनः रथम् **आरूढः**।

८. देवः विश्वम् **अनुजीर्णः**। (व्याप्तवान्)

सर्वेषां धातूनां कर्मणि भावे च क्तप्रत्ययः भवति भूतकालार्थे।

कर्मणि क्तः यथा - पितामहेन शङ्खः ध्मातः।

भावे क्तः यथा - अश्वेन धावितम्।

सर्वेषाम् अकर्मकधातूनां कर्तरि क्तप्रत्ययः भवति भूतकालार्थे।

यथा - कृष्णः हसितः।

सकर्मकधातुषु गत्यर्थकधातूनां कर्तरि क्तप्रत्ययः भवति भूतकालार्थे।

यथा - छात्रः शालां गतः।

श्लिषादिभ्यः धातुभ्यः कर्तरि क्तप्रत्ययः भवति भूतकालार्थे।

यथा - कृष्णः राधाम् आश्लिष्टः।

एतद् वाक्यद्वयं परिशीलयत -

कर्तरिप्रयोगः	**कर्मणिप्रयोगः**
कृष्णः अर्जुनं बोधितवान्।	**कृष्णेन अर्जुनः बोधितः।**

- अत्र प्रथमवाक्ये क्तवतुप्रत्ययस्य प्रयोगः वर्तते।
- एतादृशवाक्यानां प्रयोगपरिवर्तनावसरे क्तवतुप्रत्ययान्तस्य स्थाने कर्मणिप्रयोगे भावेप्रयोगे वा क्तप्रत्ययान्तस्य प्रयोगः करणीयः।

झ. अधः लिखितानां वाक्यानां यथोदाहरणं प्रयोगपरिवर्तनं कुरुत -

यथा - अर्जुनः योद्धुकामान् निरीक्षितवान्। **अर्जुनेन योद्धुकामाः निरीक्षिताः।**

१. वयं महत् पापं कर्तुं व्यवसितवन्तः। --।

२. भगवान् द्विविधां निष्ठां प्रोक्तवान्। --।

३. अर्जुनः भगवतः सुदुर्दर्शं रूपं दृष्टवान्। --।

४. किं कर्म किमकर्मेति कवीन् अप्यत्र मोहितवन्तः। --।

५. तत्त्वदर्शिनः ज्ञानम् उपदिष्टवन्तः। --।

६. वश्यात्मा उपायतः योगं प्राप्तुं शक्तवान्। --।

७. ईश्वरः सूत्रे मणिगणा इव विश्वं प्रोतवान्। --।

८. मायया अपहृतज्ञानाः आसुरं भावम् आश्रितवन्तः। --।

९. कृष्णः स्वप्रकृतिम् अवष्टभ्य पुनः पुनः विसृष्टवान्। --।

१०. तव वचनेन मम मोहः विगतवान्। --।

११. अर्जुनः पुरुषोत्तमस्य ऐश्वरं रूपं दृष्टवान्। --।

१२. वासुदेवः सौम्यवपुः भूत्वा अर्जुनम् आश्वस्तवान्। --।

१३. ज्ञानं प्राप्य सर्वे मुनयः सिद्धिं गतवन्तः। --।

१४. द्रुपदपुत्रः पाण्डवानां चमूं व्यूढवान्। --।

१५. माधवपाण्डवौ महति स्यन्दने स्थितवन्तौ। --।

ञ. गीतायाः तत्तत्संख्याकं श्लोकं पठित्वा मञ्जूषास्थानि पदानि रिक्तस्थानेषु लिखत -

प्रतिष्ठितम्, नियोजितः, सृष्टम्, सन्तुष्टः, व्यवस्थितौ, भूतानि, व्यतीतानि, असक्तः, प्रतिष्ठिता, आस्थिताः, प्राप्तम्, पूताः, स्थितः, कृतम्, नष्टः, तुष्टः

यथा - आत्मन्येवात्मना <u>तुष्टः</u> स्थितप्रज्ञः तदोच्यते। (गी.२.५५)

१. नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा --------------------------। (गी.२.५७)

२. अन्नाद्भवन्ति ------------------- पर्जन्याद् अन्नसम्भवः। (गी.३.१४)

३. तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे --------------------------। (गी.३.१५)

४. आत्मन्येव च ----------------------- तस्य कार्यं न विद्यते। (गी.३.१७)

५. -------------------------- ह्याचरन् कर्म परमाप्नोति पूरुषः। (गी.३.१९)

६. कर्मणैव हि संसिद्धिम् ------------------------ जनकादयः। (गी.३.२०)

७. इन्द्रियस्येन्द्रियार्थे रागद्वेषौ --------------------------------। (गी.३.३४)

८. अनिच्छन्नपि वार्ष्णेय बलादिव --------------------------। (गी.३.३६)

९. एवं परम्परा --------------------------- इमं राजर्षयो विदुः। (गी.४.२)

१०. स कालेनेह महता योगो ------------------------ परन्तप । (गी.४.२)
११. बहूनि मे --------------------------- जन्मानि तव चार्जुन । (गी.४.५)
१२. बहवो ज्ञानतपसा ------------------------ मद्भावमागताः । (गी.४.१०)
१३. चातुर्वर्ण्यं मया ------------------------ गुणकर्मविभागशः। (गी.४.१३)
१४. कुरु कर्मैव तस्मात् त्वं पूर्वैः पूर्वतरं ---------------------- । (गी.४.१५)
१५. --------------------- अस्मि गतसन्देहः करिष्ये वचनं तव । (गी.१८.७३)

क्तप्रत्ययान्तं रूपं विशेषणं भवति । अतः तद् विशेषण-विशेष्यनियमानुसारं विशेष्यस्य लिङ्गं विभक्तिं वचनं च अनुसरति । एतत् उदाहरणद्वयं परिशीलयत -

कर्मणि क्तः -

लिङ्गं यथा -

छात्रेण
- श्लोकः पठितः । (पुंलिङ्गे)
- कविता पठिता । (स्त्रीलिङ्गे)
- नाटकं पठितम् । (नपुंसकलिङ्गे)

वचनं यथा -

अर्जुनेन
- बाणः प्रयुक्तः (एकवचनम्)
- बाणौ प्रयुक्तौ (द्विवचनम्)
- बाणाः प्रयुक्ताः (बहुवचनम्)

विभक्तिः यथा -

व्यासेन
- लिखितं[1] महाभारतम् इदम् । (प्रथमाविभक्तिः)
- लिखितं महाभारतं वयं पठामः । (द्वितीयाविभक्तिः)
- लिखितेन महाभारतेन बहवः प्रेरिताः । (तृतीयाविभक्तिः)
- लिखिताय महाभारताय सर्वे स्पृहयन्ति । (चतुर्थीविभक्तिः)
- लिखितात् महाभारतात् एव उद्धृता गीता । (पञ्चमीविभक्तिः)
- लिखितस्य महाभारतस्य कीर्तिः सर्वत्र प्रसृता । (षष्ठीविभक्तिः)
- लिखिते महाभारते अष्टादश पर्वाणि सन्ति । (सप्तमीविभक्तिः)

कर्तरि क्तः -

लिङ्गं यथा -

- मोहः नष्टः । (पुंलिङ्गे)
- चञ्चलता नष्टा । (स्त्रीलिङ्गे)
- भयं नष्टम् । (नपुंसकलिङ्गे)

---

1. महाभारतस्य लेखकः गणेशः अस्ति । रचयिता व्यासः अस्ति ।

वचनं यथा -

सैनिकः स्थितः। (एकवचनम्)

सैनिकौ स्थितौ। (द्विवचनम्)

सैनिकाः स्थिताः। (बहुवचनम्)

विभक्तिः यथा -

दुःखेन	स्थितः अर्जुनः एषः।	(प्रथमाविभक्तिः)
	स्थितम् अर्जुनं सर्वे पश्यन्ति।	(द्वितीयाविभक्तिः)
	स्थितेन अर्जुनेन सह कृष्णः अस्ति।	(तृतीयाविभक्तिः)
	स्थिताय अर्जुनाय कृष्णः तत्त्वम् उपदिशति।	(चतुर्थीविभक्तिः)
	स्थितात् अर्जुनात् गाण्डीवं स्रंसते।	(पञ्चमीविभक्तिः)
	स्थितस्य अर्जुनस्य गात्राणि सीदन्ति।	(षष्ठीविभक्तिः)
	स्थिते अर्जुने सर्वे स्निह्यन्ति।	(सप्तमीविभक्तिः)

ट. अधः कर्मणि / भावे वा प्रदत्तानि लङ्लकारस्य वाक्यानि क्तप्रत्ययान्तं पदं प्रयुज्य यथोदाहरणं परिवर्तयत -

लङ्लकारस्य प्रयोगः	**क्तप्रत्ययान्तस्य प्रयोगः**
यथा - धूमेन अग्निः आव्रियत।	धूमेन अग्निः आवृतः।
१. विविक्तसेविना वैराग्यं समुपाश्रीयत।	-- । (समुपाश्रितम्)
२. भगवता इदं जगत् अतन्यत।	-- । (ततम्)
३. कृष्णेन अर्जुनस्य संशयः अच्छिद्यत।	-- ।
४. योगयुक्तेन नैष्ठिकी शान्तिः आप्यत।	-- ।
५. ज्ञानिना ज्ञानप्लवेन वृजिनं समतीर्यत।	-- । (सन्तीर्णम्)
६. श्रद्धावता ज्ञानम् अलभ्यत।	-- ।
७. अर्जुनेन प्रज्ञावादाः अभाष्यन्त।	-- ।
८. मलेन आदर्शः आव्रियत।	-- ।
९. मुमुक्षुभिः कर्म अक्रियत।	-- ।
१०. ब्रह्मणः मुखे बहवः यज्ञाः व्यतन्यन्त।	-- । (वितताः)
११. अर्जुनेन कृष्णः प्रापद्यत।	-- । (प्रपन्नः)
१२. गुडाकेशेन हृषीकेशः औच्यत।	-- ।
१३. अर्जुनेन कृष्णप्रसादात् स्मृतिः अलभ्यत।	-- ।
१४. सञ्जयेन कृष्णार्जुनयोः संवादः अश्रूयत।	-- ।

कृष्णे बोधितवति ...

सतिसप्तमी

१२

एतानि वाक्यानि उच्चैः पठत -

धृतराष्ट्रः पृष्टवान् । सञ्जयः उक्तवान् ।

यदा धृतराष्ट्रः पृष्टवान् तदा सञ्जयः उक्तवान् ।

धृतराष्ट्रे पृष्टवति सति सञ्जयः उक्तवान् ।

कृष्णः बोधितवान् । अर्जुनस्य मोहः नष्टः ।

यदा कृष्णः बोधितवान् तदा अर्जुनस्य मोहः नष्टः ।

कृष्णे बोधितवति सति अर्जुनस्य मोहः नष्टः ।

- उपरि प्रतिचित्रं वाक्यत्रयं लिखितम् अस्ति ।
- तत्र प्रथमे परस्परसम्बद्धं वाक्यद्वयं लिखितम् अस्ति ।
- तदनन्तरं 'यदा - तदा' इत्यनयोः योजनेन एकं वाक्यं निर्मितम् । पुनः तस्यैव वाक्यस्य सत्सप्तमीरूपं तत्र लिखितम् अस्ति ।

एतस्यां कथायां सत्सप्तमीवाक्यानि परिशीलयत -

भगवद्गीतायाः दशमे अध्याये 'मम विस्तरस्य अन्तः नास्ति' इति **कृष्णे कथितवति सति** अर्जुनस्य मोहः विगतः। अतः सः भगवन्तम् ऐश्वरं रूपं दर्शयितुं निवेदितवान्। तथा तेन **निवेदिते सति** भगवान् स्वस्य नानाविधानि दिव्यानि रूपाणि दर्शितवान्। तदा अर्जुनः तस्मिन् सम्पूर्णं जगत् सचराचरं दृष्टवान्। सहस्रसूर्याणां भाः इव स्थितां भगवतः भासं दृष्ट्वा सः आनन्दितः जातः।

विस्मयावेशे जाते सति तेन प्रणम्य एवं भाषितम् - 'हे देव ! अहं तव देहे सर्वाणि भूतानि पश्यामि। त्वां किरीटिनं, गदिनं, चक्रिणं तेजोराशिभिः दीप्तिमन्तं च दृष्ट्वा पुनः पुनः हृष्यामि।' भगवता **भयानकेषु दंष्ट्राकरालेषु च मुखेषु दर्शितेषु सत्सु** अर्जुनः भीतः अभवत्। तदा कृष्णः 'अहं जगतः जन्मनः प्रलयस्य च कारणम् अस्मि। भवतः प्रत्यनीकेषु ये योधाः सन्ति ते त्वत् ऋते अपि न भविष्यन्ति। अतः 'उत्तिष्ठ ! शत्रून् जित्वा समृद्धं राज्यं भुङ्क्ष्व !' इति उक्तवान्।

एवं प्रकारेण कृष्णात् **विवरणे श्रुते सति** अर्जुनः सगद्गदम् उक्तवान् - 'हे अनन्तरूप ! त्वया इदं विश्वं व्याप्तं वर्तते। मया तव **महिम्नि अज्ञाते सति** प्रमादात् 'हे माधव ! हे सखे ! इति यत् संबोधितं तदर्थं क्षमस्व। त्वत्समः अन्यः लोकत्रयेऽपि नास्ति। यद्यपि अहम् आनन्दितः अस्मि तथापि मम मनः प्रव्यथितं वर्तते। अतः भवतः चतुर्भुजं रूपं पुनः दर्शयतु' इति। एवम् **अर्जुने प्रार्थितवति सति** भगवान् तथैव पूर्वरूपं दर्शितवान्।

अभ्यासः

क. कथायाम् आगतानि सत्सप्तमीवाक्यानि पुनः लिखत -

यथा - 'मम विस्तरस्य अन्तः नास्ति' इति कृष्णे कथितवति सति अर्जुनस्य मोहः विगतः।

१. ---।

२. ---।

३. ---।

४. ---।

५. --- ।

६. --- ।

अवधेयम्

अर्जुने पृष्टवति सति कृष्णः विश्वरूपं दर्शितवान् ।

यदा अर्जुनः पृष्टवान् तदा कृष्णः विश्वरूपं दर्शितवान् इत्यर्थः । अत्र द्वे क्रिये स्तः - अर्जुनस्य प्रश्नः कृष्णस्य उपदेशः च । कृष्णः विश्वरूपं कदा दर्शितवान् ? इति जिज्ञासायाम् अर्जुनः यदा प्रश्नं पृच्छति तदा इति ज्ञायते । अर्जुनस्य प्रश्नः विश्वरूपदर्शनस्य कालं ज्ञापयति इत्यर्थः । ततश्च कालविषये अर्जुनस्य प्रश्नक्रिया ज्ञापकक्रिया, कृष्णस्य विश्वरूपदर्शनं ज्ञाप्यक्रिया अस्ति । एतादृशे प्रसङ्गे ज्ञापकक्रियायाः आश्रयस्य सप्तमीविभक्तिः भवति । एषा सत्सप्तमी इति उच्यते । भावसप्तमी इत्यपि अस्याः व्यवहारः अस्ति । पूर्वस्मिन् उदाहरणे **कालज्ञापकक्रियायाः आश्रयः 'अर्जुनः'**। अतः 'अर्जुन'शब्दात् सप्तमीविभक्तिः । 'पृष्टवति' इति तु 'अर्जुने' इत्यस्य विशेषणम् इति ततोऽपि सप्तमीविभक्तिः भवति एव ।

'अस्'धातोः शतृप्रत्ययान्तं प्रातिपदिकं भवति 'सत्' इत्येतत् । तस्यैव पुंलिङ्गे नपुंसकलिङ्गे च सप्तमीविभक्तिरूपं 'सति' इति भवति । यथा - अर्जुने पृष्टवति सति ...... । मित्रे आगते सति... । स्त्रीलिङ्गे सती इति प्रयोगः । यथा - 'गीतायां पठितायां सत्याम् ...... । अत एव इयं सत्सप्तमी सतीसप्तमी वा उच्यते ।

यथा - बाले उपविष्टे सति माता आगच्छति । (पुंलिङ्गे)

पुष्पे विकसिते सति युवती तत् मस्तके स्थापयति । (नपुंसकलिङ्गे)

मालायां निर्मितायां सत्याम् अर्चकः देवालयं गच्छति । (स्त्रीलिङ्गे)

द्विवचने बहुवचने चापि तस्य प्रयोगः भवति ।

यथा - नेत्रयोः निमीलितयोः सतोः किमपि न दृश्यते । (द्विवचनम्)

मेघेषु गर्जत्सु सत्सु वृष्टिः जायते । (बहुवचनम्)

जानीत -

ज्ञापकक्रियायाः आश्रयः कर्ता कर्म वा भवति । आदौ तादृशम् एकम् अभ्यासं कुरुत यत्र ज्ञापकक्रियायाः आश्रयः कर्ता अस्ति ।

ख. तालिकायां प्रदत्तेभ्यः वाक्येभ्यः ज्ञापकक्रियाम् आश्रयभूतं कर्तारं च चित्वा यथोदाहरणं लिखत -

वाक्यम्	ज्ञापकक्रिया	आश्रयभूतः कर्ता
यथा - १. गुरौ आगते शिष्यः नमस्करोति ।	गुरोः आगमनम्	गुरुः

२. मातरि शिक्षितवत्यां सत्यां कुटुम्बः शिक्षितः भवति ।		
३. पुत्रे षोडशवर्षीये जाते मित्रवद् आचरेत् ।		
४. आत्मविश्वासे आगते जीवने सर्वं साधयितुं शक्यते ।		
५. बन्धुषु आगतवत्सु सर्वे तुष्यन्ति ।		
६. वस्त्रेषु जीर्णेषु जनाः नवानि गृह्णन्ति ।		
७. भीमे प्रहृतवति कौरवाः पलायन्ते ।		

इदानीं यत्र ज्ञापकक्रियायाः आश्रयः कर्म अस्ति तादृशानि उदाहरणानि पश्यत -

कृष्णेन गुह्ये ज्ञाने कथिते अर्जुनस्य मोहः नष्टः ।

यदा कृष्णेन गुह्यं ज्ञानं कथितं तदा अर्जुनस्य मोहः नष्टः इत्यर्थः । अत्र द्वे क्रिये स्तः । कथनक्रिया नाशक्रिया च । कृष्णस्य कथनं ज्ञापकक्रिया, अर्जुनस्य मोहनाशः ज्ञाप्यक्रिया । एवं च अत्र कालविषये तयोः क्रिययोः ज्ञाप्यज्ञापकभावः अस्ति । तत्र ज्ञापकक्रियायाः आश्रयः ज्ञानम् । अतः 'ज्ञान'शब्दात् सप्तमीविभक्तिः । 'कथिते' इत्यत्र तु 'ज्ञान'शब्दस्य विशेषणत्वात् सप्तमीविभक्तिः ।

ग. यथोदाहरणं तालिकायां ज्ञापकक्रियाम् आश्रयभूतं कर्म च लिखत -

वाक्यम्	**ज्ञापकक्रिया**	**आश्रयभूतं कर्म**
यथा - १. रुग्णेन औषधे स्वीकृते रोगः अपगच्छति ।	**औषधस्य स्वीकरणम्**	**औषधम्**
२. नृत्ये दृष्टे जनाः आनन्दिताः अभवन् ।		
३. जले पीते बालकस्य पिपासा अपगता ।		
४. परीक्षाफले ज्ञाते छात्राः चिन्तारहिताः अभवन् ।		
५. नेत्रयोः निमीलितयोः योगी ध्यानम् आरभते ।		
६. द्वारे उद्घाटिते राजेशः प्रविष्टः ।		
७. घटनायां दृष्टायां पत्रकारः वार्तां लिखितवान् ।		

घ. यथोदाहरणं प्रदत्तस्य वाक्यस्य वाक्यद्वये विभाजनं कुरुत -

यथा - घण्टानादे श्रुते छात्राः प्राङ्गणं प्राविशन् । घण्टानादः श्रुतः । छात्राः प्राङ्गणं प्राविशन् ।

१. मनुष्येण प्रयत्ने कृते सः सर्वम् अलभत ।

-- ।

२. विद्यार्थिना शास्त्रे पठिते बुद्धिः तीक्ष्णा अभवत्।

-- ।

३. सर्वेण निरन्तरं योगाभ्यासे कृते अनारोग्यम् अपगतम्।

-- ।

४. छात्रेण अध्ययने कृते सफलता प्राप्ता।

-- ।

५. सङ्कटे आपतिते मित्रं साहाय्यम् अकरोत्।

-- ।

६. वर्षासु आगतासु सतीषु बालाः छत्राणि उदघाटयन्।

-- ।

७. पुष्पमालायां निर्मितायां सत्यां पुरोहितेन पूजारम्भः कृतः।

-- ।

८. द्वारे उद्घाटिते सति मिलिन्दः पत्रं दृष्टवान्।

-- ।

९. दुर्भिक्षे वर्धमाने सति वस्तूनां मूल्यम् अवर्धत।

-- ।

१०. गीतागङ्गोदके पीते पुनर्जन्म न प्राप्तम्।

-- ।

११. ब्रह्मणः अहरागमे जाते सर्वाः व्यक्तयः अव्यक्तात् प्राभवन्।

-- ।

१२. ब्रह्मणः रात्र्यागमे जाते सर्वाः व्यक्तयः अव्यक्तसंज्ञके प्रलीनाः अभवन्।

-- ।

१३. गीताम्भसि स्नाने कृते संसारमलनाशः अभवत्।

-- ।

१४. सर्वभूतेषु नष्टेषु अव्यक्तः न विनष्टः।

-- ।

ङ. अत्र त्रीणि वाक्यानि सन्ति। तानि सत्सप्तमीप्रयोगेण यथोदाहरणं वाक्यद्वयरूपेण परिवर्तयत।

यथा - वृष्टिः आगच्छति। ⟶ मयूरः नृत्यति। ⟶ जनाः प्रसन्नाः भवन्ति।

वृष्ट्याम् आगच्छन्त्यां सत्यां मयूरः नृत्यति।

मयूरे नृत्यति सति जनाः प्रसन्नाः भवन्ति।

१. वर्षाकाले जलसञ्चयः जायते । ⟶ बालकाः नौकानिर्माणं कुर्वन्ति । ⟶ ते आनन्दम् अनुभवन्ति ।

-- ।

-- ।

२. वृष्टिः आरभते । ⟶ जनाः छत्रम् उद्घाटयन्ति । ⟶ आर्द्रतायाः रक्षणं जायते ।

-- ।

-- ।

३. महती वृष्टिः जायते । ⟶ कविः काव्यरचनां करोति । ⟶ सहृदयाः प्रमुदिताः जायन्ते ।

-- ।

-- ।

४. वायुः वेगेन वहति ⟶ मेघगर्जना जायते । ⟶ विद्युत् प्रकाशते ।

-- ।

-- ।

५. आनिशं वृष्टिः जायते । ⟶ प्रपाताः जलपूरिताः जायन्ते । ⟶ जनाः पर्यटनाय गच्छन्ति ।

-- ।

-- ।

६. पर्जन्यः जायते । ⟶ अन्नं सम्भवति । ⟶ भूतानि जायन्ते ।

-- ।

-- ।

च. यथोदाहरणं प्रदत्तं वाक्यद्वयम् एकस्मिन् वाक्ये परिवर्तयत -

यथा - शस्त्रसम्पातः प्रवृत्तः । पाण्डवः धनुः उद्यम्य अब्रवीत् ।

शस्त्रसम्पाते प्रवृत्ते पाण्डवः धनुः उद्यम्य अब्रवीत् ।

१. स्वजनाः हताः । कथं सुखिनः स्याम ?

-- ?

२. समाधौ बुद्धिः स्थिता । त्वं योगम् अवाप्स्यसि ।

-- ।

३. कूर्मवत् इन्द्रियाणि इन्द्रियार्थेभ्यः संहृतानि । प्रज्ञा प्रतिष्ठिता भवति ।

-- ।

४. सङ्गात् कामः सञ्जातः । क्रोधः अभिजायते ।

-- ।

५. सर्वभूतानां निशा जाता । संयमी जागर्ति ।

-- ।

६. चित्ते आत्मा अवस्थितः । योगी युक्त इति उच्यते ।

-- ।

छ. यथोदाहरणम् एतानि वाक्यानि सत्सप्तमीवाक्येषु परिवर्तयत -

यथा - **यदा अज्ञानेन ज्ञानम् आवृतं तदा** जन्तवः मुह्यन्ति ।

अज्ञानेन ज्ञाने आवृते सति जन्तवः मुह्यन्ति ।

१. यदा पुण्यं क्षीणं तदा जीवाः मर्त्यलोकं विशन्ति ।

-- ।

२. यदा श्रीकृष्णस्य सौम्यं मानुषं रूपं दृष्टं तदा अर्जुनः सचेताः अभवत् ।

-- ।

३. यदा कूर्मवत् इन्द्रियाणि संहृतानि तदा योगिनः प्रज्ञा प्रतिष्ठिता ।

-- ।

४. यदा विनियतं चित्तम् आत्मनि अवस्थितं तदा योगी युक्तः इति उच्यते ।

-- ।

५. यदा सततयुक्ताः भक्ताः भगवन्तं प्रीतिपूर्वकम् अभजन् तदा देवः तेभ्यः बुद्धियोगं दत्तवान् ।

-- ।

६. यदा तव उग्रम् अद्भुतं च रूपं दृष्टं तदा हे महात्मन् ! लोकत्रयं प्रव्यथितम् ।

-- ।

७. यदा केशवार्जुनयोः अद्भुतः संवादः स्मृतः तदा सञ्जयः मुहुर्मुहुः हृष्टवान् ।

-- ।

८. यदा अधर्मस्य अभ्युत्थानं जातं तदा भगवान् आत्मानं सृष्टवान् ।

-- ।

९. यदा शङ्खाः ध्माताः तदा युद्धं प्रारब्धम् ।

-- ।

१०. यदा शरीराणि जीर्णानि भवन्ति तदा देही अन्यानि शरीराणि संयाति ।

-- ।

*** एतेषु वाक्येषु ज्ञापकक्रियायाः प्रतिपादनं क्तप्रत्ययान्तेन शब्देन वर्तते ।**

क्तवतुप्रत्ययान्तानां सत्सप्तमी

अधस्तनवाक्ये ज्ञापकक्रियायाः क्तवतुप्रत्ययान्तेन शब्देन प्रतिपादनम् अस्ति ।

यथा - **कृष्णः विश्वरूपं दर्शितवान्** । अर्जुनः हृष्टवान् ।

कृष्णे विश्वरूपं दर्शितवति सति अर्जुनः हृष्टवान् ।

• **वाक्येषु सत्सप्तमीविभक्तेः प्रयोगार्थं क्तवतुप्रत्ययान्तस्य सप्तमीविभक्तिरूपाणि स्मरत -**

क्तवतुप्रत्ययान्तस्य 'गतवत्' शब्दस्य सप्तमीविभक्तिरूपाणि -		
गतवति	**गतवतोः**	**गतवत्सु** (पुंलिङ्गे नपुंसकलिङ्गे)
गतवत्याम्	**गतवत्योः**	**गतवतीषु** (स्त्रीलिङ्गे)

ज. यथोदाहरणं क्तवतुप्रत्ययान्तस्य सत्सप्तमीरूपं प्रयुज्य वाक्यानि लिखत -

यथा - यदा बालकः दुग्धं पीतवान् तदा माता आहूतवती ।
बालके दुग्धं पीतवति सति माता आहूतवती ।

१. यदा कृष्णः नृत्तवान् तदा गोप्यः नवनीतं दत्तवत्यः ।

-- ।

२. यदा आरक्षकः गृहीतवान् तदा चोरः सत्यम् उक्तवान् ।

-- ।

३. यदा सुरेशः दीपं ज्वालितवान् तदा शालिनी तं दृष्टवती ।

-- ।

४. यदा गोपालः गाः नीतवान् तदा कश्चन दुग्धं याचितवान् ।

-- ।

५. यदा कैकेयी वरं पृष्टवती तदा दशरथः व्यथितः अभवत् ।

-- ।

६. यदा पाण्डवाः वनवासार्थं गतवन्तः तदा कौरवाः राज्यं शासितवन्तः ।

-- ।

७. यदा शान्तिदूतरूपेण कृष्णः गतवान् तदा कौरवाः तं बन्धुम् उद्यताः ।

-- ।

८. यदा द्रोणः चक्रव्यूहं निर्मितवान् तदा पाण्डवाः चिन्ताग्रस्ताः अभवन् ।

-- ।

९. यदा अभिमन्युः एकाकी चक्रव्यूहं प्रविष्टवान् तदा कौरवाः मिलित्वा तं मारितवन्तः ।

-- ।

१०. यदा शिखण्डी सम्मुखम् आगतवान् तदा भीष्मः शस्त्रं त्यक्तवान् ।

-- ।

११. यदा 'अश्वत्थामा मृतः' इति युधिष्ठिरः उक्तवान् तदा द्रोणः शस्त्रं त्यक्तवान्।

-- ।

१२. यदा धृतराष्ट्रः पृष्टवान् तदा सञ्जयः युद्धवृत्तान्तं श्रावितवान्।

-- ।

झ. महाभारतयुद्धे कौरवपक्षतः अनेके महारथाः पृथक् पृथक् नेतृत्वं कृतवन्तः। एकस्य मरणानन्तरम् अन्यः नेतृत्वं करोति स्म। सत्सप्तमीप्रयोगेण यथोदाहरणं वाक्यद्वयं रचयत -

यथा - भीष्मः मृतवान्। द्रोणः नेतृत्वं कृतवान्।

भीष्मे मृतवति सति द्रोणः नेतृत्वं कृतवान्।

१. द्रोणः मृतवान्। कर्णः नेतृत्वं कृतवान्।

-- ।

२. कर्णः मृतवान्। शल्यः नेतृत्वं कृतवान्।

-- ।

ञ. यदा अर्जुनः युद्धार्थम् उपस्थितान् बान्धवान् दृष्टवान् तदा कानि अनिष्टानि अनुभूतवान् इति अधः दत्तम् अस्ति। तदाधारेण सत्सप्तमीप्रयोगं कृत्वा यथोदाहरणं वाक्यानि लिखत -

यदा अर्जुनेन योद्धुम् उपस्थितः स्वजनः दृष्टः तदा -

तस्य गात्राणि सन्नानि। तस्य मुखं परिशुष्कम्। तस्य शरीरे वेपथुः जातः। तस्य रोमहर्षः जातः। तस्य हस्तात् गाण्डीवं स्रस्तम्।

यथा - **योद्धुम् उपस्थिते स्वजने दृष्टे सति अर्जुनस्य गात्राणि सन्नानि।**

१. -- ।

२. -- ।

३. -- ।

४. -- ।

शतृशानच् - प्रत्ययान्तानां सत्सप्तमी

अधस्तनवाक्येषु ज्ञापकक्रियायाः प्रतिपादनं शतृशानच्-प्रत्ययान्तेन शब्देन वर्तते। तत् सावधानं पठत-

यथा - यदा अर्जुनः **विषीदन्** आसीत् तदा मधुसूदनः तम् उवाच।

अर्जुने **विषीदति** सति मधुसूदनः तम् उवाच।

वैज्ञानिकः **परीक्षमाणः** अस्ति। नवीनः शोधः जायते।

वैज्ञानिके **परीक्षमाणे** सति नवीनः शोधः जायते।

स्मरत -

- शतृप्रत्ययान्तस्य 'गच्छत्'शब्दस्य सप्तमीविभक्तिरूपाणि -
  गच्छति **गच्छतोः** **गच्छत्सु** (पुंलिङ्गे नपुंसकलिङ्गे)
  गच्छन्त्याम् **गच्छन्त्योः** **गच्छन्तीषु** (स्त्रीलिङ्गे)
- शानजन्तरूपाणि तु सरलानि। (पुंलिङ्गे नपुंसकलिङ्गे च रामशब्दः इव, स्त्रीलिङ्गे तु रमाशब्दः इव रूपाणि भवन्ति।)

ट. यथोदाहरणं शतृ-शानच्-प्रत्ययान्तानि रूपाणि प्रयुज्य सत्सप्तमीवाक्यानि लिखत -

यथा - यदा परेशः बहिः गच्छन् आसीत् तदा तस्य गृहे अतिथयः आगताः।
परेशे बहिः गच्छति सति तस्य गृहे अतिथयः आगताः।

१. यदा सन्तोषः छायाचित्राणि पश्यन् आसीत् तदा पुरातनस्मृतयः जागरिताः।
-- ।

२. यदा सख्यौ प्रलपन्त्यौ आस्तां तदा राजीवः तत् श्रुतवान्।
-- ।

३. यदा विमानं डयमानम् आसीत् तदा तत्र कश्चन विहगः आगतः।
-- ।

४. यदा सूर्यः उदयमानः आसीत् तदा दिवाकरः छायाचित्रं गृहीतवान्।
-- ।

५. यदा मीरा पठन्ती आसीत् तदा काचित् सखी ताम् आहूतवती।
-- ।

६. यदा लवकुशौ गायन्तौ आस्तां तदा जनाः सन्तुष्टाः अभवन्।
-- ।

७. यदा राघवः भाषमाणः आसीत् तदा आचार्यः तत्र आगतः।
-- ।

८. यदा रविः अधीयानः आसीत् तदा माता प्रकोष्ठं प्रविष्टवती।
-- ।

९. यदा रुग्णः औषधं स्वीकुर्वन् आसीत् तदा वैद्या सूचनाः उक्तवती।
-- ।

१०. यदा बालकः शयानः आसीत् तदा पिता गृहम् आगतवान्।
-- ।

११. यदा सचिनः गीतं शृण्वन् आसीत् तदा विद्युत् गता ।

-- ।

१२. यदा यात्रिकः गृहसङ्केतं पृच्छन् आसीत् तदा तत्र बसयानम् आगतम् ।

-- ।

१३. यदा आचार्येण उपदेशः कथ्यमानः अस्ति तदा सर्वे तूष्णीं तिष्ठन्ति ।

-- ।

१४. यदा अर्जुनः तपस्यां कुर्वन् आसीत् तदा परमेश्वरः तत्र आगतः ।

-- ।

१५. यदा भीष्मः शरशय्यायां शयानः आसीत् तदा कर्णः तत्र आगतवान् ।

-- ।

ठ. कुरुक्षेत्रे उपस्थितः अर्जुनः 'युद्धे सञ्जाते सति के के दुष्परिणामाः भवन्ति' इति विचिन्त्य खिद्यते । तादृशः प्रसङ्गांशः अधः प्रदत्तः अस्ति । तत्र क्रमेण सत्सप्तमीप्रयोगं कृत्वा यथोदाहरणं वाक्यानि रचयत -

युद्धं सञ्जायते । कुलक्षयः भवति । कुलधर्माः नश्यन्ति । कृत्स्नं कुलम् अधर्मः अभिभवति । कुलस्त्रियः प्रदुष्यन्ति । वर्णसङ्करः जायते । लुप्तपिण्डोदकक्रियाः पितरः नरके पतन्ति ।

यथा - युद्धे सञ्जाते सति कुलक्षयः भवति ।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

****

क्रियामूलाः हि धातवः

१३

धातु-लकार-क्रियापदानि

एतत् सम्भाषणम् उच्चैः पठत अवगच्छत च -



शिष्यः - श्रीमन् ! '**भवति**' इति क्रियापदं भूधातोः लट्लकारस्य वर्तते। अयं लट्लकारः कस्मिन् अर्थे भवति ?

आचार्यः - अयं लट्लकारः वर्तमानकालार्थे भवति। यथा - भक्तः गीतां **पठति**। अत्र पठ्-धातोः लट्लकारः विहितः। भक्तः इदानीं गीतायाः पठनं कुर्वन् अस्ति। तस्य पठनक्रिया समाप्ता न अभूत्। अतः '**पठति**' इति क्रियापदं वर्तमानकालं बोधयति।

शिष्यः - किम् अन्ये अपि लकाराः भवन्ति ? भवन्ति चेत् कस्मिन् कस्मिन् अर्थे तेषां प्रयोगः क्रियते ?

आचार्यः - आम्। अन्ये अपि **लिट्-लुट्-लृट्-लोट्-लङ्-लिङ्-लुङ्-लृङ्**-लकाराः भवन्ति। पुनः तत्र लिङ्लकारः द्विविधः भवति विधिलिङ् एवं च आशीर्लिङ् इति। **लेट्लकारः** अपि कश्चन लकारः भवति। अस्य लकारस्य प्रयोगः तु वेदेषु भवति। लोके अस्य व्यवहारः प्रायः न दृश्यते। अतः वयम् अत्र पूर्वोक्तान् दश लकारान् एव चर्चयामः।

शिष्यः - अस्तु श्रीमन् ज्ञातम्। तदा आदौ लिट्लकारः कस्मिन् अर्थे प्रयुज्यते ? किं गीतायाम् अपि अस्य प्रयोगः अस्ति ?

आचार्यः - आम्। लिट्लकारस्य प्रयोगः परोक्ष-भूतकालार्थे भवति। परोक्षम् अर्थात् कालातीतम् (यत् बहुपूर्वं घटितं स्यात्) यथा - सञ्जयः धृतराष्ट्रं प्रति **उवाच**। गुडाकेशः "न योत्स्ये इति गोविन्दम् उक्त्वा तूष्णीं **बभूव** ह। (गी.२.९)

शिष्यः - आचार्य ! ततः लुट्लकारस्य प्रयोगः कस्मिन् अर्थे भवति ? अथ च गीतायाम् अस्य प्रयोगः कुत्र अस्ति ? कृपया बोधयतु।

आचार्यः - शृणु, लुट्लकारः अनद्यतन-भविष्यत्-अर्थे भवति। अर्थात् 'न अद्यतनम् अनद्यतनम्' इति। अतीत-रात्रिद्वादशवादनात् आगामि-रात्रिद्वादशवादनं यावत् अद्यतनकालः उच्यते। तद्भिन्नः कालः अनद्यतनकालः इति। तस्मिन् भविष्यदर्थे अनद्यतनकाले लुट्लकारस्य प्रयोगः भवति। यथा - सः श्वः **गन्ता**। तस्मात् अन्यः प्रियतरः भुवि न च **भविता**। (गी.१८.६९)

शिष्यः - अधिगतम् आचार्य ! तदा लृट्लकारस्य प्रयोगः कस्मिन् अर्थे क्रियते ?

आचार्यः - भविष्यदर्थे लृट्लकारस्य प्रयोगः भवति । यथा - सः गीतां **पठिष्यति** । यः परमं गुह्यम् इदं मद्भक्तेषु **अभिधास्यति**, सः मयि परां भक्तिं कृत्वा माम् एव **एष्यति** । (गी.१८.६८)

शिष्यः - सुन्दरम् आचार्य ! कृपया लोट्लकारम् अपि वर्णयतु ।

आचार्यः - लोट्लकारः आज्ञार्थकः वर्तते । अस्य प्रयोगः आज्ञार्थे विध्याद्यर्थेषु च भवति । यथा - प्रतिदिनं गीतां **पठतु** । असंशयं समग्रं मां यथा ज्ञास्यसि **तच्छृणु** । (गी. ७.१)

शिष्यः - ज्ञातम् । अथ च लङ्लकारस्य प्रयोगः कस्मिन् अर्थे भवति ? भगवद्गीतायाम् अस्य प्रयोगः कुत्र वर्तते ?

आचार्यः - अनद्यतन-भूतकालार्थे लङ्लकारस्य प्रयोगः भवति । यथा- युवकः गीताम् **अपठत्** । दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् **अब्रवीत्** । (गी. १.२)

शिष्यः - शोभनम् आचार्य ! लिङ्लकारः कस्मिन् अर्थे प्रयुज्यते ?

आचार्यः - अस्तु । लिङ्लकारः (विधिलिङ्लकारः) विध्यादिषु अर्थेषु प्रयुज्यते । विध्यादिषु अर्थात् (विधि-निमन्त्रण-आमन्त्रण-अधीष्ट-सम्प्रश्न-प्रार्थनादिषु) षडर्थेषु प्रयुज्यते । यथा - सः गीतां **पठेत्** । योगिन् ! अहं सदा त्वां परिचिन्तयन् कथं **विद्याम्** । (गी.१०.१७)

शिष्यः श्रीमन् ! कृपया आशीर्लिङ्लकारस्य प्रयोगान् दर्शयतु ।

आचार्यः अस्य लकारस्य आशीर्वादार्थे प्रयोगः भवति । यथा- शुभं **भूयात्** । त्वं वीरप्रसविनी **भूयाः** । त्वं दीर्घायुः **भूयाः** ।

शिष्यः - अवबुद्धम् आचार्य ! अधुना लुङ्लकारस्य प्रयोगः कस्मिन् अर्थे भवति ? किं गीतायाम् अस्य प्रयोगः दृश्यते ?

आचार्यः - अस्य लकारस्य प्रयोगः सामान्य-भूतकालार्थे भवति । यथा - शिष्यः गीताम् **अपाठीत्** । वासुदेवस्य पार्थस्य च इमम् अद्भुतं संवादम् अहम् **अश्रौषम्** । (गी. १८.७४)

शिष्यः आचार्य ! अहं सद्गुरुं प्राप्य धन्यः अस्मि कृपया सम्प्रति अन्तिमं लृङ्लकारम् अपि वर्णयतु ।

आचार्यः - यत्र भविष्यदर्थे क्रियायाः अपूर्णता काल्पनिकता वा प्रतीयेते तत्र लृङ्लकारस्य प्रयोगः क्रियते । यथा - यदि अभिमन्युः व्यूहभेदनं पूर्णतया **अज्ञास्यत्** तर्हि सः न **अमरिष्यत्** ।

शिष्यः - अस्तु श्रीमन् । दशलकाराणां विषये सामान्येन ज्ञातम् । क्रियाबोधकं पदं क्रियापदम् । यथा - गच्छति इति गमनक्रियाबोधकं क्रियापदम् अस्ति । क्रियापदानां मूले धातवः भवन्ति । यथा गच्छति इति क्रियापदस्य मूले गम्-धातुः अस्ति । धातुभ्यः लकाराः विधीयन्ते । यथा - गम्-धातोः लडादयः भवन्ति । तेन गच्छति, जगाम, गन्ता, गमिष्यति, गच्छतु, अगच्छत्, गच्छेत्, गम्यात्, अगमत्, अगमिष्यत् इत्यादीनि क्रियापदरूपाणि भवन्ति ।

आचार्यः - बाढम् । सुष्ठु ज्ञातं त्वया ।

अवधेयम्

उपरि उक्तेषु विषयेषु त्रयः अंशाः सन्ति - धातुः, लकाराः क्रियापदं चेति।

- क्रियापदस्य मूलं धातुः कथ्यते। यथा - 'गच्छति' इत्यत्र गम् इति क्रियापदमूलं वर्तते। अतः 'गम्' इति धातुः।
- लडादयः लकाराः उच्यन्ते। यथा - लट्-लिट्-लुडादयः
- मूलधातोः तिबादिप्रत्ययानां योजनेन यत् रूपं सिद्ध्यति तत् क्रियापदम्। यथा - गम् + तिप् = गच्छति।

*** अधः प्रदत्तां तालिकां परिशीलयत -**

क्रियापदम्		धातुः
ब्रवीमि	गी.१. ७	ब्रू
आह	गी.१.२१	ब्रू
निरीक्षे	गी.१.२२	ईक्ष्
अवेक्षे	गी.१.२३	ईक्ष्
सीदन्ति	गी.१.२९	सद्
परिशुष्यति	गी.१.२९	शुष्
जायते	गी.१.२९,४१	जन्
स्रंसते	गी.१.३०	स्रंस्
परिदह्यते	गी.१.३०	दह्
शक्नोमि	गी.१.३०	शक्
भ्रमति	गी.१.३०	भ्रम्
पश्यामि	गी.१.३१	दृश्
अनुपश्यामि	गी.१.३१	दृश्
काङ्क्षे (आर्षप्रयोगः) काङ्क्षामि	गी.१.३२	काङ्क्ष्
इच्छामि	गी.१.३६	इष्

पश्यन्ति	गी.१.३८	दृश्
प्रणश्यन्ति	गी.१.४०	नश्
अभिभवति	गी.१.४०	भू
प्रदुष्यन्ति	गी.१.४१	दुष्
पतन्ति	गी.१.४२	पत्
उत्साद्यन्ते	गी.१.४३	सादि
भवति	गी.१.४४	भू

अभ्यासः

क. अधः तालिकायां प्रदत्तानां क्रियापदानां यथोदाहरणं मूलधातुं लिखत -

क्रियापदानि		**धातवः**
उपपद्यते	**गी. २.३**	**पद्**
१. विद्मः	गी. २.६	
२. पृच्छामि	गी. २.७	
३. प्रपश्यामि	गी. २.८	
४. भाषसे	गी.२.११	
५. अनुशोचन्ति	गी.२.११	
६. मुह्यति	गी.२.१३	
७. व्यथयन्ति	गी.२.१५	
८. कल्पते	गी.२.१५	
९. विद्यते	गी.२.१६,३१,४०	
१०. अर्हति	गी.२.१७	
११. वेत्ति	गी.२.१९	
१२. मन्यते	गी.२.१९	
१३. उवाच	गी.२.१,१०	

१४. बभूव गी.२.९	
१५. भविता गी.२.२०	
१६. गन्तासि गी.२.५२	
१७. प्रतियोत्स्यामि गी.२.४	
१८. योत्स्ये गी.२.९	
१९. भविष्यामः गी.२.१२	
२०. करिष्यसि गी.२.३३	
२१. अवाप्स्यसि गी.२.३३,३८,५३	
२२. कथयिष्यन्ति गी.२.३४	
२३. यास्यसि गी.२.३५	
२४. वदिष्यन्ति गी.२.३६	
२५. उत्तिष्ठ गी.२. ३,३७	
२६. ब्रूहि गी.२.७	
२७. शाधि गी.२.७	
२८. तितिक्षस्व गी.२.१४	
२९. विद्धि गी.२.१७	
३०. युध्यस्व गी.२.१८	
३१. युज्यस्व गी.२. ३८,५०,	
३२. शृणु गी.२.३९	
३३. भव गी.२.४५	
३४. अस्तु गी.२.४७	
३५. कुरु गी.२.४८	
३६. अन्विच्छ गी.२.४९	
३७. भुञ्जीय गी.२.५	
३८. जयेम गी.२.६	

३९. जयेयुः गी.२.६	
४०. अपनुद्यात् गी.२.८	
४१. प्रभाषेत गी.२.५४	
४२. आसीत गी.२.५४,६१	
४३. मा स्म गमः गी.२.३	
४४. मा भूः गी.२.४७	

*** अधः प्रदत्तानि धातुरूपाणि सावधानं पठत -**

भू-धातुः (परस्मैपदम्)				लभ्-धातुः (आत्मनेपदम्)		
लट्लकारः				लट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.पु.	भवति	भवतः	भवन्ति	लभते	लभेते	लभन्ते
म.पु.	भवसि	भवथः	भवथ	लभसे	लभेथे	लभध्वे
उ.पु.	भवामि	भवावः	भवामः	लभे	लभावहे	लभामहे
लिट्लकारः				लिट्लकारः		
प्र.पु.	बभूव	बभूवतुः	बभूवुः	लेभे	लेभाते	लेभिरे
म.पु.	बभूविथ	बभूवथुः	बभूव	लेभिषे	लेभाथे	लेभिढ्वे
उ.पु.	बभूव	बभूविव	बभूविम	लेभे	लेभिवहे	लेभिमहे
लुट्लकारः				लुट्लकारः		
प्र.पु.	भविता	भवितारौ	भवितारः	लब्धा	लब्धारौ	लब्धारः
म.पु.	भवितासि	भवितास्थः	भवितास्थ	लब्धासे	लब्धासाथे	लब्धाध्वे
उ.पु.	भवितास्मि	भवितास्वः	भवितास्मः	लब्धाहे	लब्धास्वहे	लब्धास्महे
लृट्लकारः				लृट्लकारः		
प्र.पु.	भविष्यति	भविष्यतः	भविष्यन्ति	लप्स्यते	लप्स्येते	लप्स्यन्ते
म.पु.	भविष्यसि	भविष्यथः	भविष्यथ	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उ.पु.	भविष्यामि	भविष्यावः	भविष्यामः	लप्स्ये	लप्स्यावहे	लप्स्यामहे

लोट्लकारः				लोट्लकारः		
प्र.पु.	भवतु	भवताम्	भवन्तु	लभताम्	लभेताम्	लभन्ताम्
म.पु.	भव	भवतम्	भवत	लभस्व	लभेथाम्	लभध्वम्
उ.पु.	भवानि	भवाव	भवाम	लभै	लभावहै	लभामहै
लङ्लकारः				लङ्लकारः		
प्र.पु.	अभवत्	अभवताम्	अभवन्	अलभत	अलभेताम्	अलभन्त
म.पु.	अभवः	अभवतम्	अभवत	अलभथाः	अलभेथाम्	अलभध्वम्
उ.पु.	अभवम्	अभवाव	अभवाम	अलभे	अलभावहि	अलभामहि
विधिलिङ्लकारः				विधिलिङ्लकारः		
प्र.पु.	भवेत्	भवेताम्	भवेयुः	लभेत	लभेयाताम्	लभेरन्
म.पु.	भवेः	भवेतम्	भवेत	लभेथाः	लभेयाथाम्	लभेध्वम्
उ.पु.	भवेयम्	भवेव	भवेम	लभेय	लभेवहि	लभेमहि
आशीर्लिङ्लकारः				आशीर्लिङ्लकारः		
प्र.पु.	भूयात्	भूयास्ताम्	भूयासुः	लप्सीष्ट	लप्सीयास्ताम्	लप्सीरन्
म.पु.	भूयाः	भूयास्तम्	भूयास्त	लप्सीष्ठाः	लप्सीयास्थाम्	लप्सीध्वम्
उ.पु.	भूयासम्	भूयास्व	भूयास्म	लप्सीय	लप्सीवहि	लप्सीमहि
लुङ्लकारः				लुङ्लकारः		
प्र.पु.	अभूत्	अभूताम्	अभूवन्	अलब्ध	अलप्साताम्	अलप्सत
म.पु.	अभूः	अभूतम्	अभूत	अलब्धाः	अलप्साथाम्	अलब्ध्वम्
उ.पु.	अभूवम्	अभूव	अभूम	अलप्सि	अलप्स्वहि	अलप्स्महि
लृङ्लकारः				लृङ्लकारः		
प्र.पु.	अभविष्यत्	अभविष्यताम्	अभविष्यन्	अलप्स्यत	अलप्स्येताम्	अलप्स्यन्त
म.पु.	अभविष्यः	अभविष्यतम्	अभविष्यत	अलप्स्यथाः	अलप्स्येथाम्	अलप्स्यध्वम्
उ.पु.	अभविष्यम्	अभविष्याव	अभविष्याम	अलप्स्ये	अलप्स्यावहि	अलप्स्यामहि

ख. अधः तालिकायां प्रदत्तानां धातुरूपाणां यथोदाहरणं लकार-पुरुष-वचनानि लिखत -

धातुरूपाणि		लकारः	पुरुषः	वचनम्
यथा -	इच्छामि - गी.१८.१	लट्लकारः	उत्तमपुरुषः	एकवचनम्
१	विदुः - गी.१८.२			
२	प्राहुः - गी.१८.३			
३	उपपद्यते - गी.१८.७			
४	द्वेष्टि - गी.१८.१०			
५	अनुषज्जते - गी.१८.१०			
६	भवति - गी.१८.१२			
७	प्रारभते - गी.१८.१५			
८	पश्यति - गी.१८.१६			
९	लिप्यते - गी.१८.१७			
१०	हन्ति - गी.१८.१७			
११	उवाच - गी.१८.७३			
१२	भविता- गी.१८.६९			
१३	तरिष्यसि - गी.१८.५८			
१४	श्रोष्यसि - गी.१८.५८			
१५	विनङ्क्ष्यसि - गी.१८.५८			
१६	योत्स्ये - गी.१८.५९			
१७	नियोक्ष्यति - गी.१८.५९			
१८	करिष्यसि - गी.१८.६०			
१९	प्राप्स्यसि - गी.१८.६२			
२०	वक्ष्यामि - गी.१८.६४			
२१	एष्यसि - गी.१८.६५			
२२	मोक्षयिष्यामि- गी.१८.६६			

२३	अभिधास्यति - गी.१८.६८			
२४	एष्यति - गी.१८.६८			
२५	अध्येष्यते - गी.१८.७०			
२६	करिष्ये - गी.१८.७३			
२७	शृणु - गी.१८.४.१९			
२८	निबोध - गी.१८.१३. ५०			
२९	विद्धि - गी.१८.२०. २१			
३०	भव - गी.१८.५७. ६५			
३१	गच्छ - गी.१८.६२			
३२	कुरु - गी.१८.६३			
३३	नमस्कुरु - गी.१८.६५			
३४	व्रज - गी.१८.६६			
३५	त्यजेत् - गी.१८.८,४८			
३६	स्याम् - गी.१८.७०			
३७	शृणुयात् - गी.१८.७१			
३८	अश्रौषम् - गी.१८.७४			

*** अधः तालिकायां प्रदत्तानि क्रियापदानि अवधानेन परिशीलयत -**

पर्युपासते	निवसिष्यसि{आर्षप्रयोगः} निवत्स्यति	आधत्स्व	विदुः
उपासते	अवाप्स्यसि	निवेशय{णिच्}	वेत्ति
प्राप्नुवन्ति	शृणु	इच्छ	प्रमुच्यते
अवाप्यते	कथय	भव	भवन्ति
भवामि	विद्धि	कुरु	युज्यते
शक्नोषि	अवगच्छ	प्राहुः	प्रवर्तते
असि	स्यात्	वेद	भजन्ते

विशिष्यते	वद	उपलभ्यते	तुष्यन्ति
उद्विजते	कुरु	निवर्तन्ति{आर्षः} निवर्तन्ते	रमन्ति{आर्षः} रमन्ते
हृष्यति	समाचर	प्रपद्ये	ददामि
द्वेष्टि	प्रसविष्यध्वम्{आर्षप्रयोगः} प्रसूध्वम्	गच्छन्ति	उपयान्ति
शोचति	अस्तु	भासयते	नाशयामि
काङ्क्षति	भावयत	निवर्तन्ते	आहुः
विद्याम्	भावयन्तु	कर्षति	ब्रवीषि
नियोजयसि	विद्धि	अवाप्नोति	मन्ये
मोहयसि	युध्यस्व	उत्क्रामति	वदसि
अश्नुते	प्रजहि	संयाति	वेत्थ
समधिगच्छति	आप्नोति	उपसेवते	अर्हसि
तिष्ठति	अर्हसि	अनुपश्यन्ति	तिष्ठसि
कार्यते	आचरति	पश्यन्ति	असि
आस्ते	करुते	धारयामि	अस्ति
उच्यते	अनुवर्तते	पुष्णामि	कथयिष्यामि
आरभते	अस्ति	पचामि	अस्मि
विशिष्यते	वर्ते	उच्यते	भुञ्जते
भुङ्क्ते	अनुवर्तन्ते	बिभर्ति	पचन्ति
मुच्यन्ते	कुर्वन्ति	अस्मि	भवन्ति
सज्जते	मन्यते	जानाति	भवति
जीवति	वर्तन्ते	भजति	अनुवर्तयति

ग. अधः प्रदत्तेभ्यः गीताश्लोकेभ्यः क्रियापदानि चित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१.१॥

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥२.१॥

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥३.१॥

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥४.१॥

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥५.१॥

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥६.१॥

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥७.१॥

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥८.१॥

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनुसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥९.१॥

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१०.१॥

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१२.१॥

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१३.१॥

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१४.१॥

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१५.१॥

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१७.१॥

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१८.१॥

यथा - अकुर्वत	--------------------	------------------------
--------------------	--------------------	------------------------
--------------------	--------------------	------------------------
--------------------	--------------------	------------------------
--------------------	--------------------	------------------------
--------------------	--------------------	------------------------
--------------------	--------------------	------------------------
--------------------	--------------------	------------------------

****

परोपकारस्य फलम् इदम्

कर्मणिप्रयोगः **१४**

एतां कथाम् उच्चैः पठत -

कदाचित् श्रीकृष्णेन अर्जुनेन सह अटनाय बहिः **गम्यते**। मार्गे ताभ्यां कश्चन याचकः **दृश्यते**। अर्जुनेन करुणया तस्मै सुवर्णमुद्रायुक्ता एका गोणी **दीयते**। एतेन आकस्मिक-धनलाभेन सः याचकः अतीव प्रसन्नः भवति। 'अधुना मया सुखेन जीवनं याप्यते' इति चिन्तयता तेन सन्तोषेण गृहं **गम्यते**। परन्तु तस्य दौर्भाग्येण मार्गे चौरैः बलात् तस्य धनयुक्ता गोणी **चोर्यते**।

तस्मात् अतीव दुःखेन तेन पुनः भिक्षा **याच्यते**। यदा अर्जुनेन पुनः सः याचकः दृश्यते तदा तेन कारणं **पृच्छयते**। सर्वं वृत्तान्तं श्रुत्वा करुणया अर्जुनेन पुनः तस्मै एकं बहुमूल्यं माणिक्यं **दीयते**। माणिक्यं स्वीकृत्य तेन याचकेन गृहं **गम्यते**। तस्य गृहे एकः पुरातनः घटः अस्ति। चोरेभ्यः भयात् तेन माणिक्यं तस्मिन् घटे **स्थाप्यते**।

तथापि दौर्भाग्येण पुनः सः याचकः **अनुचर्यते**। यदा श्रान्तेन तेन निद्रा क्रियते, तदा तस्य पत्न्या नद्याः जलम् आनेतुं **गम्यते**। परन्तु मार्गे पतनेन तस्याः घटः भग्नः भवति। अतः तया पुनः गृहम् आगत्य तत्र स्थितं पुरातनं घटं स्वीकृत्य नदी **गम्यते**। नद्याः जलेन घटं स्वच्छीकृत्य जलं पूरयित्वा तया पुनः गृहम् आगम्यते। यदा तया गृहं प्राप्यते, तदा याचकेन घटे माणिक्यस्य अन्वेषणं **क्रियते**। परन्तु तेन माणिक्यं न **लभ्यते**। अतः अत्यन्तं दुःखेन तेन पुनः भिक्षा **याच्यते**।

पुनः अर्जुनेन यदा सः याचकः दृश्यते तदा तेन भिक्षायाचनस्य कारणं **पृच्छयते**। अथ सम्पूर्णं वृत्तान्तं श्रुत्वा अर्जुनेन चिन्त्यते यत् एतस्य महत् दुर्दैवं वर्तते। दैवं परिवर्तयितुं तु केवलं श्रीकृष्णः एव समर्थः अस्ति। अतः अर्जुनेन कृष्णस्य स्तुतिः **आरभ्यते**।

तदा प्रसन्नेन श्रीकृष्णेन परमकृपया तस्मै याचकाय त्रीणि नाणकानि **दीयन्ते**। तत् दृष्ट्वा अर्जुनेन कृष्णः **पृच्छयते** - "प्रभो ! मया दत्ताभिः सुवर्णमुद्राभिः माणिक्येन च एतस्य याचकस्य दारिद्र्यं दूरीकर्तुं न शक्तम्, एवं चेत् नाणकत्रयेण किम् ?"

तदा श्रीकृष्णेन हसित्वा सः **उच्यते** - "याचकम् अनुगच्छतु" इति। अर्जुनेन सः **अनुगम्यते**।

तेन याचकेन गमनसमये विचारः **क्रियते**, 'त्रिभिः नाणकैः किं भवति ? एतेन तु मम सकृत् भोजनम् अपि न भवति। तर्हि देवेन एतादृशी कृपा किमर्थं कृता स्यात् ?' इति।

तस्मिन् एव समये तेन एकः धीवरः **दृश्यते** । धीवरस्य जाले तेन एकः मीनः **दृश्यते** । तेन चिन्त्यते, 'एतेषां नाणकानां मम तु कोऽपि लाभः नास्ति, अतः मया एषः मीनः **रक्ष्यते**' इति । एतत् विचिन्त्य तेन त्रीणि नाणकानि दत्त्वा मीनः **क्रीयते** । यदा तेन मीनः जले **क्षिप्यते**, तदा मीनस्य मुखात् किमपि बहिः पतति । याचकेन **दृश्यते**, तत् तु तदेव माणिक्यं यत् पूर्वं घटात् नद्यां पतितम् । तत् दृष्ट्वा तेन अतीव आनन्देन उच्चैः **उद्यते** - "प्राप्तः प्राप्तः" इति । तदा तस्मिन् एव मार्गे सः एव चोरः आसीत्, येन किञ्चित् समयात् पूर्वं तस्य याचकस्य धनं चोरितम् आसीत् । याचकस्य ध्वनिं श्रुत्वा तेन चोरेण **चिन्त्यते**, 'एषा उद्घोषणा मम कृते वर्तते वा ?' अतः भयात् तेन झटिति सुवर्णमुद्राः तस्मै **अर्प्यन्ते** ततः **गम्यते** च ।

एतत् सर्वं दृष्ट्वा विस्मितेन अर्जुनेन श्रीकृष्णः **नमस्क्रियते** । अर्जुनेन **उद्यते** - "यत् कार्यं मम सुवर्णमुद्राभिः माणिक्येन च कर्तुं न शक्तम्, तत् भवतः त्रिभिः नाणकैः कृतम् ।"

तदा श्रीकृष्णेन **उच्यते** - "अत्र भवतः न कोऽपि दोषः । यदा भवता सुवर्णमुद्राणां गोणी बहुमूल्यं माणिक्यं च दत्तं तदा याचकेन केवलं स्वस्य विषये एव विचारः कृतः । किन्तु यदा अहं त्रीणि नाणकाणि दत्तवान् तदा तेन अन्यस्य विचारः कृतः । अतः तस्य भाग्योदयः अभवत् ।"

एतानि वाक्यानि सावधानतया उच्चैः पठत -

कृष्णेन अटनाय बहिः गम्यते ।
अर्जुनेन तस्मै सुवर्णमुद्रायुक्ता एका गोणी दीयते ।
अधुना मया सुखेन जीवनं याप्यते ।
अर्जुनेन पुनः याचकः दृश्यते ।
तेन कारणं पृच्छयते ।
तेन पाचकेन गृहं गम्यते ।
भयात् तेन माणिक्यं घटे स्थाप्यते ।
श्रान्तेन तेन निद्रा क्रियते ।
पत्न्या जलम् आनेतुं गम्यते ।
तया गृहं प्राप्यते ।
याचकेन घटे माणिक्यस्य अन्वेषणं क्रियते ।
तेन माणिक्यं न लभ्यते ।
तेन पुनः भिक्षा याच्यते ।
अर्जुनेन सह याचकः दृश्यते ।
याचकाय त्रीणि नाणकानि दीयन्ते ।
अर्जुनेन कारणं पृच्छयते ।
कृष्णेन हसित्वा अर्जुनः उच्यते ।
याचकेन विचारः क्रियते ।
तेन एकः धीवरः दृश्यते ।
याचकेन एषः मीनः रक्ष्यते ।
धीवरेण मीनः जले क्षिप्यते ।
याचकेन उच्चैः उद्यते ।
चौरेण स्वर्णमुद्राः अर्प्यन्ते ।
अर्जुनेन कृष्णः नमस्क्रियते ।

एतेषु वाक्येषु कर्मणिप्रयोगः अस्ति ।

पूर्वम् अस्माभिः पठितानि वाक्यानि एतादृशानि -

युगे युगे सम्भवामि । (गी. ४.८)
त्वं शोचितुं न अर्हसि । (गी. २.२५)
वयं सुखिनः स्याम । (गी. १.३७)
यूयं धर्मयुद्धं कुरुथ ।

योगाच्चलितमानसः कां गतिं गच्छति। (गी. ६.३७) ते मां तत्त्वेन न अभिजानन्ति। (गी. ९.२४)

एतेषु वाक्येषु कर्तरिप्रयोगः अस्ति।

एतानि वाक्यानि परिशीलयत -

कर्तरिप्रयोगः	**कर्मणिप्रयोगः**
धीवरः मीनं क्षिपति।	धीवरेण मीनः क्षिप्यते।
अर्जुनः कृष्णं पृच्छति।	अर्जुनेन कृष्णः पृच्छयते।
कृष्णः हसित्वा अर्जुनं वक्ति।	कृष्णेन हसित्वा अर्जुनः उच्यते।
याचकः विचारं करोति।	याचकेन विचारः क्रियते।
सा गृहं प्राप्नोति।	तया गृहं प्राप्यते।

अवधेयम्

उपरि उक्तेषु सर्वेषु वाक्येषु त्रयः अंशाः सन्ति - **कर्तृपदं, कर्मपदं, क्रियापदं** चेति।

यत् पदं क्रियां द्योतयति तत् क्रियापदम्। यः क्रियां करोति सः कर्ता। कर्तृसूचकं पदं कर्तृपदम्। कर्मवाचकं पदं कर्मपदम्। 'धीवरः मीनं क्षिपति' इत्यत्र 'धीवरः' इति कर्तृपदम्, 'मीनम्' इति कर्मपदम्, 'क्षिपति' इत्येतत् क्रियापदम्।

प्रयोगाः त्रिविधाः भवन्ति - कर्तरिप्रयोगः, कर्मणिप्रयोगः, भावेप्रयोगः चेति।

कर्तरिप्रयोगसम्बद्धानां वाक्यानां परिशीलनानन्तरं वयं कर्तरिप्रयोगस्य नियमान् एवं संग्रहीतुं शक्नुमः -

- **कर्तरिप्रयोगे कर्तृपदं प्रथमाविभक्त्यन्तं भवति।**

  यथा - 'धृतराष्ट्रः प्रश्नं पृच्छति' इत्यत्र 'धृतराष्ट्रः' इति कर्तृपदं प्रथमाविभक्त्यन्तम् अस्ति।

- **कर्तरिप्रयोगे कर्मपदं (यदि भवति तर्हि) द्वितीयाविभक्त्यन्तं भवति।**

  यथा - 'द्रौपदी कृष्णं स्मरति' इत्यत्र 'कृष्णम्' इति द्वितीयाविभक्त्यन्तम् अस्ति।

- **कर्तरिप्रयोगे कर्तुः क्रियापदस्य च वचनसम्बन्धः पुरुषसम्बन्धः च भवति। (कर्तृपदम् एकवचनान्तं चेत् क्रियापदम् अपि एकवचनान्तं भवति। कर्तृपदं द्विवचनान्तं बहुवचनान्तं वा चेत् क्रियापदम् अपि द्विवचनान्तं बहुवचनान्तं वा भवति। कर्तारम् अनुसृत्य प्रथमपुरुषस्य मध्यमपुरुषस्य उत्तमपुरुषस्य वा क्रियापदस्य प्रयोगः भवति।)**

यथा -

पुरुषः कृष्णं **स्मरति** । (वचनसम्बन्धः)

पुरुषौ कृष्णं **स्मरतः** । (वचनसम्बन्धः)

पुरुषाः कृष्णं **स्मरन्ति** । (वचनसम्बन्धः)

सः शस्त्रं **क्षिपति** । (पुरुषसम्बन्धः)

त्वं शस्त्रं **क्षिपसि** । (पुरुषसम्बन्धः)

अहं शस्त्रं **क्षिपामि** । (पुरुषसम्बन्धः)

एते अंशाः अस्माभिः पूर्वमपि परिशीलिताः स्युः एव ।

एवमेव कर्मणिप्रयोगसम्बद्धानि वाक्यानि परिशील्य वयं कर्मणिप्रयोगस्य नियमान् एवं संग्रहीतुं शक्नुमः -

- कर्मणिप्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति ।

  यथा - कृष्णेन अर्जुनः पृच्छयते इत्यत्र 'कृष्णेन' इति कर्तृपदं तृतीयाविभक्त्यन्तम् अस्ति ।

- कर्मणिप्रयोगे कर्मपदं प्रथमाविभक्त्यन्तं भवति ।

  यथा - द्रौपद्या कृष्णः स्मर्यते इत्यत्र 'कृष्णः' इति कर्मपदं प्रथमाविभक्त्यन्तम् अस्ति ।

- कर्मणिप्रयोगे कर्मणः क्रियापदस्य च वचनसम्बन्धः पुरुषसम्बन्धः च भवति । (कर्मपदम् एकवचनान्तं चेत् क्रियापदम् अपि एकवचनान्तं भवति । कर्मपदं द्विवचनान्तं बहुवचनान्तं वा चेत् क्रियापदम् अपि द्विवचनान्तं बहुवचनान्तं वा भवति । कर्म अनुसृत्य प्रथमपुरुषस्य मध्यमपुरुषस्य उत्तमपुरुषस्य वा क्रियापदस्य प्रयोगः भवति ।)

यथा - तेन **रथः नीयते** । (वचनसम्बन्धः)

तेन **रथौ नीयेते** । (वचनसम्बन्धः)

तेन **रथाः नीयन्ते** । (वचनसम्बन्धः)

कृष्णेन **सः आहूयते** । (पुरुषसन्बन्धः)

कृष्णेन **त्वम् आहूयसे** । (पुरुषसन्बन्धः)

कृष्णेन **अहम् आहूये** । (पुरुषसन्बन्धः)

अतः कर्मणिप्रयोगे वाक्यानि एवं भवन्ति -

कृष्णेन सः दृश्यते ।	कृष्णेन तौ दृश्येते ।	कृष्णेन ते दृश्यन्ते ।
कृष्णेन त्वं दृश्यसे ।	कृष्णेन युवां दृश्येथे ।	कृष्णेन यूयं दृश्यध्वे ।
कृष्णेन अहं दृश्ये ।	कृष्णेन आवां दृश्यावहे ।	कृष्णेन वयं दृश्यामहे ।

	कर्तरिप्रयोगे	कर्मणिप्रयोगे
परस्मैपदी	पठति	पठ् + य + ते = पठ्यते
आत्मनेपदी	सेवते	सेव् + य + ते = सेव्यते

o उपरि दत्तेषु धातुरूपेषु परस्मैपदिनाम् अन्ते 'ति' इति, आत्मनेपदिनाम् अन्ते 'ते' इति च अस्ति ।

o कर्मणिप्रयोगे तु उभयविधानाम् अपि धातूनाम् अन्ते 'ते' इति आत्मनेपदिरूपमेव भवति ।

o कर्मणिप्रयोगे धातोः अनन्तरं 'य' इति श्रूयते ।

उक्तस्य सारः	
कर्तरिप्रयोगः	**कर्मणिप्रयोगः**
• कर्तृपदं प्रथमाविभक्तौ भवति । • कर्मपदं द्वितीयाविभक्तौ भवति । • क्रियापदं कर्तृपदानुगुणं भवति । कर्मपदस्य वचनादिपरिवर्तनात् क्रियापदरूपे परिवर्तनं न भवति ।	• कर्तृपदं तृतीयाविभक्तौ भवति । • कर्मपदं प्रथमाविभक्तौ भवति । • क्रियापदं कर्मपदानुगुणं भवति । कर्तृपदस्य वचनादिपरिवर्तनात् क्रियापदरूपे परिवर्तनं न भवति ।
• क्रियापदं परस्मैपदि आत्मनेपदि वा भवितुम् अर्हति ।	• क्रियापदम् आत्मनेपदि एव भवति ।

अवधेयम्

कर्मणिप्रयोगे सकर्मकधातूनां दशसु अपि लकारेषु प्रयोगः विधीयते । अग्रे वयं परस्मैपदे 'पठ्' इति आत्मनेपदे च 'लभ्' इति सकर्मकधात्वोः दशलकारेषु रूपाणि पश्यामः । अन्येषां सदृशधातूनां रूपाणि प्रायः एवमेव भवन्ति ।

* **अधः प्रदत्तानि सकर्मकस्य परस्मैपदिनः पठ्धातोः आत्मनेपदिनः लभ्-धातोः च कर्मणिरूपाणि अवधानेन पठत -**

पठ्-धातुः (परस्मैपदम्) कर्मणि				लभ्-धातुः (आत्मनेपदम्) कर्मणि		
लट्लकारः				लट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.पु.	पठ्यते	पठ्येते	पठ्यन्ते	लभ्यते	लभ्येते	लभ्यन्ते

म.पु.	पठ्यसे	पठ्येथे	पठ्यध्वे	लभ्यसे	लभ्येथे	लभ्यध्वे
उ.पु.	पठ्ये	पठ्यावहे	पठ्यामहे	लभ्ये	लभ्यावहे	लभ्यामहे
लिट्लकारः				लिट्लकारः		
प्र.पु.	पेठे	पेठाते	पेठिरे	लेभे	लेभाते	लेभिरे
म.पु.	पेठिषे	पेठाथे	पेठिध्वे	लेभिषे	लेभाथे	लेभिध्वे
उ.पु.	पेठे	पेठिवहे	पेठिमहे	लेभे	लेभिवहे	लेभिमहे
लुट्लकारः				लुट्लकारः		
प्र.पु.	पठिता	पठितारौ	पठितारः	लब्धा	लब्धारौ	लब्धारः
म.पु.	पठितासे	पठितासाथे	पठिताध्वे	लब्धासे	लब्धासाथे	लब्धाध्वे
उ.पु.	पठिताहे	पठितास्वहे	पठितास्महे	लब्धाहे	लब्धास्वहे	लब्धास्महे
लृट्लकारः				लृट्लकारः		
प्र.पु.	पठिष्यते	पठिष्येते	पठिष्यन्ते	लप्स्यते	लप्स्येते	लप्स्यन्ते
म.पु.	पठिष्यसे	पठिष्येथे	पठिष्यध्वे	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उ.पु.	पठिष्ये	पठिष्यावहे	पठिष्यामहे	लप्स्ये	लप्स्यावहे	लप्स्यामहे
लोट्लकारः				लोट्लकारः		
प्र.पु.	पठ्यताम्	पठ्येताम्	पठ्यन्ताम्	लभ्यताम्	लभ्येताम्	लभ्यन्ताम्
म.पु.	पठ्यस्व	पठ्येथाम्	पठ्यध्वम्	लभ्यस्व	लभ्येथाम्	लभ्यध्वम्
उ.पु.	पठ्यै	पठ्यावहै	पठ्यामहै	लभ्यै	लभ्यावहै	लभ्यामहै
लङ्लकारः				लङ्लकारः		
प्र.पु.	अपठ्यत	अपठ्येताम्	अपठ्यन्त	अलभ्यत	अलभ्येताम्	अलभ्यन्त
म.पु.	अपठ्यथाः	अपठ्येथाम्	अपठ्यध्वम्	अलभ्यथाः	अलभ्येथाम्	अलभ्यध्वम्
उ.पु.	अपठ्ये	अपठ्यावहि	अपठ्यामहि	अलभ्ये	अलभ्यावहि	अलभ्यामहि
विधिलिङ्लकारः				विधिलिङ्लकारः		
प्र.पु.	पठ्येत	पठ्येयाताम्	पठ्येरन्	लभ्येत	लभ्येयाताम्	लभ्येरन्
म.पु.	पठ्येथाः	पठ्येयाथाम्	पठ्येध्वम्	लभ्येथाः	लभ्येयाथाम्	लभ्येध्वम्

उ.पु.	पठ्येय	पठ्येवहि	पठ्येमहि	लभ्येय	लभ्येवहि	लभ्येमहि
आशीर्लिङ्लकारः				आशीर्लिङ्लकारः		
प्र.पु.	पठिषीष्ट	पठिषीयास्ताम्	पठिषीरन्	लप्सीष्ट	लप्सीयास्ताम्	लप्सीरन्
म.पु.	पठिषीष्ठाः	पठिषीयास्थाम्	पठिषीध्वम्	लप्सीष्ठाः	लप्सीयास्थाम्	लप्सीध्वम्
उ.पु.	पठिषीय	पठिषीवहि	पठिषीमहि	लप्सीय	लप्सीवहि	लप्सीमहि
लुङ्लकारः				लुङ्लकारः		
प्र.पु.	अपाठि	अपाठिषाताम्	अपाठिषत	अलब्ध	अलप्साताम्	अलप्सत
म.पु.	अपाठिष्ठाः	अपाठिषाथाम्	अपाठिध्वम्	अलब्धाः	अप्साथाम्	अलब्ध्वम्
उ.पु.	अपाठिषि	अपाठिष्वहि	अपाठिष्महि	अलप्सि	अलप्स्वहि	अलप्स्महि
लृङ्लकारः				लृङ्लकारः		
प्र.पु.	अपठिष्यत	अपठिष्येताम्	अपठिष्यन्त	अलप्स्यत	अलप्स्येताम्	अलप्स्यन्त
म.पु.	अपठिष्यथाः	अपठिष्येथाम्	अपठिष्यध्वम्	अलप्स्यथाः	अलप्स्येथाम्	अलप्स्यध्वम्
उ.पु.	अपठिष्ये	अपठिष्यावहि	अपठिष्यामहि	अलप्स्ये	अलप्स्यावहि	अलप्स्यामहि

अभ्यासः

क. यथोदाहरणं कर्मणिप्रयोगे प्रदत्तानि वाक्यानि कर्तरिप्रयोगे परिवर्तयत -

यथा - श्रीकृष्णेन अटनाय बहिः गम्यते। **श्रीकृष्णः अटनाय बहिः गच्छति।**

१. अर्जुनेन एका गोणी दीयते। ---।
२. ताभ्यां याचकः दृश्यते। ---।
३. तेन भिक्षा याच्यते। ---।
४. चौरैः गोणी चोर्यते। ---।
५. अर्जुनेन कारणं पृच्छयते। ---।
६. तेन माणिक्यं घटे स्थाप्यते। ---।
७. याचकेन निद्रा क्रियते। ---।
८. तया गृहं प्राप्यते। ---।
९. अर्जुनेन कृष्णस्य स्तुतिः आरभ्यते। ---।
१०. श्रीकृष्णेन हसित्वा सः उच्यते। ---।

११. मया मीनः रक्ष्यते। --।

१२. तेन मीनः क्रीयते। --।

१३. अर्जुनेन श्रीकृष्णः नमस्क्रियते। --।

१४. श्रीकृष्णेन अर्जुनः उच्यते। --।

१५. तेन मीनः जले क्षिप्यते। --।

ख. अधः क्रियापदैः सह मूलधातवः अपि निर्दिष्टाः सन्ति। तेषां यथानिर्देशं कर्मणिरूपाणि लिखत -

यथा - पठति (पठ्)	**पठ् + य + ते**	**पठ्यते**
आचरति (आ + चर्)	------------------------------	--------------------
गच्छति (गम्)	------------------------------	--------------------
शृणोति (श्रु)	------------------------------	--------------------
पश्यति (दृश्)	------------------------------	--------------------
सेवते (सेव्)	------------------------------	--------------------
वन्दते (वन्द्)	------------------------------	--------------------
क्षालयति (क्षाल्)	------------------------------	--------------------
लभते (लभ्)	------------------------------	--------------------
सूचयति (सूच्)	------------------------------	--------------------
चिनोति (चि)	**चि + य + ते**	**चीयते**
पालयति (पाल्)	------------------------------	--------------------
जपति (जप्)	------------------------------	--------------------
त्यजति (त्यज्)	------------------------------	--------------------
पचति (पच्)	------------------------------	--------------------
लोकते (लोक्)	------------------------------	--------------------
जानाति (ज्ञा)	------------------------------	--------------------

> धातुः व्यञ्जनान्तः चेत् तस्य यकारयोजनेन कर्मणि रूपं सिध्यति।
> यथा - रक्षति - रक्ष्यते (रक्ष् + य + ते)   खादति - खाद्यते (खाद् + य + ते)
> येषां धातूनां कर्तरिप्रयोगे 'य' दृश्यते तेषां धातूनां कर्मणिप्रयोगे एकः एव 'य'कारः दृश्यते।
> यथा - क्षालयति = क्षाल्यते   सूचयति = सूच्यते

विशेषक्रियापदानि		
धातुः	**कर्तरि रूपम्**	**कर्मणि रूपम्**
जि	जयति	जीयते
चि	चिनोति	चीयते
अधि + इ	अधीते	अधीयते
श्रु	शृणोति	श्रूयते
स्तु	स्तौति	स्तूयते
ध्यै	ध्यायति	ध्यायते
गै	गायति	गीयते
घ्रा	जिघ्रति	घ्रायते
क्री	क्रीणाति	क्रीयते
नी	नयति	नीयते
कृ	करोति	क्रियते
धृ	धरति	ध्रियते
स्मृ	स्मरति	स्मर्यते
वृ	वृणोति	व्रियते
तॄ	तरति	तीर्यते
ध्मा	धमति	ध्मायते
पा	पिबति	पीयते
दा	ददाति / यच्छति	दीयते
स्रंस्	स्रंसते	स्रस्यते
बन्ध्	बध्नाति	बध्यते
मन्थ	मथ्नाति	मथ्यते
यज्	यजति	इज्यते
आ + ह्वे	आह्वयति	आहूयते
ग्रह	गृह्णाति	गृह्यते

ग. यथोदाहरणं कर्तरि रूपम् उचितेन कर्मणि रूपेण सह मेलयत -

श्लाघते →	गीयते
प्रेषयति	ज्ञायते
वितरति	**श्लाघ्यते**
जिघ्रति	प्रेष्यते
अर्चति	आलोक्यते
सहते	वन्द्यते
वन्दते	वितीर्यते
आलोकते	घ्रायते
जानाति	सह्यते
गायति	अर्च्यते

अवधेयम्

- ‘इ’कारान्तानाम् ‘उ’कारान्तानां च धातूनां कर्मणिप्रयोगे इकारः उकारः च दीर्घः भवति।
  यथा - जि = जीयते   स्तु = स्तूयते
- ‘ई’कारान्तानाम् ‘ऊ’कारान्तानां च धातूनाम् अपि कर्मणिप्रयोगे ईकारः ऊकारः च दीर्घः भवति।
  यथा - नी = नीयते   धू = धूयते
- ‘ऋ’कारान्तस्य धातोः ‘रि’ इति, ‘ॠ’कारान्तस्य ‘ईर्’ इति, ऐकारान्तस्य ‘आ’ इति च प्रायः भवति।
  यथा - कृ =क्रियते   तॄ = तीर्यते   ध्यै = ध्यायते

यदि धातोः आरम्भे ‘व’ दृश्यते तर्हि तस्य प्रायः ‘उ’ इति क्वचिद् परिवर्तनं भवति।

यथा -

वद्	वदति	उद्यते	व = उ	वच्	वक्ति	उच्यते	व = उ
वप्	वपति	उप्यते	व = उ	वह्	वहति	उह्यते	व = उ
वस्	वसति	उष्यते	व = उ				

घ. मञ्जूषायां दत्तेभ्यः क्रियापदेभ्यः कर्तरि रूपाणि कर्मणि रूपाणि च चित्वा लिखत -

पीयते, गायति, अर्च्यते, अधीयते, कुरुते, श्रूयते, वर्धते, लिप्यते, सहते, प्रमुच्यते, अभिधीयते, यतते, उप्यते, भाषते, सेव्यते, जानीते, शोभते, द्योतते, प्रदर्श्यते, संगृह्यते, रच्यते, बिभेति, जप्यते, कम्पते, वितीर्यते, त्यज्यते, भुङ्क्ते, दत्ते, दीयते, सूच्यते, उच्यते, विधीयते, हन्यते, दृश्यते, वर्तते, लिखति

कर्तरि रूपाणि		**कर्मणि रूपाणि**	
----------------	----------------	----------------	----------------

----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------

ङ. यथोदाहरणं प्रदत्तानां कर्मणि रूपाणां स्थाने कर्तरि रूपाणि लिखत -

कर्मणि रूपम्	कर्तरि रूपम्	कर्मणि रूपम्	कर्तरि रूपम्
आप्यते	--------------------	पठ्यते	--------------------
ध्यायते	--------------------	दृश्यते	--------------------
श्रूयते	--------------------	गम्यते	--------------------
बध्यते	--------------------	स्मर्यते	--------------------
उह्यते	--------------------	अर्च्यते	--------------------
स्तूयते	--------------------	पृच्छयते	--------------------
पूयते	--------------------	ज्ञायते	--------------------
परिदह्यते	--------------------	इज्यते	--------------------
जप्यते	--------------------	तीर्यते	--------------------
प्रणम्यते	--------------------	मथ्यते	--------------------

च. अधः प्रदत्तानि कर्मणिप्रयोगस्य वाक्यानि कर्तरिप्रयोगे परिवर्तयत -

१. विषादेन त्वक् परिदह्यते। (गी.१.३०)

-- ।

२. केनापि पुरुषेण आत्मा न हन्यते। (गी.२.१९)

-- ।

३. ज्ञानिभिः आत्मा अविकार्यः उद्यते। (गी.२.२५)

-- ।

४. योगिभिः समत्वं योगः उद्यते। (गी.२.४८)

-- ।

५. कामात्मभिः बुद्धिः समाधौ न विधीयते। (गी.२.४४)

-- ।

६. कर्मभिः सः न बध्यते। (गी.४.१४)

--।

७. कर्मयोगिना कर्म कृत्वा अपि न निबध्यते। (गी.४.२२)

--।

८. तत्त्वज्ञानेन सर्वं कर्म ज्ञाने परिसमाप्यते। (गी.४.३३)

--।

९. साङ्ख्यैः यत् स्थानं प्राप्यते तत् योगैः अपि गम्यते। (गी.५.५)

--।

१०. सरोवरे अम्भसा पद्मपत्रं न लिप्यते। (गी.५.१०)

--।

११. कामकारेण फले सक्तः अयुक्तः निबध्यते। (गी.५.१२)

--।

१२. महता दुःखेन योगः न विचाल्यते। (गी.६.२२)

--।

१३. जीवभूतया प्रकृत्या इदं जगत् धार्यते। (गी.७.५)

--।

१४. वेदान्तिभिः ब्रह्मणः स्वभावः अध्यात्मम् उच्यते। (गी.८.३)

--।

१५. अविकम्पेन योगेन विभूतिज्ञाता युज्यते। (गी.१०.७)

--।

१६. देहवद्भिः अव्यक्ता गतिः दुःखेन अवाप्यते। (गी.१२.५)

--।

१७. शास्त्रैः इदं शरीरं क्षेत्रम् इति अभिधीयते। (गी.१३.१)

--।

१८. शरीरस्य गुणदोषैः आत्मा न उपलिप्यते। (गी.१३.३२)

--।

१९. जनैः फलम् अपेक्ष्य राजसः यज्ञः इज्यते। (गी.१७.१२)

--।

२०. उपनिषद्भिः ब्रह्मचर्यादि शारीरं तपः उद्यते। (गी.१७.१४)

--।

२१. दाम्भिकेन राजसं तपः क्रियते। (गी.१७.१८)

-- ।

२२. जनैः अपात्रेभ्यः तामसं दानं दीयते। (गी.१७.२२)

-- ।

२३. मोक्षकाङ्क्षिभिः फलम् अनपेक्ष्य विविधाः यज्ञादिक्रियाः क्रियन्ते। (गी.१७.२५)

-- ।

२४. शास्त्रैः कर्मफलत्यागी एव त्यागी इति अभिधीयते। (गी.१८.११)

-- ।

२५. पुरुषेण मोहात् यत् कर्म आरभ्यते तत् तामसम्। (गी.१८.२५)

-- ।

छ. अधः प्रदत्तानि कर्तरिप्रयोगस्य वाक्यानि कर्मणिप्रयोगे परिवर्तयत -

१. कोऽपि हन्यमाने शरीरे आत्मानं न हन्ति। (गी.२.२०)

-- ।

२. वायुः अम्भसि नावं हरति। (गी.२.६७)

-- ।

३. ज्ञानिनः कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन्तं मिथ्याचारं वदन्ति। (गी.३.६)

-- ।

४. कर्माणि योगयुक्तं पुरुषं न लिम्पन्ति। (गी.५.७)

-- ।

५. शास्त्राणि सर्वसङ्कल्पसंन्यासिनं योगारूढम् इति वदन्ति। (गी.६.४)

-- ।

६. वेदाः कूटस्थम् अक्षरम् इति वदन्ति। (गी.१५.१६)

-- ।

७. अफलाकाङ्क्षिणः सात्त्विकं यज्ञं यजन्ते। (गी.१७.११)

-- ।

८. जनाः प्रत्युपकारार्थं राजसं दानं ददति। (गी.१७.२१)

-- ।

९. कामेप्सुः साहङ्कारः राजसं कर्म करोति। (गी.१८.२४)

-- ।

ज. एतत्संख्याकेषु गीताश्लोकेषु कर्मणि रूपाणां प्रयोगान् परिशीलयत -

२.५६	८.१	१७.१५	१७.२६	१८.२३
२.३४	१३.१२	१७.१६	१८.९	१८.२८
३.४०	१३.१७	१७.२७	१८.२४	
६.३	१३.३२	१७.२८	१८.१७	
६.१८	१५.३	१७.२०	१८.१९	

झ. अधः प्रदत्तेभ्यः कोष्ठकस्थेभ्यः उचितं लिट्लकारस्य कर्मणि रूपं चित्वा वाक्यानि पूरयत -

यथा - राघवेण क्रीडाङ्गणं जग्मे। (गम्यति, जग्मे, गच्छति, गच्छते)

१. अर्चकेन देवाः ------------------------------ । (नेमे, नेमिरे, नमिता)

२. शिष्यैः गुरुः ------------------------------ । (प्रणेमे, प्रणमति, प्रणम्येते)

३. मूढेन दुर्व्यसनं ------------------------------ । (तत्यजे, त्यज्यन्ते, त्यजति)

४. चतुरैः उपायाः ------------------------------ । (चिन्त्यते, चिन्तयाञ्चक्रिरे, चिन्त्येते)

५. प्राध्यापकेन विजेतारः ------------------------------ । (अभिनन्दति, अभिननन्दिरे, अभिनन्द्यन्ते)

६. स्वामिन्या सेविकाः ---------------------- । (आह्वयावः, आह्वयाञ्चक्रिरे,आह्वयन्ति ।)

७. मार्गदर्शकेन पाठौ ------------------------------ । (परिशील्ये, परिशीलयामासाते, परिशील्यते)

८. वैद्येन रोगी ------------------------------ । (ददृशे, दर्शयति, दृश्ये)

९. पाचकैः पक्वान्नानि ------------------------------ । (पेचिरे, पचन्ति, पचते)

१०. महिलाभ्यां शाटिकाः ------------------------------ । (क्रीयते, चिक्रियिरे, क्रीणीते)

११. पुत्राः पितरौ ------------------------------। (नमस्क्रियन्ते, नमश्चक्राते, नमस्कुर्वन्ति)

१२. वृषभाभ्यां भारः ------------------------------ । (उह्यते, उह्यन्ते, ऊह्ये, उहेते)

१३. गोपिकाभिः दधि ------------------------------ । (ममन्थे, मथ्येते, मथ्नान्ति)

१४. केनापि मार्गे अवकरः न ------------------------------ । (चिक्षिपे, क्षिप्यन्ते, क्षिप्यते)

१५. रजकैः वस्त्राणि ------------------------------ । (क्षाल्यन्ते, क्षालयाञ्चक्रिरे)

ञ. अधः प्रदत्तेभ्यः कोष्ठकस्थेभ्यः उचितं लुट्लकारस्य कर्मणि रूपं चित्वा वाक्यानि पूरयत -

यथा - याचकेन भिक्षा याचिता। (याचक)

१. भक्ताभिः पुष्पाणि -------------------------------- । (चेतारः, चीयते, चिनोति)

२. अस्माभिः गीता ------------- । (स्मरति, स्मर्ता, स्मारयति)

३. सेविकया पात्राणि -------------------------- । (क्षालयति, क्षालयितारः, प्रक्षालयति)
४. भाषकेण चित्रसाहाय्येन विषयाः ------- । (उपस्थातारः, उपस्थापयन्ति, उपस्थीयते)
५. भवता व्यजनानि--------------------- । (चालयितारः, चालयितासि, चालये)
६. पितामह्या पौत्राः कथा ---------------- । (श्रावयिता, श्रावयितारः, श्रावयति)
७. कर्मकर्या जलं ----------------- । (पूरयन्ति, पूरयिता, पूरये)
८. व्याधिना रोगी ----------------- । (पीडयिता, पीडयितारः, पीडयितासाथे)
९. रामेण अश्वमेधः ------------ । (यष्टा, यजति, इज्यते)
१०. आचार्येण व्रतम्------------------ । (आचरति, आचरिता, आचर्यते)

ट. अधः प्रदत्तेभ्यः कोष्ठकस्थेभ्यः उचितं लृट्लकारस्य कर्मणि रूपं चित्वा वाक्यानि पूरयत -

१. अर्जुनेन युद्धं ------------------------ । (करिष्यते, करोति, कार्यते)
२. सञ्जयेन गीता ----------------------------- । (श्रावयति, श्रावयिष्यते, श्रूयते)
३. द्रोणेन अर्जुनाय शस्त्रविद्या --------------- । (दास्यते, ददाति, ददिष्यते)
४. कृष्णेन गीतोपदेशः -------------------------- । (कारयति, करिष्यते, अकारये)
५. भीमेन दुर्योधनः -------------------------- । (ताडयिष्यते, ताडयामि, ताडये)
६. भीष्मेण अर्जुनः -------------------------- । (सूचयिष्यते, सूचयामि, सूचयेरन्)
७. धृतराष्ट्रेण सञ्जयः -------------------------- । (प्रक्ष्यामि, प्रक्ष्यते, प्रच्छति)
८. कुन्त्या आशीर्वादः -------------------------- । (प्रार्थयामहे, प्रार्थयिष्यते, प्रार्थये)
९. सहदेवेन नकुलः ------------------------- । (नंस्यते, नंस्यामि, नमिष्यति)
१०. द्रौपद्या कुन्ती ------------------------ । (प्रणंस्यते, प्रणमति, प्रणमयति)

ठ. अधः प्रदत्तानां वाक्यानां लोट्लकारस्य कर्मणि रूपाणि यथोदाहरणं रिक्तस्थाने लिखत -

यथा - रुग्णः गुलिकाः सेवताम् । रुग्णेन गुलिकाः सेव्यन्ताम् ।

१. शिष्यः परीक्षां लिखतु । -- ।
२. नीता कृष्णफलकं मार्जयतु । -- ।
३. मयूरः अग्रे गच्छतु । -- ।
४. अन्तेवासिनः स्वधर्मम् आचरन्तु । -- ।
५. सेवकौ शाकान् कर्तयताम् । -- ।
६. अहं लेखनीः क्रीणानि । -- ।
७. सज्जनाः यमनियमान् आचरन्तु । -- ।
८. दिनेशः मार्जारं गृह्णातु । -- ।

९. भगिनी दीपं ज्वालयतु। --।

१०. भगवान् अस्मान् रक्षतु। --।

ड. कोष्ठकस्थेभ्यः उचितं लङ्लकारस्य कर्मणि रूपं चित्वा वाक्यानि रचयत। तथा च तस्य वाक्यस्य कर्तरि प्रयोगम् अपि यथोदाहरणं लिखत -

यथा - श्रीकृष्णेन विश्वरूपम् अदर्श्यत। (अपश्यत, अदर्श्यत, अदर्शयत्)
श्रीकृष्णः विश्वरूपम् अदर्शयत्। (कर्तरि रूपम्)

१. ब्रह्मणा प्रजाः ---------------------------------। (असृजत्, असर्जत, असृज्यन्त)
---।

२. इन्द्रेण कवचकुण्डलम् ---------------------। (अयाच्यत, आयाचत्, अयाचत)
---।

३. कर्णेन कवचकुण्डलम् ---------------------। (अददात्, अदीयत, अददत्)
---।

४. भक्तैः गीतामृतम् ---------------------------। (अपीयत, अपीयत्, अपिबन्)
---।

५. अश्वत्थाम्ना दिव्यास्त्रम् ---------------------। (अमुचत्, अमुञ्चत्, अमुच्यत)
---।

६. कृष्णेन दुष्टाः ---------------------------------। (अनाशयत्, अनशत्, अनाश्यन्त)
---।

७. छात्रैः पुस्तकानि ---------------------------। (अक्रीयन्त, अक्रीणन्, अक्रीणत्)
---।

८. श्रद्धावद्भिः ज्ञानम् -------------------------। (अलभत, अलभन्त, अलभ्यत)
---।

९. गणेशेन श्लोकाः ---------------------------। (अलिखत्, अलिख्यन्त, अलिखन्त)
---।

१०. पाण्डवाभ्यां कार्यम् -----------------------। (अक्रियत, अकुरुताम्, अक्रियत्)
---।

ढ. कोष्ठकस्थेभ्यः पदेभ्यः उचितं विधिलिङ्लकारस्य कर्मणि रूपं चित्वा वाक्यानि रचयत। तथा च तस्य वाक्यस्य कर्तरि प्रयोगम् अपि लिखत -

१. कृष्णेन मार्गः ----------------। (सूच्येत, सूच्येते, सूच्येरन्)
-------------------------------------।

२. माधवेन कर्मयोगः ------------- । (कथ्येत, कथ्येयाताम्, कथ्यन्ते)

-- ।

३. भवद्भिः भीष्मः एव -------------- । (अभिरक्ष्येत, अभ्यरक्ष्यत, अभिरक्षन्तु)

-- ।

४. केनापि विषयाः न ---------------- । (स्मर्येत, स्मर्येरन्, स्मर्येय)

-- ।

५. अर्जुनेन उभयपक्षयोः सैन्यं -------------। (दृश्येत, दृश्यति, दृश्येरन्)

--।

६. त्वया मम रूपम् ---------------- । (अवलोक्येथाः,अवलोक्येत, अवलोक्येय)

-- ।

७. त्वया पाण्डुपुत्राः ----------------- । (दृश्येरन्, दृश्येत, दृश्येयाताम्)

-- ।

८. द्रोणेन व्यूहः ---------------------------। (रचयति, रच्येत, रच्यताम्)

-- ।

९. कृष्णेन रथः ---------------------------। (नीयेत, नयति, नीयताम्)

-- ।

१०. जयद्रथेन वञ्चना ---------------------------। (क्रियेत, करिष्यति, अकारिषत्)

-- ।

ण. कोष्ठकस्थेभ्यः रूपेभ्यः कर्मणि आशीर्लिङः रूपाणि चित्वा रिक्तस्थानानि पूरयत -

१. अर्जुनेन युद्धं --------------------------- । (कृषीष्ट, करोति, कार्यते)

२. धृतराष्ट्रेण सञ्जयः --------------------- । (श्रावयिष्यते, श्रोषीष्ट, श्रूयते)

३. द्रोणेन अश्वत्थाम्ने ब्रह्मास्त्रं --------------- । (दास्यते, दासीष्ट, ददिष्यते)

४. शकुनिना द्यूतक्रीडा --------------------- । (करिष्यते, कारयति, कारयिषीष्ट)

५. भीमेन दुःशासनः ------------------------ । (ताडयिष्यते, ताडयिषीष्ट, ताडये)

६. कुरुणा क्षेत्रं ------------------------------ । (कर्षति, कर्षयति, कक्षीष्ट)
७. विदुरेण कृष्णः --------------------------- । (नंसीष्ट, नंस्यति, नमति)
८. दुर्योधनेन आशीर्वादः --------------------- । (प्रार्थयिष्यते, प्रार्थयिषीष्ट, प्रार्थये)
९. एकलव्येन द्रोणः ------------------------ । (नंस्यते, प्रणंसीष्ट, नमिष्यति)
१०. बलरामेण तीर्थयात्रा --------------------- । (गंसीष्ट, अगच्छत्, अगमः)

त. कोष्ठकस्थेभ्यः रूपेभ्यः समुचितानि लुङ्लकारस्य रूपाणि चित्वा रिक्तस्थानानि पूरयत -

१. धृतराष्ट्रेण राजसभा ---------------- । (अह्वत, अह्वन्त, अवहे)
२. मन्त्रिणा चर्चा -------------------- । (अकारि, क्रियै, करोति)
३. दुर्योधनेन निर्देशाः -------------------- । (अदायि, ददाति, अदायिषत)
४. शकुनिना परामर्शाः -------------------- । (अदायि, अदायिषत, दीयेथाः)
५. दुःशासनेन निवेदनम् -------------------- । (अकारि, अकार्षीष्ट, करोति)
६. गुप्तचरेण सूचना -------------------- । (प्रदायि, प्रदीयते, प्रदास्यसि)
७. गान्धार्या परामर्शः -------------------- । (अदायि, अदीयताम्, अदास्यत्)
८. कर्णेन राजसभा -------------------- । (अगामि, गच्छति, अगमत्)
९. द्वारपालेन राजाज्ञा -------------------- । (अपालि, पालयति, पाल्यन्ताम्)
१०. सारथिना अश्वेभ्यः जलम् ---------------- । (अपायि, पास्यति, पाति)

थ. कोष्ठकस्थेभ्यः रूपेभ्यः उचितानि लृङ्लकारस्य रूपाणि चित्वा रिक्तस्थानानि पूरयत -

१. ऋषिणा यज्ञः -------------------- । (अकरिष्यत, अकारि, अकरोत्)
२. द्रोणेन शिष्याः --------------------- । (अपाठयिष्यत, अपठत्, अपठिष्यत्)
३. शिष्यैः पाठः ------------------- । (अपठिष्यत, पाठयति, अपठत्)
४. भीष्मेण शङ्खः -------------------- । (अध्मास्यत्, अध्मात्, अध्मातवान्)
५. अर्जुनेन लक्ष्यभेदः -------------------- । (अकरिष्यत, करिष्यति, करोति)
६. अर्जुनेन पाशुपतास्त्रं -------------------- । (प्राप्स्यत, प्राप्नोति, प्राप्स्यति)
७. छात्रैः भगवद्गीता ------------------ । (अस्मरिष्यत, अस्मरत्, अस्मर्यताम्)
८. गणेशेन महाभारतम् -------------- । (अलेखिष्यत,अलिखत्, अलेखयामि)
९. व्यासेन महाभारतं ---------------- । (व्यरचयिष्यत, व्यरचि, व्यरच्यते)
१०. पाण्डुना राज्यं ----------- । (पर्यपालयिष्यत, परिपालयति, पर्यपालयन्)

****

फलेन तु ईश्वराधीनेन भूयते

भावेप्रयोगः **१५**

एतां कथां सावधानतया उच्चैः पठत अवगच्छत च -



अर्जुनेन कृष्णेन च नरनारायणाभ्यां **वृत्यते**। तयोः श्रीकृष्णेन स्थितप्रज्ञेन **भूयते**। अतः तेन सर्वान् मनोगतान् कामान् त्यक्त्वा आत्मना आत्मनि एव तुष्टेन **भूयते**। तस्य जीवनेन दिव्याभया **प्रकाश्यते**। किन्तु अर्जुनस्य स्थित्या सर्वथा विपरीततया **जायते**। तेन सर्वदा अस्थिरेण **भूयते**। अस्थिरतायाः कारणात् अर्जुनेन भ्रान्त्या **जीव्यते**। तथापि तत्र एकेन आश्चर्येण **भूयते**। 'अहं श्रेष्ठः, अहं सर्वोत्तमः, अहं नरोत्तमः' इति अर्जुनेन **विश्वस्यते**। अर्जुनस्य ईदृशीम् अवस्थां दृष्ट्वा कृष्णेन बहु **खिद्यते**।

यदा कुरुक्षेत्रे महाभारतयुद्धेन **भूयते** तदा स्वबान्धवान् दृष्ट्वा अर्जुनेन मोहग्रस्तेन **भूयते**। तेन **लज्ज्यते** - 'हा धिक्! निकृष्टकारणैः मया **युध्यते**' इति विचिन्त्य अर्जुनस्य शरीरेण **कम्प्यते** गाण्डीवेन च तस्य हस्तात् **स्रस्यते**। मुखेन **परिशुष्यते**। तस्य (शरीरात्) धैर्येण **क्षीयते**। युद्धस्य विध्वंसकपरिणामस्य कल्पनां कृत्वा अर्जुनेन **रुद्यते**। तदा श्रीकृष्णेन अर्जुनाय **कुप्यते**। अथ च उच्यते कौन्तेय! कुतः ईदृशैः भावैः **उद्भूयते**। क्षत्रियेण त्वया ईदृशेन आचरणेन न **शुभ्यते** इति उक्त्वा भगवता श्रीकृष्णेन गीतोपदेशः क्रियते। तच्छ्रुत्वा अर्जुनेन विगतमोहेन **भूयते**। निर्मोहेण अर्जुनेन सिंहेन इव उच्चैः **गर्ज्यते**। निश्शङ्कितेन अर्जुनेन कुरुक्षेत्रे **युध्यते**। यतः तेन ज्ञातं यत् कर्मणि एव ममाधिकारः न तु फले। फलेन तु ईश्वराधीनेन **भूयते**।

अस्यां कथायां स्थूलाक्षरैः मुद्रितानि पदानि भावे प्रयुक्तानि सन्ति।

अकर्मकधातूनां कर्तरिप्रयोगः भावेप्रयोगश्च सम्भवतः। यथा -

कृष्णः द्वारकायाम् अस्ति।	कृष्णेन द्वारकायां भूयते।
दीपः ज्वलति।	दीपेन ज्वल्यते।
सौदामिनी द्योतते।	सौदामिन्या द्योत्यते।
सूर्यः प्रकाशते।	सूर्येण प्रकाश्यते।

अवधेयम्

एतेषां वाक्यानां परिशीलनानन्तरं वयं भावेप्रयोगस्य नियमान् एवं संग्रहीतुं शक्नुमः -

- भावेप्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति ।
- भावेप्रयोगे कर्मपदं न भवति ।
- भावेप्रयोगे क्रियापदं सर्वदा प्रथमपुरुष-एकवचनान्तमेव भवति ।

यथा - पत्यते, धाव्यते । (पत्येते, धाव्येते इत्यादीनां रूपाणां प्रयोगः कदापि न सम्भवति । एवमेव मध्यमपुरुषस्य उत्तमपुरुषस्य च अपि न सम्भवति ।)

कर्मणिप्रयोगे सकर्मकधातूयाम् किञ्च भावेप्रयोगे अकर्मकधातूनां दशसु अपि लकारेषु प्रयोगः सम्भवति । अग्रे वयं परस्मैपदिनः 'भू'धातोः आत्मनेपदिनः 'वृत्'धातोश्च दशसु लकारेषु रूपाणि पश्यामः ।

*** अधः तालिकायाम् अकर्मकस्य परस्मैपदिनः भू-धातोः आत्मनेपदिनः वृत्-धातोः च भाववाच्यस्य रूपाणि अवधानेन पठत -**

	भू-धातुः (परस्मै.)	वृत्-धातुः (आत्मने.)	भू-धातुः (परस्मै.)	वृत्-धातुः (आत्मने.)
	लट्लकारः (एकवचनम्)		लङ्लकारः (एकवचनम्)	
प्र.पु.	भूयते	वृत्यते	अभूयत	अवृत्यत
	लिट्लकारः (एकवचनम्)		विधिलिङ्लकारः (एकवचनम्)	
प्र.पु.	बभूवे	ववृते	भूयेत	वृत्येत
	लुट्लकारः (एकवचनम्)		आशीर्लिङ्लकारः (एकवचनम्)	
प्र.पु.	भविता	वर्तिता	भविषीष्ट	वर्तिषीष्ट
	लृट्लकारः (एकवचनम्)		लुङ्लकारः (एकवचनम्)	
प्र.पु.	भविष्यते	वर्तिष्यते	अभावि	अवर्तिष्ट
	लोट्लकारः (एकवचनम्)		लृङ्लकारः (एकवचनम्)	
प्र.पु.	भूयताम्	वृत्यताम्	अभविष्यत	अवर्तिष्यत

➢ **अकर्मकधातूनां भाववाच्ये प्रथमपुरुषे एकवचनान्तं रूपमेव सम्भवति अन्यानि रूपाणि न सम्भवन्ति**

अभ्यासः

क. अधः प्रदत्तानि वाक्यानि यथोदाहरणं भावेप्रयोगे परिवर्तयत -

यथा -	**वयं मिलामः ।**	**अस्माभिः मिल्यते ।**
१.	व्याघ्रः धावति ।	-- ।
२.	कमलानि विकसन्ति ।	-- ।
३.	प्रेक्षकाः उपविशन्ति ।	-- ।
४.	त्वं कुप्यसि ।	-- ।
५.	ज्वरः वर्धते ।	-- ।
६.	वयं क्रीडामः ।	-- ।
७.	दीपः ज्वलति ।	-- ।
८.	खद्योतः द्योतते ।	-- ।
९.	मीनः जले जीवति ।	-- ।
१०.	बालः मातरि विश्वसिति ।	-- ।
११.	हंसाः डयन्ते ।	-- ।
१२.	मयूरौ नृत्यतः ।	-- ।
१३.	वधूः लज्जते ।	-- ।
१४.	सरित् वहति ।	-- ।
१५.	सौदामनी प्रकाशते ।	-- ।
१६.	कच्छपः प्लवते ।	------------------------------------ प्लूयते ।
१७.	पर्णानि कम्पन्ते ।	-- ।
१८.	अहं तिष्ठामि ।	-- ।
१९.	शिशुः हसति ।	-- ।
२०.	देवकीनन्दनः अस्ति ।	-- ।

अवधेयम्

प्रयोगपरिवर्तनसन्दर्भे अवधातव्याः केचन अंशाः सन्ति। यथा -

- प्रयोगपरिवर्तनसन्दर्भे **कर्मणिप्रयोगे कर्तृपदस्य एवं कर्मपदस्य भावेप्रयोगे कर्तृपदस्य एवं क्रियापदस्य** च रूपेषु परिवर्तनं भवति। परन्तु वाक्ये स्थितानाम् अन्येषां पदानां परिवर्तनं न भवति। यथा - **सुरेशः** प्रतिदिनं सायङ्काले गृहे **पाठं पठति।**

  एतस्य कर्मणि प्रयोगः यथा - **सुरेशेन** प्रतिदिनं सायङ्काले गृहे **पाठः पठ्यते। अत्र प्रतिदिनं सायङ्काले गृहे** - इत्येतेषां रूपाणां परिवर्तनं न जातम्। तानि रूपाणि कर्तरिप्रयोगे कर्मणिप्रयोगे च समानानि एव सन्ति। एवमेव भावेप्रयोगे अपि।

- प्रयोगपरिवर्तनसन्दर्भे कर्तृपदस्य कर्मपदस्य वा विशेषणानि सन्ति चेत् तेषां रूपाणामपि विभक्तिपरिवर्तनं भवति। यथा - **कुशलः लेखकः** उत्तमां कथां लिखति। एतस्य कर्मणि प्रयोगः यथा - **कुशलेन लेखकेन** उत्तमा कथा लिख्यते। अत्र विशेषणानामपि परिवर्तनं विशेष्यानुगुणं भवति।

ख. अधः प्रदत्तानि वाक्यानि यथोदाहरणं कर्तरिप्रयोगे परिवर्तयत -

यथा - शुनकेन रात्रौ भष्यते। **शुनकः रात्रौ भषति।**

१. गाण्डीवेन हस्तात् स्रस्यते। --।
२. नारायणेन आषाढमासस्य एकादश्यां सुप्यते। --।
३. मीनेन जलात् बहिः न जीव्यते। --।
४. ग्रीष्मकाले वृक्षस्य पर्णैः शुष्यते। --।
५. शिवस्य ताण्डवकारणात् पृथ्व्या कम्प्यते। --।
६. कौरव-पाण्डवैः कुरुक्षेत्रे युद्ध्यते। --।
७. भवत्या कस्मिन् नगरे उष्यते ? --।
८. मेघरहिते खे नक्षत्रैः शुभ्यते। --।
९. कुपितेन सिंहेन उच्चैः गर्ज्यते। --।
१०. हिमालयात् गङ्गया प्रभूयते। --।
११. दुग्धं विना बुभुक्षया बालकेन रुद्यते। --।
१२. प्रतिमासं कृष्णपक्षे चन्द्रमसा क्षीयते। --।
१३. जले वटपर्णस्य उपरि पिपीलिकया प्लूयते। --।
१४. वर्षाकाले मयूरैः आनन्देन नृत्यते। --।
१५. परस्तुतिं श्रुत्वा सज्जनैः कदापि न ईर्ष्यते। --।

ग. कोष्ठकस्थेभ्यः रूपेभ्यः लिट्लकारस्य भाववाच्यरूपं चित्वा रिक्तस्थानेषु लिखत -

यथा - राघवेण जहसे। (हसति, हसिता, जहसे)

१. सेवकेन -----------। (ललज्जे, लज्जते, अलजे)
२. शिष्यैः -----------। (विवेशे, विश्ये, विविश्य)
३. मूढेन -----------। (चकम्पे, कम्पीषीष्ट, चकम्पेरन्)
४. आचार्येण -----------। (शिश्ये, शिष्यमहे, शिष्यस्महे)
५. दुर्योधनेन -----------। (चुक्रुधे, कुक्रुधे, चक्राधे)
६. घटोत्कचशरीरेण -----------। (ववृधे, विवर्धते, विवार्धते)
७. ज्ञानेन -----------। (एधाञ्चक्रे, एधाञ्चक्रिरे, एधाञ्चक्राथे)
८. रथेन -----------। (तस्थे, तस्थाथे, तस्थिरे)
९. रथे ध्वजेन -----------। (ललम्बे, ललम्बिते, ललम्बिरे)
१०. धृतराष्ट्रेण -----------। (उद्विविजे, उद्विजये, उद्विजाय)

घ. अधः प्रदत्तेभ्यः कोष्ठकस्थेभ्यः लुट्लकारस्य भाववाच्यरूपं चित्वा रिक्तस्थानेषु लिखत -

यथा - पक्षिणा डयिता। (डयिता, डेते, डयाते)

१. उत्तरया ------------------। (नर्तिता, नृत्यते, नर्तिषीष्ट)
२. घटोत्कचेन ------------------। (पतिता, पत्यते, पतिषीष्ट)
३. राज्ञा ------------------। (शोभिता, शुभ्यते, शोभेते)
४. चक्रेण ------------------। (भ्रम्यते, भ्रमिता, भ्रम्याते)
५. सूर्येण ------------------। (उदियते, उदेता, उदीयेते)
६. वृद्धेन ------------------। (रन्ता, रमिता, रंस्यते)
७. पुष्पेण ------------------। (विकसिता, विकस्यते, विकस्याते)
८. अर्जुनेन ------------------। (सदिता, सत्ता, सद्यते)
९. कण्ठेन ------------------। (शोष्टा, शुषिता, शुष्कता)
१०. रोगेण ------------------। (भाता, भासता, भायते)

ङ. अधः प्रदत्तेभ्यः कोष्ठकस्थेभ्यः लृट्लकारस्य भाववाच्यरूपं चित्वा रिक्तस्थानेषु लिखत -

१. श्रीकृष्णेन ------------------------। (स्थास्यते, स्थास्यन्ते, स्थीये)
२. कर्णेन ------------------------। (स्रंसिष्यते, स्रंसीष्ट, स्रंसिवे)
३. द्रोणेन ------------------------। (शक्ष्यते, शक्येत,शक्ये)
४. शस्त्रेण ------------------------। (पतिष्यते, पत्ये, पत्येथे)
५. जातिधर्मैः ------------------------। (उत्सीदेयुः, उत्सत्स्यते, उत्साद्यन्ते)

६. वातावरणेन ------------------------ । (दोक्ष्यावहे, दोक्ष्यते, दोक्ष्यामहि)
७. सैनिकेन ------------------------ । (व्यथ्यते, व्यथिष्यते, व्यथिष्येते)
८. कुन्त्या ------------------------ । (कल्पयन्ते, कल्पिष्यते, कल्पये)
९. सहदेवेन ------------------------ । (वेत्स्यते, वेत्ति, वितन्वाते)
१०. योद्ध्रा ------------------------ । (योत्स्यते, युयुधे, युधिषीष्ट)

च. अधः प्रदत्तेभ्यः कोष्ठकस्थेभ्यः लोट्लकारस्य भाववाच्यरूपं चित्वा रिक्तस्थानेषु लिखत -

१. शत्रुणा --------------------- । (म्रियताम्, म्रिये, म्रियेते)
२. भूम्या --------------------- । (क्लिद्यताम्, क्लीद्यते, क्लिद्न्ते)
३. वृक्षेण --------------------- । (शुष्यताम्, शुषिते, शुषिष्यते)
४. चक्रेण --------------------- । (युज्यताम्, यज्यताम्, यजते)
५. यजमानैः --------------------- । (अभिनन्द्यताम्, अभिनन्द्यते, अभिनन्द्ये)
६. कर्मकरैः --------------------- । (वृत्यताम्, वर्तित्ये, वर्त्येते)
७. सुखिभिः --------------------- । (जन्यताम्, जन्यामहे, जन्येते)
८. राष्ट्रभक्तैः --------------------- । (जागर्यताम्, जागर्याते, जागर्यामहे)
९. धैर्यशालिभिः --------------------- । (स्थीयताम्, स्थीयायाताम्, स्थीयन्ताम्)
१०. प्रमाणैः --------------------- । (सिद्ध्यताम्, सिद्ध्याते, सिद्ध्यायाते)

छ. अधः प्रदत्तेभ्यः कोष्ठकेभ्यः लङ्लकारस्य भाववाच्यरूपं चित्वा रिक्तस्थानेषु लिखत । तथा च यथोदाहरणं तस्य वाक्यस्य कर्तरि रूपम् अपि लिखत -

यथा - श्रीकृष्णेन सभायाम् अविद्यत । **(अविद्यत, अविद्यन्त, अविद्येते)**
श्रीकृष्णः सभायाम् अविद्यत । (कर्तरि रूपम्)

१. भीष्मेण युद्धक्षेत्रे ----------------------------- । (अवृत्यत, अवर्तयते, अवर्त्ये)
-- ।

२. प्राणिभिः --------------------- । (अजीव्यत, अजीवये, अजीवन्त)
-- ।

३. धेन्वा --------------------- । (अजन्यत, अजनि, अजन्यथाः)
-- ।

४. मनुष्येण ----------------------------- । (अचेष्ट्यत, अचेष्टा, अचेष्टामहे)
-- ।

५. भक्तेन --------------------- । (अलीयत, अलीये, अलीयावहे)
-- ।

६. युधिष्ठिरेण ---------------------------------- । (आस्यत, आस्ये, आस्यताम्)

-- ।

७. क्रीडकेन ---------------------------- । (अधाव्यत, अधावन्त, अधावे)

-- ।

८. श्रद्धावद्भिः -------------------------- । (अहृष्यत, अहृष्यन्त, अहृष्येथाः)

-- ।

९. संशयात्मना -------------------------- । (उदविज्यत, उद्विजे, उद्विज्ये)

-- ।

१०. मनसा ------------------------- । (अरम्यत, अरमे, अरमेवहि)

-- ।

ज. कोष्ठकस्थेभ्यः विधिलिङ्लकारस्य भाववाच्यरूपं चित्वा वाक्यानि रचयत । तथा च तस्य वाक्यस्य कर्तरि प्रयोगम् अपि यथोदाहरणं लिखत -

यथा - उत्तरया नृत्येत । उत्तरा नृत्येत् । (नर्तयति, नर्तयेत, नृत्येत)

१. सन्तोषिणा --------------- । ----------------------------- । (तुष्येत, तुष्यिता, तुष्ये)

२. अश्वेन ------------------ । ----------------------------- । (चल्येत, चलिता, चल्यावहे)

३. योगिना ----------------- । ----------------------------- । (रम्येत, रम्याहे, रम्यामहे)

४. सारथिना ---------------- । ----------------------------- । (नीयेत, नीता, नये)

५. एकलव्येन -------------- । ----------------------------- । (यत्येत, यतते, यत्यते)

६. लोभिना ---------------- । ----------------------------- । (ईह्येत, ईह्येते, ईह्याहि)

७. योद्धृभिः ---------------- । ----------------------------- । (युध्येत, युध्याः, युद्धये)

८. मोहेन ------------------ । ----------------------------- । (नश्येत, नशिता, नश्याहि)

९. जीवेन ----------------- । ----------------------------- । (भष्येत, भषते, भष्येते)

१०. जयद्रथेन --------------- । ----------------------------- । (शक्येत, शक्ये, शक्याहि)

झ. कोष्ठकस्थेभ्यः भाववाच्ये उचितम् आशीर्लिङः रूपं चित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - कातरेण भेषीष्ट । (भीयात्, भेषीष्ट, अभविष्यत्)

१. कंसेन ------------------ । (हसिषीष्ट, हसीषीष्ट, हस्यते)

२. सुभद्रया ------------------ । (लजिषीष्ट, लज्येत, लजाषीष्ट)

३. द्रौपद्या ------------------ । (रङ्क्षीष्ट, रक्षीष्ट, रक्षीत)

४. प्राणिना ------------------ । (श्वसिषीष्ट, श्वस्येत, श्वसीषीष्ट)

५. रोगिणा ------------------ । (ष्ठीविषीष्ट, ष्ठवीसिष्ठ, ष्ठीव्यते)

६. कौरवैः --------------------। (हृषिषीष्ट, हृस्यते, हृष्येते)
७. विदुरेण --------------------। (नंसीष्ट, नंस्यते, नस्यात्)
८. अश्वत्थवृक्षेण --------------------। (विकसिषीष्ट, विकस्येत, विकस्यात्)
९. एकलव्येन --------------------। (नंस्यते, प्रणंसीष्ट, नमिष्यति)
१०. अभिमन्युना --------------------। (यतिषीष्ट, यस्यात्, यस्यते)

ञ. कोष्ठकस्थेभ्यः उचितानि लुङ्लकारे भाववाच्यस्य रूपाणि चित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - पाण्डवैः अजायि। (अजायि, अजीयते, अजीव्ये)
१. दुर्योधनेन -----------------। (अहासि, अहस्यत, अहसे)
२. सेवकेन -----------------। (अलज्जि, अलजे, अलज्ज्ये)
३. सुदाम्ना -----------------। (अकम्पि, अकम्पते, अकम्पाहै)
४. योद्धृभिः -----------------। (अकूर्दि, अकूर्दते, अकूर्दताम्)
५. पापेन -----------------। (अक्षयि, अक्षये, अक्षायिये)
६. धर्मेण -----------------। (अग्लायि, अग्लाये, अग्लामहे)
७. सुदर्शनेन -----------------। (अघूर्णि, अघूर्णी, अघूर्णे)
८. द्रुपदराज्येन -----------------। (अफालि, अफले, अफलामहि)
९. द्वारपालेन -----------------। (अशायि, अशायि, अशेते)
१०. सेनापतिना -----------------। (अमूर्छि, अमूर्छे, अमूर्छते)

ट. कोष्ठकस्थेभ्यः उचितानि लृङ्लकारे भाववाच्यस्य रूपाणि चित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - शङ्खैः अध्वनिष्यत। (अध्वनिष्यत, अध्वनि, अध्वनिष्याते)
१. सूर्येण -------------------। (अभ्राजिष्यत, अभ्राजिष्याते, अभ्राजे)
२. महाराजेन -------------------। (अस्थास्यत, अस्थाये, अस्थायि)
३. सैनिकैः -------------------। (अत्वरिष्यत, अत्वरिष्ये, अत्वरे)
४. भीष्मेण -------------------। (अव्यथिष्यत, अव्यथि, अव्यथाथेः)
५. मन्दाकिन्या -------------------। (अस्यन्दिष्यत, अस्यन्दे,अस्यन्दिमहे)
६. नटेन -------------------। (अनटिष्यत, अनटिष्ये, अनाटि)
७. पाण्डुपुत्रैः -------------------। (अजेष्यत, अजाषि, अजयिषे)
८. दैत्येन -------------------। (अकखिष्यत, अकखिषे, अकखाहि)
९. लाक्षागृहेण -------------------। (अज्वलिष्यत, अज्वालि, अज्वले)
१०. सैनिकसमूहेन -------------------। (अह्वलिष्यत, अह्वले, अह्वलिषे)

न हन्यते हन्यमाने शरीरे

कर्मणि भावे च शानच्

१६

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते **हन्यमाने** शरीरे । (गी.२.२०)

प्रकृतेः **क्रियमाणानि** गुणैः कर्माणि सर्वशः । (गी.३.२७)

यत्तेऽहं **प्रीयमाणाय** वक्ष्यामि हितकाम्यया । (गी.१०.१)

प्रकृत्यैव च कर्माणि **क्रियमाणानि** सर्वशः । (गी.१३.२९)

प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ (गी.१८.२९)

एतां कथां सावधानं पठत -



कुरुक्षेत्रे सर्वे योद्धारः योद्धुं सन्नद्धाः । तदा अर्जुनेन उभयोः सेनयोः मध्ये अश्वैः **उह्यमानं** रथं स्थापयितुं कृष्णः निर्दिष्टः । तेन सर्वान् स्वबान्धवान् दृष्ट्वा नैराश्यम् अनुभूतम् । 'अहं स्वजनं हत्वा कथं सुखी भविष्यामि' - इति चिन्तयता तेन गृहीतं शरं चापं च विसृज्य रथे उपविष्टम् । तदा तस्य तत् वचनं श्रुत्वा कृष्णः इत्थम् उपदिष्टवान्-

"हे अर्जुन ! यदि भवता स्वधर्मविषये चिन्त्यते तर्हि न विकम्पितव्यम् । यतो हि धर्म्यात् युद्धात् अन्यत् श्रेयः क्षत्रियस्य न भवति । **क्रियमाणं** युद्धं तु क्षत्रियस्य कृते उद्घाटितेन स्वर्गद्वारेण सदृशं भवति । भाग्यशालिनः एव ईदृशं युद्धं कर्तुम् अवसरं लभन्ते । अतः भवता अवश्यं योद्धव्यम् ।

'मया धर्म्यः अपि सङ्ग्रामः नैव करणीयः' - इति भवता **क्रियमाणं** चिन्तनम् असाधु । कारणं युद्धम् अकुर्वतः भवतः स्वधर्मः कीर्तिश्च अपहृता भविष्यति । तेन भवता अकीर्तिकरं सर्वैः **निन्द्यमानं** च जीवनं यापनीयं भविष्यति । जनैः **सम्मान्यमानस्य** भवतः तादृशं जीवनं मरणाद् अपि कष्टकरं भविष्यति ।

भवान् भयकारणाद् रणात् पलायितः इत्यपि जनैः मन्येत । जनैः **श्लाघ्यमानं** भवतः सामर्थ्यं दूषितं चेत् ततोऽपि दुःखतरं किं वा भवेत् ?

तस्मात् सर्वम् एतत् विचिन्त्य भवता आचरणीयम् । भवान् युद्धे हतः चेत् स्वर्गं प्राप्नुयात् अथवा शत्रून् जितवान् चेत् महीं भुञ्जीत । अतः 'हे कौन्तेय, उत्तिष्ठ, युद्धाय निश्चयं कुरु' इति ।

एवमेव अस्मासु अपि प्रत्येकं जनस्य कश्चन धर्मः कर्तव्यं वा सर्वदा भवति एव । **प्राप्यमाणौ** लाभालाभौ अविचिन्त्य अस्माभिः तत् करणीयम् एव भवति । तदर्थम् अर्जुनेन इव अस्माभिरपि दृढनिश्चयः करणीयः ।

• **एतेषु गीतावाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि कर्मणि शानच्-प्रत्यययुक्तानि सन्ति।**

कर्तरि इव कर्मणि अपि शानच् प्रत्ययो भवति। अस्मिन् पाठे कर्मणि शानच् प्रयुक्तः अस्ति। आत्मनेपदिभ्यः धातुभ्यः शानच् प्रत्ययः भवति, स च कर्तरि इति वयं पूर्वं ज्ञातवन्तः।

कर्तरिशानच्-प्रयोगः यथा -

युद्धक्षेत्रे आत्मीयान् दृष्ट्वा अर्जुनस्य रोमहर्षः **जायमानः** आसीत्।

वेपमानं पार्थं दृष्ट्वा कृष्णः व्यहसत्।

कुरुपाण्डववृत्तान्तं **जिज्ञासमानं** धृतराष्ट्रं सञ्जयः उक्तवान्।

कर्मणिशानच्-प्रत्ययस्य प्रयोगः परस्मैपदिधातुभ्यः अपि भवति। यथा -

मया **पठ्यमानं** पुस्तकम् एतत्।

द्रोणाचार्येण **ईक्ष्यमाणा** पाण्डवचमूः द्रुपदपुत्रेण व्यूढा वर्तते।

युष्माभिः **क्रियमाणं** कार्यं यशः वर्धयतु।

अभ्यासः

क. अधः प्रदत्तानां क्रियापदानां कर्मणिशानजन्तानि रूपाणि यथोदाहरणं लिखत -

	क्रियापदम्		प्रथमाविभक्तिः एकवचनम्
यथा -	वन्द्यते (पुं.)	-	वन्द्यमानः
१.	कस्यते (नपुं.)	-	---------------------
२.	कम्प्यते (नपुं.)	-	---------------------
३.	सह्यते (नपुं.)	-	---------------------
४.	स्पन्द्यते (नपुं.)	-	---------------------
५.	स्मीयते (नपुं.)	-	---------------------
६.	ध्मायते (पुं.)	-	--------------------
७.	गम्यते (स्त्री.)	-	--------------------
८.	स्फूर्यते (पुं.)	-	--------------------
९.	नीयते (स्त्री.)	-	--------------------
१०.	उच्यते (पुं.)	-	--------------------
११.	ज्ञायते (स्त्री.)	-	--------------------
१२.	शुष्यते (नपुं.)	-	--------------------
१३.	क्रुध्यते (पुं.)	-	--------------------
१४.	श्रूयते (स्त्री.)	-	--------------------

ख. एतेषां प्रश्नानाम् उत्तराणि पाठानुसारं लिखत -

१. अर्जुनेन किं कर्तुं कृष्णः निर्दिष्टः ?
अर्जुनेन उभयोः सेनयोः मध्ये रथं स्थापयितुं कृष्णः निर्दिष्टः ।

२. अर्जुनेन कान् कान् दृष्ट्वा नैराश्यम् अनुभूतम् ?
-- ।

३. क्षत्रियस्य कृते युद्धं केन सदृशं भवति ?
-- ।

४. युद्धम् अकुर्वतः जीवनं कीदृशं भविष्यति ?
-- ।

भावे शानच्

अनेन प्रकारेण भावेप्रयोगे अपि शानजन्तानां रूपाणां प्रयोगः भवति । परन्तु सः प्रयोगः विरलतया एव दृश्यते । यथा - ध्वजेन कम्प्यमानम् अस्ति । पितामहेन हस्यमानम् अस्ति ।
अर्जुनेन युद्धक्षेत्रे स्थीयमानम् अस्ति ।

कर्मार्थकानि शानच्-प्रत्ययान्तानि पदानि विशेषणानि भवन्ति । अतः तानि विशेष्यस्य लिङ्गं, वचनं विभक्तिं च अनुसरन्ति । एतेषां रूपाणि पुंलिङ्गे रामशब्दवत्, स्त्रीलिङ्गे मालाशब्दवत्, नपुंसकलिङ्गे ज्ञानशब्दवत् च भवन्ति । सर्वासु विभक्तिषु एतेषां प्रयोगः भवति ।

लिङ्गानुसरणं यथा -

अर्जुनेन **कृष्णः वन्द्यमानः** अस्ति । (पुंलिङ्गे)
अर्जुनेन **कौरवसेना ईक्ष्यमाणा** अस्ति । (स्त्रीलिङ्गे)
अर्जुनेन **गाण्डीवं गृह्यमाणम्** अस्ति । (नपुंसकलिङ्गे)

वचनानुसरणं यथा -

कृष्णेन **श्लोकः उच्यमानः** अस्ति । (एकवचनम्)
कृष्णेन **श्लोकौ उच्यमानौ** स्तः । (द्विवचनम्)
कृष्णेन **श्लोकाः उच्यमानाः** सन्ति । (बहुवचनम्)

विभक्त्यनुसरणं यथा -

धृतराष्ट्रेण **युद्धवृत्तान्तः श्रूयमाणः** अस्ति ।
पाण्डवैः **ध्मायमानं शङ्खघोषं** श्रुत्वा धार्तराष्ट्राणां हृदयानि विदीर्णानि ।
युद्धक्षेत्रे **ध्मायमानेन शङ्खघोषेण** पृथिवी व्यनुनादिता ।

भगवता **उपदिश्यमानाय अर्जुनाय** सर्वे कौरवाः ईर्ष्यन्ति।
श्रूयमाणात् शङ्खघोषात् कौरवाः भीताः अभवन्।
कृष्णेन **ध्मायमानस्य शङ्खस्य** नाम पाञ्चजन्यः।
मया **कथ्यमाने** वाक्ये विश्वसितु इति कृष्णः अवदत्।

ग. अधः दत्तानां पदानां कर्मणि शानच्-प्रत्ययान्तानि रूपाणि निर्दिष्ट विभक्ति-वचनानुसारं लिखत -

पदम् / विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
१. दीयमानः (प्रथमा)			
२. प्राप्यमाणम् (तृतीया)			
३. क्रीयमाणम् (पञ्चमी)			
४. बध्यमानः (षष्ठी)			
५. पृच्छयमाना (सप्तमी)			
६. इष्यमाणम् (प्रथमा)			
७. त्यज्यमानः (द्वितीया)			

घ. कोष्ठके प्रदत्तेषु क्रियापदेषु शानजन्तं रूपं प्रयुज्य तस्य उचितविभक्तिं योजयित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - छात्रैः श्रूयमाणा कथा महाभारतान्तर्गता अस्ति। (श्रूयते)

१. मया ---------------------- फलं सर्वे खादन्तु। (विभज्यते)
२. -------------------------- पेटिकायां किं किम् अस्ति इति परिशीलयत। (उद्घाट्यते)
३. --------------------- सूचनाम् अवगतवती वा ? (पठ्यते)
४. अधुना --------------------- कार्यक्रमस्य नाम किम् ? (प्रसार्यते)
५. त्वया ------------------- पद्यं संस्कृतसम्बद्धम् अस्ति वा ? (लिख्यते)
६. भवतः ग्रामः तैः ------------------------ ग्रामस्य समीपे एव वर्तते। (गम्यते)
७. त्वया ----------------------- वस्तु अत्रैव अस्ति। (याच्यते)
८. मया ---------------------------------- कार्यम् अद्य समाप्येत। (क्रियते)
९. श्वेतया --------------------- धनेन छात्राणां लाभः भवेत्। (दीयते)

ङ. यथोदाहरणं शानजन्तेन प्रयोगेण वाक्यद्वयं योजयित्वा एकं वाक्यं लिखत -

यथा - जन्मदिने वर्धापनानि प्राप्यन्ते। मुकुन्दः हृष्टः भवति।
जन्मदिने प्राप्यमाणैः वर्धापनैः मुकुन्दः हृष्टः भवति।

१. मया प्रथमतया पच्यते। भवता आस्वादनीयम्।

-- ।

२. तेन परीक्षापरिणामः निरीक्ष्यते। श्वः उद्घोष्येत।

-- ।

३. त्वया यत् कार्यम् आरभ्यते। तत् शीघ्रं समापय।

-- ।

४. सैनिकेन युद्धं क्रियते। शत्रुः मरणं प्राप्नोति।

-- ।

५. श्रीमता धनं दीयते। तेन याचकः सन्तोषम् अनुभवति।

-- ।

६. जनैः महता वैभवेन पर्व आचर्यते। तस्य नाम दीपावली अस्ति।

-- ।

७. वक्त्रा उच्यते। सः विषयः प्रेरकः अस्ति।

-- ।

च. यथोदाहरणं वाक्यानि रचयत -

यथा - पितामहः शङ्खं धमति। सः दुर्योधनस्य हर्षं सञ्जनयति।
पितामहेन ध्मायमानः शङ्खः दुर्योधनस्य हर्षं सञ्जनयति।

१. धृतराष्ट्रः **सञ्जयं पृच्छति**। तस्मै व्यासः दिव्यं चक्षुः दत्तवान्।

-- ।

२. कृष्णः उभयोः सेनयोः मध्ये **रथं स्थापयति**। तस्मिन् अर्जुनः तिष्ठति ।

-- ।

३. कामेप्सुः **कर्म करोति**। तत् तामसं कर्म भवति।

-- ।

४. अफलप्रेप्सुः **कर्म विदधाति**। तत् सात्त्विकम् उच्यते।

-- ।

५. नरः प्रत्युपकारार्थं फलमुद्दिश्य वा **दानं करोति**। तत् दानं राजसं स्मृतम्।

-- ।

६. नरः अनुपकारिणे दातव्यम् इति धिया **दानं ददाति**। तत् सात्त्विकदानं भवति।

--।

७. अफलाकाङ्क्षिणः **विधिदृष्टं यज्ञं यजन्ति**। सः सात्त्विकयज्ञः।

--।

८. सात्त्विकाः **आहारान् प्रीणन्ति**। ते रस्याः स्निग्धाः हृद्याः च भवन्ति।

--।

९. राजसाः **आहारान् इच्छन्ति**। ते कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः भवन्ति।

--।

१०. तामसाः **भोजनं कामयन्ते**। तत् यातयामं गतरसं पूति पर्युषितं च भवति।

--।

११. अफलाकाङ्क्षिणः नराः श्रद्धया **तपः तपन्ति**। तत् सात्त्विकं परिचक्षते।

--।

छ. अधः गीताश्लोकेषु प्रयुक्तं कीदृशं शानजन्तं रूपं इति इति यथोदाहरणं प्रदर्शयत -

	वाक्यम्	शानजन्तम्
यथा -	सर्वथा **वर्तमानो**ऽपि स योगी मयि वर्तते।	**कर्तरि शानजन्तम्**
१.	**योत्स्यमानान**वेक्ष्येऽहं य एतेऽत्र समागताः। (गी.१.२३)	------------------
२.	वेदाऽहं समतीतानि **वर्तमानानि** चार्जुन। (गी.७.२६)	------------------
३.	**प्रोच्यमानम**शेषेण पृथक्त्वेन धनञ्जय। (गी.१८.२९)	------------------
४.	प्रकृत्यैव च कर्माणि **क्रियमाणानि** सर्वशः। (गी.१३.२९)	------------------
५.	सर्वथा **वर्तमानो**ऽपि न स भूयोऽभिजायते। (गी.१३.२३)	------------------
६.	वक्त्राणि ते **त्वरमाणा** विशन्ति। (गी.११.२७)	------------------
७.	यत्तेऽहं **प्रीयमाणाय** वक्ष्यामि हितकाम्यया। (गी.१०.१)	------------------
८.	**आपूर्यमाणम**चलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्। (गी.२.७०)	------------------
९.	न हन्यते **हन्यमाने** शरीरे। (गी.२.२०)	------------------

ज. यथोदाहरणं स्थूलाक्षरैः मुद्रितानि पदानां स्थाने कर्मणि शानजन्तानि रूपाणि प्रयुज्य वाक्यद्वयं योजयत -

यथा - श्वेतैः हयैः स्यन्दनम् उह्यते। तस्मिन् माधवपाण्डवौ स्थितवन्तौ।

श्वेतैः हयैः उह्यमाने स्यन्दने माधवपाण्डवौ स्थितवन्तौ।

१. पितामहेन शङ्खः **ध्मायते**। सः तुमुलं ध्वनिं करोति।

--।

२. योगिना प्रमाथीनि इन्द्रियाणि **संयम्यन्ते**। तानि प्रसभं मनः हरन्ति।

-- ।

३. पुरुषेण विषयाः **ध्यायन्ते**। ते सङ्गं जनयन्ति।

-- ।

४. भगवता कालचक्रं **प्रवर्त्यते**। तत् सर्वोऽपि अनुवर्तयेत्।

-- ।

५. श्रेष्ठेन कर्म **आचर्यते**। तदेव इतरैः जनैः आचर्यते।

-- ।

६. प्रकृतेः गुणैः कर्माणि **क्रियन्ते**। तेषां कर्ता अहमिति अहङ्कारविमूढात्मा मन्यते।

-- ।

७. भगवता अर्जुनाय योगः **प्रोच्यते**। सः पुरा विवस्वते प्रोक्तः आसीत्।

-- ।

८. अस्माकं जन्मभिः **व्यतीयन्ते**। तानि वयं न जानीमः।

-- ।

९. श्रद्धावता ज्ञानं **लभ्यते**। तत् तं परां शान्तिम् अधिगमयति।

-- ।

१०. भगवता कर्माणि **क्रियन्ते**। तानि तं न लिम्पन्ति।

-- ।

११. मुनिभिः शरीरं क्षेत्रमिति **अभिधीयते**। तत् यः जानाति सः एव क्षेत्रज्ञः।

-- ।

१२. देवैः अपि विश्वरूपं द्रष्टुम् **इष्यते**। तत् अर्जुनः दृष्टवान्।

-- ।

१३. पार्थेन संशयाः **पृच्छयन्ते**। तान् कृष्णः दूरीकरोति।

-- ।

१४. दुर्योधनेन पाण्डवानीकं **दर्श्यते**। तत् द्रुपदपुत्रेण व्यूढं वर्तते।

-- ।

१५. शत्रुणा शरीरं **हन्यते**। तस्मिन् शरीरी न हन्यते।

-- ।

१६. कृष्णेन गीता **उपदिश्यते**। तां सञ्जयः व्यासप्रसादात् श्रुतवान्।

-- ।

१७. भीष्मेण बलम् **अभिरक्ष्यते** । तत् पर्याप्तं वर्तते ।

-- ।

१८. वासुदेवेन ज्ञानम् **आख्यायते** । तत् गुह्यात् गुह्यतरं वर्तते ।

-- ।

झ. यथोदाहरणं भावे शानजन्तानि वाक्यानि रचयत -

यथा - अर्जुनेन रथे स्थीयते ।	**अर्जुनेन रथे स्थीयमानम् अस्ति ।**
१. गाण्डीवेन स्रस्यते ।	-- ।
२. पार्थस्य शरीरे रोमहर्षेण जायते ।	-- ।
३. विश्वरूपं पश्यता सञ्जयेन हृष्यते ।	-- ।
४. कृष्णेन प्रहस्यते ।	-- ।
५. सेनानायकैः योद्धुम् अवस्थीयते ।	-- ।
६. अर्जुनस्य गात्रैः सद्यते ।	-- ।
७. ब्रह्मभूतेन प्रसन्नात्मना न शुच्यते ।	-- ।
८. धृतराष्ट्रेण उपविश्यते ।	-- ।
९. अर्जुनस्य मोहेन नश्यते ।	-- ।
१०. ईश्वरेण सर्वभूतानां हृद्देशे स्थीयते ।	-- ।

अवधेयम्

'वर्धते', 'वन्दते', 'भुङ्क्ते', इत्यादयः आत्मनेपदिधातवः कर्तरिप्रयोगे सन्ति । अतः वर्धमानः वन्दमानः भुञ्जानः इत्यादीनि शानजन्तरूपाणि कर्तरिप्रयोगे भवन्ति ।

वन्द्यते भुज्यते इत्यादीनि रूपाणि कर्मणिप्रयोगान्तानि इति वयं जानीमः । एतेषाम् अपि आत्मनेपदित्वम् एव इत्यतः एतेभ्यः अपि शानच् प्रत्ययः सम्भवति । यथा - भुज्यमानः / भुज्यमाना / भुज्यमानम् इत्यादयः । एषः शानच् कर्मणिरूपसम्बन्धी इत्यतः 'कर्मणि शानच्' इति उच्यते ।

कर्मणि रूपेषु सर्वेषु 'ते' तः पूर्वं सर्वदा ह्रस्वः अकारः भवति एव । अतः कर्मणिप्रयोगे सर्वेषु शानजन्तेषु मकारः भवति एव ।

****

ब्रह्मैव तेन गन्तव्यम्

तव्यत्-अनीयर्-प्रत्ययौ १७

उच्चैः पठत अवगच्छत च -

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ गी.१.२२॥

पदच्छेदः - यावत्, एतान्, निरीक्षे, अहम्, योद्धुकामान्, अवस्थितान् ।
कैः, मया, सह, **योद्धव्यम्**, अस्मिन्, रणसमुद्यमे ॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ गी.२.५२ ॥

पदच्छेदः - यदा, ते, मोहकलिलम्, बुद्धिः, व्यतितरिष्यति ।
तदा, गन्तासि, निर्वेदम्, **श्रोतव्यस्य**, श्रुतस्य, च ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ गी.३.२२॥

पदच्छेदः - न, मे, पार्थ, अस्ति, **कर्तव्यम्**, त्रिषु, लोकेषु, किञ्चन ।
न, अनवाप्तम्, **अवाप्तव्यम्**, वर्ते, एव, च, कर्मणि ॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ गी.४.१७॥

पदच्छेदः - कर्मणः, हि, अपि, **बोद्धव्यम्**, **बोद्धव्यम्**, च, विकर्मणः ।
अकर्मणः, च, **बोद्धव्यम्**, गहना, कर्मणः, गतिः ॥

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ गी.४.२४॥

पदच्छेदः - ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्माग्नौ, ब्रह्मणा, हुतम् ।
ब्रह्म, एव, तेन, **गन्तव्यम्**, ब्रह्मकर्मसमाधिना ॥

अत्र पाठे प्रयुक्तानि योद्धव्यम्, श्रोतव्यम्, कर्तव्यम्, अवाप्तव्यम्, बोद्धव्यम्, गन्तव्यम् इत्येतानि तव्यत्-प्रत्ययान्तानि रूपाणि सन्ति। तव्यत् इति कश्चन कृत्-प्रत्ययः। कृत्-प्रत्ययाः धातुभ्यः परे विधीयन्ते। यथा

श्रोतव्यम् = श्रु + तव्यत्

कर्तव्यम् = कृ + तव्यत्　　　अवाप्तव्यम् = अव - आप् + तव्यत्

बोद्धव्यम् = बुध् + तव्यत्　　　गन्तव्यम् = गम् + तव्यत्

धातुः	तव्यत्प्रत्ययान्तं रूपम्		धातुः	तव्यत्प्रत्ययान्तं रूपम्
क्रीड्	क्रीडितव्यम्		नम्	नन्तव्यम्
खाद्	खादितव्यम्		ब्रू	वक्तव्यम्
खेल्	खेलितव्यम्		शी	शयितव्यम्
कृ	कर्तव्यम्		वस्	वस्तव्यम्
चल्	चलितव्यम्		सृज्	स्रष्टव्यम्
गम्	गन्तव्यम्		त्यज्	त्यक्तव्यम्
श्रु	श्रोतव्यम्		हा	हातव्यम्
स्मृ	स्मर्तव्यम्		भुज्	भोक्तव्यम्
तॄ	तरितव्यम्		वह्	वोढव्यम्
भ्रम्	भ्रमितव्यम्		वद्	वदितव्यम्
भू	भवितव्यम्		वच्	वक्तव्यम्

➢ **'तव्यत्' इव 'अनीयर्' इत्यपि अपरः प्रत्ययः अस्ति। यथा तव्यत्प्रत्ययः धातोः भवति तथैव अनीयर्-प्रत्ययः अपि धातोः भवति।**

यथा - पठ् + अनीयर् = पठनीयम्

धातुः	अनीयर्प्रत्ययान्तं रूपम्		धातुः	अनीयर्प्रत्ययान्तं रूपम्
क्रीड्	क्रीडनीयम्		रम्	रमणीयम्
खाद्	खादनीयम्		सह्	सहनीयम्
खेल्	खेलनीयम्		मुद्	मोदनीयम्

कृ	करणीयम्		शुभ्	शोभनीयम्
चल	चलनीयम्		युध्	योधनीयम्
गम्	गमनीयम्		ईक्ष्	ईक्षणीयम्
श्रु	श्रवणीयम्		वृत्	वर्तनीयम्
स्मृ	स्मरणीयम्		शी	शयनीयम्
तॄ	तरणीयम्		यत्	यतनीयम्
भ्रम्	भ्रमणीयम्		लोक्	लोकनीयम्

प्रायः तव्यत्-प्रत्ययान्तं रूपम् अनीयर्प्रत्ययान्तं च रूपं कर्मणिप्रयोगे भावेप्रयोगे च विधिलिङ्लकारस्य अर्थे भवति। यथा- भवान् ग्रन्थं पठेत्। भवता ग्रन्थः पठनीयः।
भवान् तिष्ठेत्। भवता स्थातव्यम्। (एतयोः वाक्ययुगलयोः अर्थः समानः।)

अवधेयम्

कर्मणिप्रयोगः

भीमेन वनं **गन्तव्यम्**।
छात्रेण पाठः **स्मर्तव्यः**।
अतिथिना अन्नं **खादनीयम्**।
भक्तेन कष्टं **सहनीयम्**।
स्पर्धकेन इयं क्रीडा **जेतव्या**।
आपणिकेन वस्तु **विक्रेतव्यम्**।
बालेन जलं **पानीयम्**।
भवता देवः **स्मरणीयः**।

भावेप्रयोगः

नर्तक्या **नर्तितव्यम्**।
नक्षत्रैः **शोभितव्यम्**।
वृक्षेण **जीवनीयम्**।
करदीपेन **ज्वलनीयम्**।
भवता तत्र **भवितव्यम्**।
सिंहेन **गर्जितव्यम्**।
फलेन **पतनीयम्**।
अश्वेन **धावनीयम्**।

अभ्यासः

क. यथोदाहरणं तव्यत्-अनीयर्-प्रत्ययान्तानि रूपाणि उपयुज्य वाक्यानि परिवर्तयत -

यथा - लेखकः लिखेत्। **लेखकेन लेखितव्यम् / लेखनीयम्।**

१. लोकयानम् आगच्छेत्। --।
२. भगवान् अवतरेत्। --।
३. मुनिः न कुप्येत्। ---------------------- न कोपितव्यम् / कोपनीयम्।
४. मन्त्री पठेत्। --।

५. सेवकः सूचयेत्। -- ।
६. ईश्वरः रक्षेत्। -- ।
७. वृष्टिः भवेत्। -- ।
८. भवती जानीयात्। -- ।
९. छात्रः स्मरेत्। -- ।
१०. विजयः लभेत। -- ।
११. शिवधनुः कम्पेत। -- ।
१२. आम्रफलं पतेत्। -- ।

ख. मञ्जूषातः अनीयर्प्रत्ययान्तानि तव्यत्प्रत्ययान्तानि च रूपाणि चित्वा लिखत -

करणीयम्,	त्यक्तव्यम्,	वक्तव्यम्,	स्थापनीयम्,	पतनीयम्,	कर्तव्यम्,	भोक्तव्यम्,	पठनीयम्,
द्रष्टव्यम्,	अवतरणीयम्,	चलनीयम्,	पातव्यम्,	गन्तव्यम्,	श्रवणीयम्,	भवितव्यम्,	वेदनीयम्,
अटनीयम्,	प्रष्टव्यम्,	स्तवनीयम्,	नेतव्यम्,	स्नानीयम्,	ग्रहीतव्यम्,	दानीयम्,	धर्तव्यम्

अनीयर्प्रत्ययान्तानि		तव्यत्प्रत्ययान्तानि	
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------

अवधेयम्

➢ **अनीयर्प्रत्ययान्तं तव्यत्प्रत्ययान्तं च पदं विशेषणं भवति। अतः तत् विशेषण-विशेष्ययोः सामान्यं नियमम् अनुसृत्य विशेष्यस्य लिङ्गं, विभक्तिं वचनं च अनुसरति। यथा -**

लिङ्गम् -

अपूपः पचनीयः / पक्तव्यः। **(पुंलिङ्गम्)**
मात्रा रोटिका पचनीया / पक्तव्या। **(स्त्रीलिङ्गम्)**
ओदनं पचनीयम् / पक्तव्यम्। **(नपुंसकलिङ्गम्)**

वचनम् -

	आदेशः पालनीयः / पालयितव्यः । **(एकवचनम्)**
सर्वैः	आदेशौ पालनीयौ / पालयितव्यौ । **(द्विवचनम्)**
	आदेशाः पालनीयाः / पालयितव्याः । **(बहुवचनम्)**

विभक्तिः -

	पठनीयः / पठितव्यः लेखः एषः । **(प्रथमाविभक्तिः)**
	पठनीयं / पठितव्यं लेखम् अनन्तरं मह्यम् अपि ददातु । **(द्वितीयाविभक्तिः)**
	पठनीयेन / पठितव्येन लेखेन सह एतां कविताम् अपि पठतु । **(तृतीयाविभक्तिः)**
त्वया	पठनीयाय / पठितव्याय लेखाय समयः दीयेत । **(चतुर्थीविभक्तिः)**
	पठनीयात् / पठितव्यात् लेखात् अभ्यासः रच्यताम् । **(पञ्चमीविभक्तिः)**
	पठनीयस्य / पठितव्यस्य लेखस्य शीर्षकं किम् ? **(षष्ठीविभक्तिः)**
	पठनीये / पठितव्ये लेखे कति शब्दाः सन्ति ? **(सप्तमीविभक्तिः)**

ग. मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

योद्धव्यम्, करणीयः, करणीयानि, त्यक्तव्यम्, समाचरणीयम्, मन्तव्यम्, भवितव्यम्, कर्तव्यम्, त्यजनीयः, करणीयम्,

१.	अर्जुनेन क्षुद्रं हृदयदौर्बल्यं .... ।	(गी.२.३)
२.	पण्डितैः गतासूनगतासूनां च विषये शोकः न .... ।	(गी.२.११)
३.	अर्जुनेन युद्धं .... ।	
४.	क्षत्रियेण युद्धात् अन्यत् किमपि श्रेयः न .... ।	(गी.२.३१)
५.	अर्जुनेन सुखदुःखे, लाभालाभौ, जयाजयौ च समे कृत्वा .... ।	(गी.२.३८)
६.	अर्जुनेन निस्त्रैगुण्येन, निर्द्वन्द्वेन .... ।	(गी.२.४५)
७.	अर्जुनेन फलहेतुः .... ।	(गी.२.४७)
८.	अर्जुनेन सङ्गं त्यक्त्वा योगकर्माणि .... ।	(गी.२.४८)
९.	त्वया नियतकर्म .... ।	(गी.३.८)
१०.	कौन्तेयेन मुक्तसङ्गेन भूत्वा कर्म .... ।	(गी.३.९)

घ. कोष्ठकस्य साहाय्येन यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - विद्वद्भिः कर्मसङ्गिनां बुद्धिभेदः न जननीयः। (जन् + अनीयर्) (गी.३.२६)

१. अर्जुनेन अध्यात्मचेतसा सर्वाणि कर्माणि संन्यस्य .... । (युध+अनीयर्) (गी.३.३०)

२. 'यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी' इति जनैः .... । (ज्ञा+तव्यत्) (गी.५.३)

३. सज्जनैः 'कामः एव महाशनः, क्रोधः एव महापाप्मा' इति .... । (मन्+अनीयर्) (गी.३.३७)

४. मानवैः कर्मणः अकर्मणः विकर्मणः च स्वरूपं .... । (बुध् + तव्यत्) (गी.४.१७)

५. पूर्वैः मुमुक्षुभिः कृतं कर्म अर्जुनेन .... । (कृ+अनीयर्) (गी.४.१५)

६. कामः क्रोधः तथा लोभः .... । (त्यज्+तव्यत्) (गी.१६.२१)

७. अर्जुनेन तपस्विभ्यः ज्ञानिभ्यः कर्मिभ्यः च अधिकेन योगिना .... । (भू+अनीयर्) (गी.६.४६)

८. योगिना यतः यतः चञ्चलं मनः निश्चरति ततः ततः नियम्य आत्मनि एव वशं .... । (नी+तव्यत्) (गी.६.२६)

९. योगिना मनः आत्मसंस्थं कृत्वा किञ्चिदपि न .... । (चिन्त् + अनीयर्) (गी.६.२५)

१०. परमां गतिं प्राप्य यतः जनाः न निवर्तन्ते, तत् मम परमं धाम .... । (मन्+तव्यत्)(गी.८.२१)

ङ. यथोदाहरणं स्थूलाक्षरैः मुद्रितस्य पदस्य धातुं प्रत्ययं च प्रदर्शयत -

यथा - अर्जुनेन 'आत्मा अव्यक्तः, अचिन्त्यः, अविकार्यः' इति ज्ञात्वा शोकः न करणीयः। (२.२५)

धातुः - कृ प्रत्ययः - अनीयर्

१. अर्जुनेन कामरूपः शत्रुः **नाशनीयः**। (३.४३) धातुः - .... प्रत्ययः - ....

२. मनुष्यैः सर्वशः भगवतः वर्त्म **अनुवर्तनीयम्**। (४.११) धातुः - .... प्रत्ययः - ....

३. अज्ञानसम्भूतं संशयं छित्त्वा भारतेन **उत्थातव्यम्**। (४.४२)धातुः - .... प्रत्ययः - ....

४. दुर्निग्रहं मनः अभ्यासेन वैराग्येण च **ग्रहीतव्यम्**। (६.३५) धातुः - .... प्रत्ययः - ....

५. हे कौन्तेय ! यद् करोषि, यद् अश्नासि, जुहोषि ददासि वा तत् त्वया मदर्पणं **करणीयम्**। (९.२७)

धातुः - .... प्रत्ययः - ....

६. 'कृष्णस्य भक्तः न प्रणश्यति' इति **प्रतिज्ञातव्यम्**। (९.३१)धातुः - .... प्रत्ययः - ....

७. 'इदं शरीरं क्षेत्रम्' इति येन अभिधीयते सः क्षेत्रज्ञः इति **ज्ञातव्यम्**। (१३.१)

धातुः - .... प्रत्ययः - ....

८. यस्मिन् गताः जनाः न निवर्तन्ते तत् पदं **परिमार्गितव्यम्**। (१५.४)

धातुः - .... प्रत्ययः - ....

९. यत् तेजः चन्द्रमसि अग्नौ च विद्यते तत् कृष्णस्य इति **वेदितव्यम्**। (१५.१२)

धातुः - .... प्रत्ययः - ....

१०. श्रेष्ठः यद् आचरति तदेव जनैः **अनुवर्तनीयम्**। (३.२१) धातुः - .... प्रत्ययः - ....

च. यथोदाहरणं प्रदत्तानि वाक्यानि विधिलिङ्लकारे परिवर्तयत -

यथा - छात्रेण प्रतिदिनं पाठशाला गमनीया। छात्रः प्रतिदिनं पाठशालां गच्छेत्।

१. जनैः भवान् ज्ञातव्यः।

-- ।

२. मङ्गलया गणेशः नन्तव्यः।

-- ।

३. अतिथिना गृहम् आगन्तव्यम्।

-- ।

४. धनिकेन अर्थसाहाय्यं करणीयम्।

-- ।

५. शिक्षकेण छात्राणां दोषाः परिहरणीयाः।

-- ।

६. शिवभक्तेन प्रदोषव्रतम् आचरणीयम्।

-- ।

७. महिलाभिः तुलसीपूजनं कर्तव्यम्।

-- ।

८. सेवकेन दीपाः ज्वालनीयाः।

-- ।

९. श्रोतृभिः भाषणानि श्रोतव्यानि।

-- ।

१०. भवता किञ्चित् कष्टं सहनीयम्।

-- ।

११. सज्जनेन केऽपि न निन्दनीयाः।

-- ।

१२. संस्थया एतादृशाः कार्यक्रमाः आयोजनीयाः ।

-- ।

१३. बालकेन पितरौ वन्दितव्यौ ।

-- ।

१४. सर्वैः दुग्धं पातव्यम् ।

-- ।

१५. गुरुभिः आसन्देषु उपवेष्टव्यम् ।

-- ।

१६. विशाखया स्वपुत्र्यः पाठनीयाः ।

-- ।

१७. अतुलेन पाठ्यपुस्तके आनेतव्ये ।

-- ।

१८. कर्मकरैः समयेन कार्यालयः प्राप्तव्यः ।

-- ।

१९. राज्ञा न्यायः करणीयः ।

-- ।

२०. तेन एका नगरी चेतव्या ।

-- ।

२१. क्रोधसमये अस्माभिः दीर्घं श्वसनीयम् ।

-- ।

२२. भारतीयैः स्वदेशे निर्मितानि वस्तूनि क्रेतव्यानि ।

-- ।

२३. मया आवेदनं प्रेषणीयम् ।

-- ।

२४. अस्माभिः लक्ष्यं साधनीयम् ।

-- ।

२५. मूर्तिकारेण मृत्तिकया भगवत्प्रतिमा निर्मातव्या ।

-- ।

२६. मानवेन कृतस्य कर्मणः फलं भोक्तव्यम्।

-- ।

छ. यथोदाहरणं विधिलिङ्लकारस्य क्रियापदानां स्थाने तव्यत्-अनीयर्-प्रत्ययान्तानि पदानि उपयुज्य वाक्यानि लिखत -

यथा - बन्धुः पत्रं लिखेत्। बन्धुना पत्रं लेखनीयम् / लेखितव्यम्।

१. विश्वेशः ग्रामात् आगच्छति। -- ।

२. अहम् अप्रियं न वदेयम्। -- ।

३. बालकाः भगवन्तं नमेयुः। -- ।

४. स्पर्धकाः शीघ्रं धावेयुः। -- ।

५. शिक्षकौ बोधयेताम्। -- ।

६. रुग्णः औषधं स्वीकुर्यात्। -- ।

७. माधवी कदलीफलानि वितरेत्। -- ।

८. कः निर्णयं सूचयेत्? -- ।

९. भक्ताः देवं स्मरेयुः। -- ।

१०. दम्पती सत्यनारायणं पूजयेताम्। -- ।

ज. यथोदाहरणं स्थूलाक्षरैः मुद्रितानि पदानि निर्दिष्टं वचनानुसारं परिवर्त्य वाक्यानि रचयत -

यथा - युवकैः समाजकार्याणि करणीयानि। (एकवचनम्)

युवकैः समाजकार्यं करणीयम्।

१. प्रत्येकेन **वृक्षः** संवर्धनीयः। (बहुवचनम्) -- ।

२. अमृतया सिक्थवर्तिका **आनेतव्या**। (द्विवचनम्) -- ।

३. संस्थया वार्तापत्राणि **वितरणीयानि**। (एकवचनम्) -- ।

४. भास्करेण **निसर्गचित्रं** रचनीयम्। (द्विवचनम्) -- ।

५. मात्रा शाटिका **क्रेतव्या**। (बहुवचनम्) -- ।

६. युष्माभिः **रात्रिः** यापनीया। (द्विवचनम्) -- ।

७. प्रेक्षागृहस्य नियमाः **पालनीयाः**। (एकवचनम्) -- ।

८. पण्डितेन शास्त्राणि **अध्येतव्यानि**। (द्विवचनम्) -- ।

९. बालिकाभिः **कन्दुकः** क्षेप्तव्यः। (बहुवचनम्) -- ।

१०. छात्रैः गुरुवचनानि **श्रवणीयानि**। (एकवचनम्) -- ।

११. तेन साधनीयं **कार्यं** किम् ? (बहुवचनम्) -- ।

१२. केन **शिबिरे** आयोजनीये ? (बहुवचनम्) -- ।

१३. वरुणेन **एताः** रोटिकाः पचनीयाः। (द्विवचनम्) -- ।

१४. पुस्तकस्य पृष्ठानि न **कर्तयितव्यानि**। (एकवचनम्) -- ।

१५. राज्ञा ब्राह्मणाय **धेनुः** दातव्या। (बहुवचनम्) -- ।

१६. देवेन भक्तानां चिन्ताः **परिहरणीयाः**। (एकवचनम्) -- ।

१७. **बालेन** दुग्धं पातव्यम्। (बहुवचनम्) -- ।

१८. विद्यार्थिभिः समयसारिणी **द्रष्टव्या**। (बहुवचनम्) -- ।

स्वाभ्यासः

क. छात्रैः पाठशालायां किं किं करणीयम् ? किं किं न करणीयम् इति प्रत्येकं पञ्च वाक्येषु लिखत -

किं किं करणीयम् ?	किं किं न करणीयम् ?
पाठशालायां समयेन आगन्तव्यम्।	प्रार्थनासमये केनापि सह न वदनीयम्।

ख. गृहस्थेन किं किं करणीयम् ? किं किं न करणीयम् इति प्रत्येकं पञ्चसु वाक्येषु लिखत -

किं किं करणीयम् ?	किं किं न करणीयम् ?

ग. **<u>'कण्ठस्थीकरणीयः गीता-अध्यायः'</u> इति पदद्वयस्य रूपाणि सप्तसु विभक्तिषु योजयित्वा वाक्यानि रचयत -**

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

घ. **अधः प्रदत्तान् श्लोकान् परिशील्य <u>तव्यत्-अनीयर्</u>-प्रत्ययान्तानि रूपाणि लिखत -**

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ गी.११.१८ ॥

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ गी.१७.११ ॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ गी.१७.२० ॥

****

कर्म कारणमुच्यते

कृत्प्रत्ययाः **१८**

महाभारतयुद्धं **परिसमाप्तम्**। भीष्मः शरशय्यायां **शयानः** आसीत्। युद्धपरिसरः गजाश्वनरजीवानां मृतशरीरैः **आच्छादितः** आसीत्। तस्मिन् युद्धे **मृतानि** शरीराणि **दृष्ट्वा** युधिष्ठिरः चिन्ताकुलः आसीत्। सः अनुजैः सह भीष्मस्य समीपं **गतवान्**। तं **नमस्कृत्य उक्तवान्** - 'पितामह ! अस्य विनाशस्य **कारणम्** अहमेव ननु ? न जानामि अहं कीदृशीं दुरवस्थां प्राप्स्यामि' इति।

तदा तं **सान्त्वयन्** भीष्मः अवदत् - 'वत्स ! न त्वया एवं **चिन्तनीयम्**, अस्य सर्वस्य **कारणं** त्वं नैव। इमे ते बान्धवाः स्वस्य स्वस्य **पुराकृतस्य** कर्मणः फलम् अनुभवन्ति' इति। किन्तु युधिष्ठिरः **समाहितः** नाभवत्। तं पुनरपि **बोधयन्** भीष्मः तस्य निदर्शनरूपेण काञ्चित् कथां **श्रावितवान्**।

पुरा गौतमी नाम काचित् तपस्विनी महिला आसीत्। तस्याः एकः एव पुत्रः आसीत्। कदाचित् कश्चन सर्पः तं पुत्रम् अदशत्। तेन सः बालः अचेतनः **जातः**। तस्य अचेतनताम् **अवलोक्य** गौतमी **रोदनम्** आरब्धवती। **रुदतीं** गौतमीं **वीक्ष्य** अर्जुनकः नाम व्याधः 'शोकः न **कर्तव्यः**' इति **कथयन्** झटिति स्नायुपाशेन तं सर्पं **बद्ध्वा** गौतम्याः समीपम् **आनीतवान्**। **उक्तवान्** च - '**मातः** ! अयं दुष्टः सर्पः तव पुत्रम् अमारयत्। किम् अहम् एतम् अग्नौ क्षिपाणि, उत खण्डशः करवाणि ? अथवा वद, अन्येन केन प्रकारेण एषः **दण्डनीयः**' इति।

तदा गौतमी अवदत् - 'हे सौम्य ! त्यज इमं सर्पम्, यतः सर्पे **मारिते** अपि **मृतः** मम पुत्रः **जीवितः** न भविष्यति' इति।

किन्तु व्याधः तत् **अनङ्गीकुर्वन्** पुनः पुनः सर्पं **मारयितुं** तस्याः अनुमतिम् **याचमानः** आसीत्। गौतमी तु तस्मै अनुमतिं न अददात्। गौतमी-व्याधयोः **सम्भाषणं श्रुत्वा** सः सर्पः मनुष्यभाषया **भाषमाणः** अवदत् - 'हे अर्जुनक ! अहं बालस्य **दंशकः** इति यत् भवान् **वदन्** अस्ति तत् सत्यम् एव, तथापि तत्र मम न कोऽपि दोषः। अत्र **कारयिता** तु मृत्युः, मृत्योः बलात् मया इदं **कृतम्**' इति।

तदा व्याधः अवदत् - 'तथापि अस्य बालस्य **दशनं** तु त्वया एव **कृतम्**। अतः त्वं वध्यः एव' इति। सर्पः अवदत् - "अहं मृत्योः **प्रेरणया** एव अस्य बालस्य **हनने कर्ता** अभवम्। वास्तविकं **कारणं** तु मृत्युः एव" इति।

तदा मृत्युः एव तत्र **समागतः** अभवत्। सः अवदत् - "हे सर्प ! नात्र अहं **कारणम्**, न वा त्वम्। कालः अत्र

कारणम् । यतः तेन **प्रेरितः** अहं त्वां **प्रेरितवान्** । यथा वायुः आकाशे **स्थितान्** मेघान् आकर्षति, विकर्षति च तद्वदेव कालः अपि अस्मान् आकर्षति, विकर्षति च । तेनैव कालेन जगत् इदं सृज्यते, संह्रियते वा । एवं सति अत्र दोषः स्यात् तर्हि सः कालस्यैव, न तु मम" इति । तत् **आकर्ण्य** कालः अपि तत्र **उपस्थितः** अभवत् । सः अवदत् " हे व्याध ! तस्य बालस्य **मरणे** न अयं सर्पः, न एषः मृत्युः न वा अहं **कारणीभूतः** । **कारणं** तु अनेन **कृतं** कर्म एव ।

यदनेन **कृतं** कर्म तेनायं निधनं **गतः** ।
विनाशहेतुः कर्मास्य सर्वे कर्मवशा वयम् ॥

छायातपौ इव कर्म **कर्ता** च **नित्यसम्बद्धौ** भवतः" इति ।

सर्वमेतत् **श्रुत्वा** गौतमी अवदत् - "मम पुत्रस्य **मरणकारणम्** एषु न कोऽपि अस्ति । मम पुत्रः स्वीयकर्मणां फलेन मृत्युं **प्राप्तवान्** अस्ति । ममापि तादृशकर्म एव स्यात् येन एतस्य मृत्युः समभवत् । अतः कालः मृत्युः च **स्वस्थानं** गच्छतां त्वमपि एतं सर्पं परित्यज" इति । एतां कथां **श्रावयित्वा** भीष्मः अकथयत् - "राजन् ! सर्वेऽपि स्वकर्मणां फलं प्राप्नुवन्ति इति **ज्ञानेन** गौतम्याः शोकः **परिसमाप्तः** । अत्रापि तथैव । त्वया दुर्योधनेन वा न किमपि **अपराद्धम्** । सर्वेऽपि इमे स्वकर्मणः फलम् अनुभवन्ति । अहमपि अनुभवामि । सर्वे कर्मवशाः वयम् । अतः शोकं मा कुरु" इति । भीष्मस्य **वचनैः** युधिष्ठिरः **समाहितः** अभवत् ।

अभ्यासः

क. कथायां स्थूलाक्षरैः मुद्रितानि पदानि रिक्तस्थानेषु लिखत -

ख. पाठे प्रयुक्तानि विभिन्नप्रत्ययान्तानि पदानि चित्वा यथोदाहरणं लिखत -

क्त	परिसमाप्तम्, आच्छादितः, मृतानाम्, पुराकृतस्य, समाहितः ....
क्तवतु	
क्त्वा	
ल्यप्	
शतृ	
शानच्	
तव्यत्	
अनीयर्	
तुमुन्	

अवधेयम्

अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि पदानि 'कृदन्तानि' इति कथ्यन्ते । यतः एतेषाम् अन्ते विद्यमानस्य प्रत्ययस्य 'कृत्' इति नाम (कृत् अन्ते यस्य सः कृदन्तः) तव्यत्, अनीयर्, ण्वुल्, तृच्, क्त्वा, ल्यप्, तुमुन्, ल्युट्, क्त, क्तवतु, शतृ, शानच् - एते प्रसिद्धाः व्यवहारे अत्यन्तम् उपयोगिनः च कृत्प्रत्ययाः । एतेषु तव्यत्, अनीयर्, क्त्वा, ल्यप्, तुमुन्, क्त, क्तवतु, शतृ, शानच् - एते प्रत्ययाः अस्माभिः पूर्वं पठिताः । यथा -

- ब्रह्मैव तेन **गन्तव्यं** ब्रह्मकर्मसमाधिना । (गी.४.२४) (तव्यत्)
- **दृष्ट्वा** तु पाण्डवानीकं व्यूढं दुर्योधनस्तथा । (गी.१.२) (क्त्वा)
- तदेकं वद **निश्चित्य** येन श्रेयोऽहमाप्नुयाम् । (गी.३.२) (ल्यप्)
- एतन्मे संशयं कृष्ण **छेत्तुम्** अर्हस्यशेषतः । (गी.६.३९) (तुमुन्)
- तस्य **सञ्जनयन्** हर्षं कुरुवृद्धः पितामहः । (गी.१.१२) (शतृ)
- सर्वथा **वर्तमानो**ऽपि न स भूयोऽभिजायते । (गी.१३.२३) (शानच्)
- लोकेऽस्मिन् द्विविधा निष्ठा पुरा **प्रोक्ता** मयानघ । (गी.३.३) (क्तः)
- इमं विवस्वते योगं **प्रोक्तवान्** । (गी.४.१) (क्तवतु)

एतानि गीतावाक्यानि परिशीलयत -

१. स यत् **प्रमाणं** कुरुते लोकस्तदनुवर्तते । (गी.३.२१)

२. उपद्रष्टानुमन्ता च **भर्ता भोक्ता** महेश्वरः । (गी.१३.२२)

३. **अधिष्ठानं** तथा **कर्ता करणं** च पृथग्विधम् । (गी.१८.१४)

४. **ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।** (गी.१८.४२)

५. स्थितोऽस्मि गतसन्देहः करिष्ये **वचनं** तव। (गी.१८.७३)

६. न तद् भासयते सूर्यो न शशाङ्को न **पावकः**। (गी.१५.६)

७. दोषैरेतैः कुलघ्नानां वर्णसङ्कर**कारकैः**। (गी.१.४३)

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि कृदन्तानि सन्ति। अस्मिन् पाठे तेषां कृदन्तानां परिचयं जानीत -

➢ **ण्वुल् प्रत्ययः -**

कश्चन सङ्गीतमहोत्सवः प्रवर्तते। तत्र -

मञ्चसञ्चालकः मञ्चसञ्चालनं करोति। **वादकः** वीणां वादयति।

गायकः गीतं गायति। **श्रावकाः** गीतं शृण्वन्ति। **नर्तकः** नृत्यं करोति।

दर्शकाः नृत्यं पश्यन्ति।

एतेषु वाक्येषु मञ्चसञ्चालकः, वादकः, गायकः, श्रावकाः, नर्तकः, दर्शकाः - इत्येतानि पदानि 'ण्वुल्' प्रत्ययान्तानि। धातोः कर्ता इत्यर्थे ण्वुल्प्रत्ययः भवति। तस्य 'अक' इति आदेशः भवति। ततः एतानि रूपाणि सिद्ध्यन्ति। तस्मात् प्रायः यत्र 'अक' इति श्रूयते सः 'ण्वुल्'प्रत्ययान्तः शब्दः इति वक्तुं शक्यते।

एतानि ण्वुल्प्रत्ययान्तानि पदानि परिशीलयत -

गायति	गै + ण्वुल् (अक)	गायकः
शृणोति	श्रु + ण्वुल् (अक)	श्रावकः
नृत्यति	नृत् + ण्वुल् (अक)	नर्तकः
पश्यति	दृश् + ण्वुल् (अक)	दर्शकः
नयति	नी + ण्वुल् (अक)	नायकः
गृह्णाति	ग्रह् + ण्वुल् (अक)	ग्राहकः
ज्वलति	ज्वल् + ण्वुल् (अक)	ज्वालकः
करोति	कृ + ण्वुल् (अक)	कारकः
सञ्चालयति	सम् + चालि + ण्वुल् (अक)	सञ्चालकः
वादयति	वादि + ण्वुल् (अक)	वादकः

स्त्रीलिङ्गे एतान्येव पदानि गायिका, श्राविका, दर्शिका, नायिका एतादृशानि भवन्ति। नपुंसकलिङ्गे तु श्रावकम्, दर्शकम्, नायकम् एतादृशानि भवन्ति।

ग. तालिकायां दत्तानां धातूनां ण्वुल्-प्रत्ययान्तानि रूपाणि यथोदाहरणं लिखत -

धातुः	पुंलिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
यथा - अर्च्	अर्चकः	अर्चिका	अर्चकम्
१. अधि + इङ्	अध्यापकः		
२. क्षिप्	क्षेपकः		
३. गण्	गणकः		
४. कर्ष्	कर्षकः		
५. चल्	चालकः		
६. जन्	जनकः		
७. रक्ष्	रक्षकः		
८. पच्	पाचकः		
९. याच्	याचकः		
१०. नृत्	नर्तकः	नर्तकी	

घ. एतत्संख्याकेषु गीताश्लोकेषु ण्वुल्-प्रत्ययान्तानां रूपाणां प्रयोगान् परिशीलयत -

१.७ १.३८ १.४३ २.२३

➤ **तृच्प्रत्ययः -**

काचित् प्रचारसभा प्रवर्तते। तत्र -

नेता आसन्दे उपविशति। **वक्ता** कार्यसूचीं पठति।

श्रोतारः करताडनं कुर्वन्ति। **कार्यकर्तारः** सम्मर्दस्य निरीक्षणं कुर्वन्ति।

आरक्षितारः मञ्चस्य रक्षणं कुर्वन्ति।

> एतेषु वाक्येषु नेता, वक्ता, श्रोतारः, कार्यकर्तारः, आरक्षितारः - इत्येतानि पदानि तृच्प्रत्ययान्तानि। तृच्-प्रत्ययः अपि धातोः 'कर्ता' इत्यर्थे भवति।

एतानि तृच्प्रत्ययान्तानि पदानि परिशीलयत -

नयति	नै + तृच्	नेता
वक्ति	वच् + तृच्	वक्ता
शृणोति	श्रु + तृच्	श्रोता

करोति	कृ + तृच्	कर्ता
रक्षति	रक्ष् + तृच्	रक्षिता
सृजति	सृज् + तृच्	स्रष्टा
ददाति	दा + तृच्	दाता
पश्यति	दृश् + तृच्	द्रष्टा
जयति	जि + तृच्	जेता
धरति	धृ + तृच्	धर्ता
युद्ध्यते	युध् + तृच्	योद्धा

> स्त्रीलिङ्गे एतान्येव पदानि नेत्री, वक्त्री, श्रोत्री, कर्त्री एतादृशानि भवन्ति ।
> नपुंसकलिङ्गे तु नेतृ, वक्तृ, श्रोतृ, कर्तृ एतादृशानि भवन्ति ।

ङ. तालिकायां दत्तानां धातूनां तृच्-प्रत्ययान्तानि रूपाणि यथोदाहरणं लिखत -

धातुः	**पुंलिङ्गम्**	**स्त्रीलिङ्गम्**	**नपुंसकलिङ्गम्**
यथा - कथ	**कथयिता**	**कथयित्री**	**कथयितृ**
१. अर्च्	अर्चिता		
२. त्रै	त्राता		
३. धा	धाता		
४. भिद्	भेत्ता		
५. विद्	वेत्ता		
६. ज्ञा	ज्ञाता		
७. वि + क्री	विक्रेता		
८. भुज्	भोक्ता		
९. वह्	वोढा	वोढ्री	वोढृ
१०. रच्	रचयिता		

च. एतत्संख्याकेषु गीताश्लोकेषु तृच्-प्रत्ययान्तानां रूपाणां प्रयोगं परिशीलयत -

४.१३   ९.१७   ९.२४   १४.४   १२.१३

८.९   ९.१८   १३.२२

छ. कोष्ठकानां साहाय्येन उचितानि रूपाणि रिक्तस्थानेषु पूरयत -

यथा - पी.टी.उषा उत्तमा धाविका। (धाव् + ण्वुल्)

१.	सः ---------------------------- पूजासामग्रीम् आनयति।	(अर्च् + ण्वुल्)
२.	ऋषयः मन्त्राणां --------------------------- सन्ति।	(दृश् + तृच्)
३.	का ------------------------- ग्रन्थालये उपविशति ?	(अधि + इङ् + तृच्)
४.	महर्षिव्यासः महापुराणानां ---------------------------- ।	(रच् + तृच्)
५.	हनुमान् सङ्कटेभ्यः -------------------------- ।	(मुच् + ण्वुल्)
६.	सर्वेऽपि संस्कृतस्य ------------------------- भवेयुः।	(पठ् + तृच्)
७.	पण्डितैः सुरापानं ------------------------------ इति उच्यते।	(पत् + ण्वुल्)
८.	गणेशः महाभारतस्य ----------------------------- ।	(लिख् + ण्वुल्)
९.	विश्वनाथ-आनन्दः चतुरङ्गक्रीडायां भूतपूर्वः ------------------------ ।	(विश्व + वि + जि + तृच्)
१०.	गौतमः न्यायशास्त्रस्य --------------------------- ।	(प्र + नी + तृच्)
११.	वयमेव भारतीयसंस्कृतेः ---------------------------- ।	(रक्ष् + तृच्)
१२.	के के संस्कृतमहोत्सवस्य ------------------------------ ?	(आ + युज् + ण्वुल्)
१३.	रामनाम भवसागरात् -------------------------- ।	(तॄ + ण्वुल्)
१४.	गङ्गा पापानां --------------------------------- ।	(क्षाल् + तृच्)
१५.	कृष्णस्य वंशीवादनं -------------------------- ।	(मुह् + ण्वुल्)

➤ ल्युट्प्रत्ययः -

सर्वेऽपि छात्राः विद्यायाः **अर्जनं** कर्तुं गुरुकुलम् आगताः सन्ति। तत्र -

कतिचन छात्राः व्याकरणस्य **अध्ययनं** कुर्वन्ति। कतिचन वेदानां **पठनं** कुर्वन्ति।

कतिचन गुरोः **वचनानि** शृण्वन्ति। कतिचन श्लोकानां **रटनं** कुर्वन्ति।

कतिचन सूत्राणां **लेखनं** कुर्वन्ति।

> एतेषु वाक्येषु अर्जनम्, अध्ययनम्, पठनम्, वचनम्, रटनम्, लेखनम् - इत्येतानि पदानि ल्युट्प्रत्ययान्तानि सन्ति। धातोः भावार्थे अयं प्रत्ययः भवति। तस्य 'अन' इति आदेशः भवति। अतः यत्र ल्युट्प्रत्ययः तत्र सर्वत्रापि अन्ते 'अन' इति श्रूयते।

एतानि ल्युट्प्रत्ययान्तानि पदानि परिशीलयत -

आस्ते	आस् + ल्युट् (अन)	आसनम्
कथयति	कथ् + ल्युट् (अन)	कथनम्
जीवति	जीव् + ल्युट् (अन)	जीवनम्
जानाति	ज्ञा + ल्युट् (अन)	ज्ञानम्
पुष्णाति	पुष् + ल्युट् (अन)	पोषणम्
मार्जयति	मृज् + ल्युट् (अन)	मार्जनम्
रोदिति	रुद् + ल्युट् (अन)	रोदनम्
मन्यते	मन् + ल्युट् (अन)	मननम्
भाषते	भाष् + ल्युट् (अन)	भाषणम्
ध्यायति	ध्यै + ल्युट् (अन)	ध्यानम्

ल्युट्प्रत्ययान्ताः शब्दाः प्रायः नपुंसकलिङ्गाः भवन्ति ।

ज. अधः दत्तानां धातूनां ल्युडन्तरूपाणि लिखत -

धातुः	ल्युडन्तरूपम्		धातुः	ल्युडन्तरूपम्
पच्	पचनम्		भ्रम्	
दृश्			मुच्	
यज्			दा	
ज्वल्			छिद्	
जल्प्			अर्ज्	

झ. एतत्संख्याकेषु गीताश्लोकेषु ल्युट्प्रत्ययान्तानां रूपाणां प्रयोगान् परिशीलयत -

२.३४	४.८	७.२	९.२७	१३.१८
२.४९	४.२४	८.२	११.२९	१५.९
३.३५	४.२८	८.२८	११.३५	१७.१०
३.४१	६.३	९.१८	११.३८	

ल्युट्प्रत्ययः करणम् - अधिकरणम् - इत्यनयोः अपि अर्थयोः भवति।
करणार्थे - यथा - दानम् = दीयते अनेन इत्यर्थः ।
ध्यानम् = ध्यायते अनेन इत्यर्थः ।
भाषणम् = भाष्यते अनेन इत्यर्थः ।
अधिकरणार्थे - यथा - आसनम् = आस्यते अत्र इत्यर्थः ।
अधिष्ठानम् = अधिस्थीयते अत्र इत्यर्थः ।
बहुव्रीहिसमासे ल्युट्प्रत्ययान्तः शब्दः अपि विशेष्यस्य लिङ्गं प्राप्नोति। अतः ल्युडन्तः सर्वदा नपुंसकलिङ्गः इति कथनं बहुव्रीहिसमासे न अन्वेति।
यथा - कृतभोजनः = कृतं भोजनं येन सः ।
शत्रुतापनः = शत्रूणां तापनं यः करोति सः ।

• **णिनिप्रत्ययः**

एतानि उदाहरणानि परिशीलयत -

देवा अप्यस्य रूपस्य नित्यं **दर्शनकाङ्क्षिणः** । (गी.११.५२)

मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव **सव्यसाचिन्**। (गी.११.३३)

आब्रह्मभुवनाल्लोकाः **पुनरावर्तिनो**ऽर्जुन। (गी.८.१६)

वेदवादरताः पार्थ नान्यदस्तीति **वादिनः** । (गी.२.४२)

एतेषु स्थूलाक्षरैः निर्दिष्टाः शब्दाः तदस्य शीलम् इत्यर्थे प्रयुक्ताः वर्तन्ते । यथा- दर्शनं काङ्क्षितुं शीलमस्य 'दर्शनकाङ्क्षी' इति अस्य विग्रहः भवति । आवर्तितुं शीलमस्य आवर्ती । स्त्रीलिङ्गे 'आवर्तिनी' इति नपुंसके 'आवर्ति' इति च अस्य रूपाणि भवन्ति। सव्येन (वामेन हस्तेन) सचति (बाणान् प्रयुङ्क्ते) तच्छीलम् अस्य सव्यसाची। अस्मिन्नर्थे णिनि प्रत्ययः विधीयते।

ञ. यथोदाहरणं विग्रहवाक्यानि लिखत -

१.	मद्याजी	मां यजति तच्छीलम् अस्य	(गी.१८.६५)
२.	लघ्वाशी	-- ।	(गी.१८.५२)
३.	विविक्तसेवी	-- ।	(गी.१८.५२)
४.	अहंवादी	-- ।	
५.	कर्मानुबन्धि	-- ।	(गी.१५.२)
६.	कर्मसङ्गी	-- ।	(गी.१४.१५)
७.	नासाभ्यन्तरचारिणौ	-- ।	(गी.५.२७)
८.	धनुर्धारी	-- ।	

९. तत्वदर्शिनः -- । (गी.४.३४)
१०. यज्ञशिष्टाशिनः -- । (गी.३.१३)

सर्वेभ्योऽपि धातुभ्यः ण्वुल्-तृच्-ल्युट्प्रत्ययाः भवन्ति । परन्तु केचन धातवः एतेषु एकेन एव प्रत्ययेन प्रत्ययद्वयेन वा युक्ताः प्रसिद्धाः सन्ति । यथा -

धातुः	ण्वुल्	तृच्	ल्युट्
गै	गायकः / गायिका	गाता / गात्री	गानम्
दा	दायकः / दायिका	दाता / दात्री	दानम्
आस्	आसकः / आसिका	आसिता / आसित्री	आसनम्
क्रीञ्	क्रायकः / क्रायिका	क्रेता / क्रेत्री	क्रयणम्
ज्ञा	ज्ञायकः / ज्ञायिका	ज्ञाता / ज्ञात्री	ज्ञानम्
दीप्	दीपकः / दीपिका	दीपिता / दीपित्री	दीपनम्
पच्	पाचकः / पाचिका	पक्ता / पक्त्री	पचनम्
बन्ध्	बन्धकः / बन्धिका	बन्द्धा / बन्द्ध्री	बन्धनम्
रुदिर्	रोदकः / रोदिका	रोदिता / रोदित्री	रोदनम्
भ्रम्	भ्रमकः / भ्रमिका	भ्रमिता / भ्रमित्री	भ्रमणम्
ध्यै	ध्यायकः / ध्यायिका	ध्याता / ध्यात्री	ध्यानम्
डी	डायकः / डायिका	डयिता / डयित्री	डयनम्
जि	जायकः / जायिका	जेता / जेत्री	जयनम्
जीव्	जीवकः / जीविका	जीविता / जीवित्री	जीवनम्

ट. अधः पदरञ्जिन्यां दत्तेषु पदेषु ण्वुलन्तानि, तृजन्तानि ल्युडन्तानि च विभज्य लिखत -

या	ज	कः	प	ध्या	अ	य	न	म्	
ज	न	कः	र	ता	र्चि	च	य	न	म्
नि	न	मा	क्ष	त्रा	ता	म्	न	ज	त्य
ता	म्	न	ण	ण	यि	म्	म्	भ	क्ता
प	व	न	म्	म्	थ	न		ञ्ज	मो
कः	ञ्च	म्	न	थ	क	र्त	कः	कः	च
व	कः	न		र	र्ष	कः	ज	र	कः
द	ह	न	म्	क्षि	कः		नि	ग	
न	ग्रा	ह	यि	ता	पो	षि	ता	जा	

ण्वुलन्तानि	तृजन्तानि	ल्युडन्तानि

कौन्तेय ! उत्तिष्ठ

तद्धितप्रत्ययाः **१९**

एतत् कथानकम् अवधानेन पठत जानीत च -



समवेतान् योद्धॄन् दृष्ट्वा दुर्योधनः गुरुम् अवदत् - "आचार्य ! पश्यतु भवतः **धीमता** (धीः अस्य अस्मिन् वा अस्ति इति धीमान्) शिष्येण कथं **पाण्डवानां** (पाण्डोः अपत्यानि पुमांसः पाण्डवाः) महत्सैन्यम् **(सेनायाः भावः)** व्यूहरूपेण स्थापितम् अस्ति इति । तस्मिन् भीमार्जुनयोः **समत्वं** (समस्य भावः) भजन्ते बहवः । तेषु वीरेषु युयुधानः, विराटः, काशिराजः, **शैब्यः, सौभद्रः, द्रौपदेयाः** (शिबेः राजा) (सुभद्रायाः अपत्यं पुमान्) (द्रौपद्याः अपत्यानि पुमांसः) **वीर्यवन्तः** (वीर्यम् एषाम् एषु वा अस्ति) नरपुङ्गवाः च उपस्थिताः सन्ति । तथापि न कोऽपि क्लेशः मम मनसि । यतो हि मम पक्षे तु भवान्, **शान्तनवः**, (शन्तनोः अपत्यं पुमान्) **द्रौणिः**, (द्रोणस्य अपत्यं पुमान्) **सौमदत्तिः** (सोमदत्तस्य अपत्यं पुमान्).....इत्यादयः अन्येऽपि बहवः युद्धविशारदाः शूराः सन्ति ।"

एवं वदतः **धार्तराष्ट्रस्य** (धृतराष्ट्रस्य अपत्यं पुमान्) मनः मोदयितुं **पितामहः** (पितुः पिता) शङ्खम् अधमत् । तेन सैन्ये सर्वत्र उत्साहवर्धनम् अभवत् । एतं शङ्खध्वनिं श्रुत्वा **वासुदेवः**, (वसुदेवस्य अपत्यं पुमान्) **पार्थः** (पृथायाः अपत्यं पुमान्) च शङ्खध्वनिम् अकुरुताम् । अन्येऽपि वीराः स्वीयान् शङ्खान् ध्मातवन्तः । यथा - भीमः, युधिष्ठिरः, नकुलः, सहदेवः, श्रेष्ठधनुर्धरः **काश्यः** (काश्यां भवः) महारथी **शिखण्डी** (शिखण्डः चूडा अस्य अस्मिन् वा अस्ति) **सात्यकिः** (सत्यकस्य अपत्यं पुमान्) इत्यादयः । एषः घोरध्वनिः **धार्तराष्ट्राणां** (धृतराष्ट्रस्य अपत्यानि पुमांसः) मनः व्यदारयत् । कस्य पक्षस्य विजयः भवेत् इति सर्वे चिन्तयन्तः आसन् । रणाङ्गणे संस्थितं विशालं सैन्यं द्रष्टुम् अर्जुनः उत्सुकः आसीत् ।

अतः **कौन्तेयः** (कुन्त्याः अपत्यं पुमान्) **केशवम्** (प्रशस्ताः केशाः सन्ति अस्य अस्मिन् वा) इत्थम् अवदत् - "**केशव** ! मम रथं सेनयोः मध्ये स्थापयतु ।" कृष्णः तथा अकरोत् । तत्र गत्वा अर्जुनः पितॄन्, मातुलान्, **पितामहादीन्** बहून् **आत्मीयान्** (आत्मनि भवः) दृष्ट्वा कष्टेन इत्थम् अवदत् - "हे कृष्ण ! एतान् स्वजनान् दृष्ट्वा मम गात्राणि सीदन्ति । इदं गाण्डीवं हस्तात् स्रंसते । मनः अपि भ्रमति इव । हे **केशव** ! येषां कृते अहं राज्यं, सुखादिकम् इच्छामि स्म, ते तु सर्वे अस्मिन् युद्धे गतप्राणाः भविष्यन्ति । अतः अहं राज्यं, सुखं, विजयं च न इच्छामि । हे **वनमालिन्** ! (वनमाला अस्य अस्ति) त्रैलोक्यस्य राज्यं लभेत चेदपि एतान् हन्तुं न प्रभवामि । किं पुनः भूमेः कृते ? एतान् **आततायिनः** (आततेन विस्तीर्णेन शस्त्रादिना अयितुं शीलम् अस्य) हत्वा तु पापमेव अस्मान्
आश्रयेत् । स्वजनान् मारयित्वा वयं **सुखिनः** (सुखम् एषां एषु वा अस्ति) भवितुं न अर्हामः एव ।

हे **वार्ष्णेय** ! (वृष्णेः गोत्रापत्यं पुमान्) एते **धार्तराष्ट्राः** अप्रतीकारं मां हन्युः चेदपि चिन्ता नास्ति" इति उक्त्वा सः **किरीटी** (किरीटम् अस्य अस्मिन् वा अस्ति) सशरं चापं विसृज्य खिन्नमनाः रथे उपाविशत्। तस्य मनसः एतादृशं **दौर्बल्यम्** (दुर्बलस्य भावः) अपाकर्तुम् **वासुदेवः** गीताम् अश्रावयत्।

पाठे स्थूलाक्षरैः मुद्रितानि पदानि तद्धितप्रत्ययान्तानि सन्ति।

अवधेयम्

- तस्य अपत्यम्, जातः, भव इत्यादिषु अर्थेषु तद्धितप्रत्ययाः भवन्ति। यस्य अन्ते तद्धितप्रत्ययः भवति सः तद्धितप्रत्ययान्तः इति उच्यते।
- तद्धितप्रत्ययाः प्रायेण सुबन्तेभ्यः विधीयन्ते। कदाचित् प्रातिपदिकेभ्यः अपि तद्धितप्रत्ययाः भवन्ति।
- तद्धितप्रत्ययाः उपत्रिशताः सन्ति। ते च बहुषु अर्थेषु भवन्ति। परन्तु अत्र गीतायां बहुशः आगतानाम् अण्-इञ्-ढक्-ण्य-मतुबादीनां तद्धितप्रत्ययानाम् उल्लेखनं क्रियते।

एतासु गीतापङ्क्तिषु स्थूलाक्षरैः मुद्रितानि पदानि अवधानेन पश्यत -

१. ये मे मतमिदं नित्यमनुतिष्ठन्ति **मानवाः**। (गी.३.३१)
२. **श्रद्धावन्तो**ऽनसूयन्तो नानुतिष्ठन्ति मे मतम्। (गी.३.३१)
३. अनिच्छन्नपि **वार्ष्णेय** बलादिव नियोजितः। (गी.३.३६)
४. **आदित्यानाम**हं विष्णुर्ज्योतिषां रविरंशुमान्। (गी.१०.२१)
५. सिद्ध्यसिद्ध्योः समो भूत्वा **समत्वं** योग उच्यते। (गी.२.४८)
६. कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा **मनीषिणः**। (गी.२.५१)
७. विषया विनिवर्तन्ते निराहारस्य **देहिनः**। (गी.२.५९)
८. क्षुद्रं हृदय**दौर्बल्यं** त्यक्त्वोत्तिष्ठ परन्तप। (गी.२.३)
९. न कर्मणामनारम्भा**न्नैष्कर्म्यं** पुरुषोऽश्नुते। (गी.३.४)
१०. स घोषो **धार्तराष्ट्राणां** हृदयानि व्यदारयत्। (गी.१.१९)

अभ्यासः

क. उपरि प्रदत्तासु गीतापङ्क्तिषु स्थूलाक्षरैः मुद्रितानि पदानि अर्थानुगुणं रिक्तस्थानेषु लिखत -

१. मनोः अपत्यानि पुमांसः --------------------------
२. श्रद्धा एषाम् एषु वा अस्ति इति --------------------------
३. वृष्णेः अपत्यं पुमान् (तत्सम्बोधनम्) --------------------------
४. अदितेः अपत्यानि पुमांसः, तेषाम् --------------------------
५. समस्य भावः --------------------------
६. मनीषा एषाम् एषु वा अस्ति इति --------------------------

७. देहः एषाम् एषु वा अस्ति इति --------------------------
८. दुर्बलस्य भावः --------------------------
९. निष्कर्मणः भावः --------------------------
१०. धृतराष्ट्रस्य अपत्यानि पुमांसः, तेषाम् --------------------------

एतानि सर्वाणि पदानि तद्धितप्रत्ययान्तानि सन्ति ।

➢ अपत्यार्थः -

- **अण्प्रत्ययः -**

यथा - सुभद्रायाः अपत्यम् इत्यर्थे = सुभद्रा + अण् = सौभद्रः(गी.१.१८)

(अपत्यशब्दस्य सन्ततिः इत्यर्थः । स च पुमान् स्त्री वा भवितुम् अर्हति । तद्बोधनाय एव अग्रे पुमान् स्त्री इति वा शब्दस्य प्रयोगः भवति । प्रत्यये कृते आदिवृद्धिः भवति ।)

एतानि उदाहरणानि परिशीलयत -

१. भरतस्य अपत्यं पुमान्	=	भरत + अण्	=	भारतः	(गी.२.१०)
२. द्रुपदस्य अपत्यं स्त्री	=	द्रुपद + अण्	=	द्रौपदी	
३. धृतराष्ट्रस्य अपत्यं पुमान्	=	धृतराष्ट्र + अण्	=	धार्तराष्ट्रः	(गी.१.२३)
४. पृथायाः अपत्यं पुमान्	=	पृथा + अण्	=	पार्थः	(गी.२.३)
५. पाण्डोः अपत्यं पुमान्	=	पाण्डु + अण्	=	पाण्डवः	(गी.६.२)
६. मधोः अपत्यं पुमान्	=	मधु + अण्	=	माधवः	(गी.१.१४)
७. वसुदेवस्य अपत्यं पुमान्	=	वसुदेव + अण्	=	वासुदेवः	(गी.११.३७)
८. दनोः अपत्यं पुमान्	=	दनु + अण्	=	दानवः	(गी.१०.१४)
९. मनोः अपत्यं पुमान्	=	मनु + अण्	=	मानवः	(गी.३.१७)
१०. मनोः अपत्यं स्त्री	=	मनु + अण्	=	मानवी	

अपत्यार्थे पुंलिङ्गे एवमेव रूपाणि भवन्ति, स्त्रीलिङ्गे तु स्त्रीप्रत्ययवशात् ईकारः दृश्यते ।

- **ढक्-प्रत्ययः -**

१. विनतायाः अपत्यं पुमान्	=	विनता + ढक् (एय्)	=	वैनतेयः (गी.१०.३०)
२. कुन्त्याः अपत्यं पुमान्	=	कुन्ती + ढक् (एय्)	=	कौन्तेयः (गी.१३.१)
३. द्रौपद्याः अपत्यं पुमान्	=	द्रौपदी + ढक् (एय्)	=	द्रौपदेयः (गी.१.१८)
४. वृष्णेः अपत्यं पुमान्	=	वृष्णि + ढक् (एय्)	=	वार्ष्णेयः (गी.३.३६)

ढस्य 'एय' आदेशः भवति ।

सर्वदा ढक्प्रत्ययस्य स्थाने एय आदेशो भवति इति स्मर्तव्यम् ।

- **इञ्-प्रत्ययः -**

१. सोमदत्तस्य अपत्यं पुमान् = सोमदत्त + इञ् = सौमदत्तिः (गी.१.८)

२. सत्यकस्य अपत्यं पुमान् = सत्यक + इञ् = सात्यकिः (गी.१.१७)

३. दुष्यन्तस्य अपत्यं पुमान् = दुष्यन्त + इञ् = दौष्यन्तिः

- **ण्यप्रत्ययः**

१. अदितेः अपत्यं पुमान् = अदिति + ण्य = आदित्यः (गी.१०.२१)

२. दितेः अपत्यं पुमान् = दिति + ण्य = दैत्यः (गी.१०.३०)

३. प्रजापतेः अपत्यं पुमान् = प्रजापति + ण्य = प्राजापत्यः

यथा- यदा**दित्य**गतं तेजो जगद्भासयतेऽखिलम्। (गी.१५.१२)

ख. यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा -	**वसोः अपत्यं पुमान्**	**=**	**वासवः**	**(अण्)**	**(गी.१०.२२)**
१.	सत्यकस्य अपत्यं पुमान्	=	-------------------	(-------------)	(गी.१.१७)
२.	भरतस्य अपत्यं पुमान् (सम्बो.)	=	-------------------	(-------------)	(गी.२.१०)
३.	इरावतः अपत्यं पुमान्	=	-------------------	(-------------)	(गी.१०.२७)
४.	द्रौपद्याः अपत्यानि पुमांसः	=	-------------------	(-------------)	(गी.१.६)
५.	दशरथस्य अपत्यं पुमान्	=	-------------------	(-------------)	
६.	शिवस्य अपत्यं पुमान्	=	-------------------	(-------------)	
७.	धृतराष्ट्रस्य अपत्यं पुमान् (तान्)	=	-------------------	(-------------)	(गी.१.३६)
८.	पाण्डोः अपत्यं पुमान्	=	-------------------	(-------------)	(गी.१.१)

ग. यथोदाहरणं योजयत रिक्तस्थानानि पूरयत च -

यथा -	**राधा**		**कर्णः राधायाः अपत्यं पुमान् राधेयः (ढक्)**
१.	वसुदेवः	अभुमन्युः	------------------------------------
२.	कुन्ती	हिरण्याक्षः	------------------------------------
३.	विनता	सीता	------------------------------------
४.	अदितिः	हनुमान्	------------------------------------
५.	सुभद्रा	दुर्योधनः	------------------------------------
६.	धृतराष्ट्रः	**कृष्णः**	------------------------------------
७.	पर्वतः	सूर्यः	------------------------------------
८.	जनकः	गरुडः	------------------------------------
९.	अञ्जना	उमा	------------------------------------
१०.	दितिः	युधिष्ठिरः	------------------------------------

प्रातिपदिकम्	प्रत्ययः	रूपम्
कुल	खः	कुलीनः
क्षत्र	घः	क्षत्रियः
स्वसृ	छः	स्वस्रीयः
भ्रातृ	छः	भ्रात्रीयः
भ्रातृ	व्यत्	भ्रातृव्यः
मनु	अञ् + षुक्	मानुषः
मनु	षुक् + यत्	मनुष्यः

यथा - **मनुष्याणां** सहस्रेषु कश्चिद्यतति सिद्धये। (गी.७.३)

पितुः भ्राता	व्यत्	पितृव्यः
मातुः भ्राता	डुलच्	मातुलः

यथा- आचार्यान् **मातुलान्** भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा। (गी.१.२६)

मातुः पिता	डामहच्	मातामहः
पितुः पिता	डामहच्	पितामहः

यथा - तस्य संजनयन्हर्षं कुरुवृद्धः **पितामहः**। (गी.१.१२)

२. मतुबर्थः (तद् अस्य अस्मिन् वा अस्ति)

तद् अस्य अस्मिन् वा अस्ति इत्यर्थे केचन प्रत्ययाः उक्ताः सन्ति। तेषु मतुप्-प्रत्ययः आदिमः। अतः मतुबर्थः इति लिख्यते। मतुप्, इनि, ठन् इत्यादयः मतुबर्थप्रत्ययाः सन्ति। तेषु केचन अत्र निरूप्यन्ते -

- **मतुप्-प्रत्ययः -**

एतानि गीतावाक्यानि परिशीलयत -

१. व्यूढां द्रुपदपुत्रेण तव शिष्येण **धीमता**। (गी.१.३)
२. स **बुद्धिमान्** मनुष्येषु स युक्तः कृत्स्नकर्मकृत्। (गी.४.१८)
३. आदित्यानामहं विष्णुर्ज्योतिषां रविरं**शुमान्**। (गी.१०.२१)
४. यद्यद्वि**भूतिमत्**सत्त्वं श्रीमदूर्जितमेव वा। (गी.१०.४१)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि सर्वाणि मतुप्-प्रत्ययान्तानि पदानि।
विभूतिः अस्य अस्मिन् वा अस्ति - विभूति + मतुप् = विभूतिमत् (प्रातिपदिकम्) (गी.१०.४१)
विभूतिमत् इत्यस्य पुंलिङ्गे - **विभूतिमान्**, स्त्रीलिङ्गे **विभूतिमती**, नपुंसके विभूतिमत् इति सप्तसु विभक्तिषु त्रिषु

वचनेषु रूपाणि भवन्ति। अस्य पुंलिङ्गरूपाणि **भवत्**-शब्दवत् भवन्ति। स्त्रीलिङ्गस्य तु **नदी**-शब्दवत् नपुंसकस्य **जगत्**-शब्दवत् च रूपाणि भवन्ति।

१. बुद्धिः अस्य अस्मिन् वा अस्ति	=	बुद्धि + मतुप्	=	बुद्धिमान्	(गी.४.१८)
२. अंशवः अस्य अस्मिन् वा सन्ति	=	अंशु + मतुप्	=	अंशुमान्	(गी.१०.२१)
३. श्रीः अस्य अस्मिन् वा अस्ति	=	श्री + मतुप्	=	श्रीमान्	(गी.६.४१)
४. हेतुः एषाम् एषु वा अस्ति	=	हेतु + मतुप्	=	हेतुमन्तः	(गी.१३.४)
५. दीप्तिः अस्य अस्मिन् वा अस्ति	=	दीप्ति + मतुप्	=	दीप्तिमान्	(गी.११.१७)
६. धीः अस्य अस्मिन् वा अस्ति	=	धी + मतुप्	=	धीमान्	(गी.१.३)
७. श्रुतयः अस्य अस्मिन् वा सन्ति	=	श्रुति + मतुप्	=	श्रुतिमान्	(गी.१३.१३)
८. अनादिः अस्य अस्मिन् वा अस्ति	=	अनादि + मतुप्	=	अनादिमत्	(गी.१३.१२)

एतानि उदाहरणानि परिशीलयत -

यथा - १. धृष्टकेतुश्चेकितानः काशिराजश्च **वीर्यवान्**। (गी.१.५)

२. सिंहनादं विनद्योच्चैः शङ्खं दध्मौ **प्रतापवान्**। (गी.१.१२)

३. निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम **आत्मवान्**। (गी.२.४५)

४. **श्रद्धावान्** लभते ज्ञानं तत्परः संयतेन्द्रियः। (गी.४.३९)

एतेषु उदाहरणेषु स्थूलाक्षरैः मुद्रितानि पदानि परिशीलयत। एतानि अपि मतुप्प्रत्ययान्तानि एव तेषु मकारस्य स्थाने वकारो दृश्यते। यदि प्रातिपदिकम् अवर्णान्तम् आवर्णान्तं मवर्णान्तं वा भवति तर्हि मतुप्-प्रत्ययस्य मकारस्य वकारादेशः भवति।

वीर्यम् अस्य अस्मिन् वा अस्ति = वीर्य + मतुप् = वीर्यवान् (गी.१.५)

वीर्यवत् इत्येतस्य पुंलिङ्गे रूपम् - वीर्यवान्, स्त्रीलिङ्गे वीर्यवती, नपुंसके वीर्यवत् इति।

१. प्रतापः अस्य अस्मिन् वा अस्ति	=	प्रताप + मतुप्	= प्रतापवान्	(गी.१.१२)
२. आत्मा अस्य अस्मिन् वा अस्ति	=	आत्मन् + मतुप्	= आत्मवान्	(गी.२.४५)
३. ज्ञानम् अस्य अस्मिन् वा अस्ति	=	ज्ञान + मतुप्	= ज्ञानवान्	(गी.३.३३)
४. देहः एषाम् एषु वा अस्ति	=	देह + मतुप्	= देहवन्तः	(गी.१२.५)
५. अभिजनः अस्य अस्मिन् वा अस्ति	=	अभिजन + मतुप्	= अभिजनवान्	(गी.१६.१५)
६. बलम् अस्य अस्मिन् वा अस्ति	=	बल + मतुप्	= बलवान्	(गी.१६.१४)
७. श्रद्धा अस्य अस्मिन् वा अस्ति	=	श्रद्धा + मतुप्	= श्रद्धावान्	(गी.६.४७)
८. भगः अस्य अस्मिन् वा अस्ति	=	भग + मतुप्	= भगवान्	(गी.२.२)

- **इनिप्रत्ययः -**

एतानि वाक्यानि परिशीलयत -

१. काश्यश्च परमेष्वासः **शिखण्डी** च महारथः । (गी.१.१७)

२. स्वजनं हि कथं हत्वा **सुखिनः** स्याम माधव । (गी.१.३७)

३. तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि **देही** । (गी.२.२२)

४. ज्ञेयः स **नित्यसंन्यासी** यो न द्वेष्टि न काङ्क्षति । (गी.५.३)

५. स **संन्यासी** च **योगी** च न निरग्निर्न चाक्रियः । (गी.६.१)

६. विद्याविनयसम्पन्ने ब्राह्मणे गवि **हस्तिनि** । (गी.५.१८)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि इनिप्रत्ययस्य उदाहरणानि सन्ति ।

१. रागः अस्य अस्मिन् वा अस्ति इत्यर्थे = राग + इनि = रागिन् (प्रातिपदिकम्) = **रागी** (१८.२७) अस्य शब्दस्य पुंसि **रागी** इति स्त्रियां **रागिणी** इति नपुंसके **रागि** इति च रूपाणि भवन्ति ।

१. अहंवादः अस्य अस्मिन् वा अस्ति	=	अहंवाद + इनि	=	अहंवादी	(१८.२६)
२. देहः अस्य अस्मिन् वा अस्ति	=	देह + इनि	=	देही	(२.१३)
३. सुखम् अस्य अस्मिन् वा अस्ति	=	सुख + इनि	=	सुखी	(१६.१४)
४. शरीरम् अस्य अस्मिन् वा अस्ति	=	शरीर + इनि	=	शरीरी	(२.१८)
५. किरीटम् अस्य अस्मिन् वा अस्ति	=	किरीट + इनि	=	किरीटी	(११.३५)
६. दीर्घसूत्रम् अस्य अस्मिन् वा अस्ति	=	दीर्घसूत्र + इनि	=	दीर्घसूत्री	(१८.२८)
७. शिखण्डः (चूडा) अस्य अस्मिन् वा अस्ति	=	शिखण्ड + इनि	=	शिखण्डी	(१.१७)
८. विषादः अस्य अस्मिन् वा अस्ति	=	विषाद + इनि	=	विषादी	(१८.२८)
९. योगः अस्य अस्मिन् वा अस्ति	=	योग + इनि	=	योगी	(१५.११)
१०. मनीषा (बुद्धिः) एषाम् एषु वा अस्ति	=	मनीषा + इनि	=	मनीषिणः	(१८.३)
११. हस्तः (शुण्डा) अस्य अस्मिन् वा अस्ति	=	हस्त + इनि	=	हस्ती	(गी.५.१८)

- **ठन्प्रत्ययः-**

१. सत्त्वम् अस्य अस्मिन् वा अस्ति = सत्त्व + ठन् (इक्) (आदिवृद्धिः)
= सात्त्व + इक् = सात्त्विकः (गी.१८.२६)

- **अच्प्रत्ययः -**

१. रजः एषाम् एषु वा अस्ति इति = रजस् + अच् (आदिवृद्धिः)
= राजस् + अच् = राजसाः (गी.१४.१८)

२. तमः एषाम् एषु वा अस्ति इति = तमस् + अच् (आदिवृद्धिः)

= तामस् + अच् = तामसाः (गी.१४.१८)

३. पुण्यम् एषाम् एषु वा अस्ति इति = पुण्य + अच् = पुण्याः (गी.९.३३)

- **विनिप्रत्ययः -**

यशः, माया, मेधा, ऊर्ज, आमय, स्रग्, इत्यादिभ्यः, विनिः प्रत्ययः भवति।

१. मेधा अस्य अस्मिन् वा अस्ति = मेधस् + विनि = मेधावी (गी.१८.१०)

२. तपः एषाम् एषु वा अस्ति = तपस् + विनि = तपस्विनः (गी.७.९)

यथा - बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्। (गी.७.१०)

- **वप्रत्ययः -**

१. प्रशस्ताः केशाः अस्य अस्मिन् वा सन्ति = केश + व = केशवः (गी.१.३१)

२. गाण्डिः (ग्रन्थिः) अस्य अस्मिन् वा अस्ति = गाण्डि + व = गाण्डीवम् (गी.१.३०)

घ. यथोदाहरणं व्युत्पत्तिसहितं प्रातिपदिकस्य तद्धितप्रत्ययस्य च विभागं प्रदर्श्य तद्धितान्तानि पदानि लिखत -

यथा - तत्त्वार्थः अस्य अस्मिन् वा अस्ति = तत्त्वार्थ + मतुप् = तत्त्वार्थवत् (गी.१८.२२)

१. -------------------------------- = ------- + ------ = ज्ञानवताम् (गी.१०.३८)

२. -------------------------------- = ------- + ------ = दीप्तिमन्तम् (गी.११.१७)

३. -------------------------------- = ------- + ------ = श्रद्धावान् (गी.१८.७१)

४. -------------------------------- = ------- + ------ = हेतुमद्भिः (गी.१३.४)

५. -------------------------------- = ------- + ------- = अनादिमत् (गी.१३.१२)

६. -------------------------------- = ------- + ------- = बलवान् (गी.१६.१४)

७. -------------------------------- = ------- + ------- = भक्तिमान् (गी.१२.१९)

८. -------------------------------- = ------- + ------- = श्रुतिमत् (गी.१३.१३)

९. -------------------------------- = ------- + ------- = अन्तवत् (गी.७.२३)

१०. -------------------------------- = ------- + ------- = आद्यन्तवन्तः (गी.५.२२)

ङ. उपरि दत्तानां पदानाम् एकवचनान्तानि रूपाणि यथोदाहरणं लिखत -

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
तत्त्वार्थवान्	तत्त्वार्थवती	तत्त्वार्थवत्

च. यथोदाहरणं व्युत्पत्तिसहितानि रूपाणि लिखत -

यथा - भोगी **भोगः अस्य अस्मिन् वा अस्ति इति = भोग + इनि (गी.१६.१४)**

१. देही ------------------------------ = --------- + --------- (गी.५.१३)
२. त्यागी ------------------------------ = --------- + --------- (गी.१८.१०)
३. किरीटिनम् ------------------------------ = --------- + --------- (गी.११.१७)
४. शिखरिणाम् ------------------------------ = --------- + --------- (गी.१०.२३)
५. योगी ------------------------------ = --------- + --------- (गी.६.१०)
६. सुखिनः ------------------------------ = --------- + --------- (गी.१.३७)
७. वैरी ------------------------------ = --------- + --------- (गी.३.३९)
८. पक्षी ------------------------------ = --------- + --------- (गी.१०.३०)
९. चक्री ------------------------------ = --------- + --------- (गी.११.१७)
१०. गदी ------------------------------ = --------- + --------- (गी.११.४६)

छ. उपरि दत्तानां पदानां मतुप्-प्रत्ययान्तानि रूपाणि त्रिषु लिङ्गेषु रचयित्वा यथोदाहरणं तालिकायां लिखत -

यथा -	भोगी	भोगवान्	भोगवती	भोगवत्
१.				
२.				
३.				

४.				
५.				
६.				
७.				
८.				
९.				
१०.				

ज. यथोदाहरणं रूपाणि लिखत -

		इनि	मतुप्	
१.	**ज्ञानम् अस्य अस्मिन् वा अस्ति**	**ज्ञानी**	**ज्ञानवान्**	
२.	योगः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१५.११)
३.	भोगः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१७.१४)
४.	सुखम् अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१७.१४)
५.	बलम् अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१७.१४)
६.	विदाहः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१७.९)
७.	संन्यासः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१८.२)
८.	फलाकाङ्क्षा अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१८.३५)
९.	परित्यागः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१२.१७)
१०.	रागः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१८.२७)
११.	विषादः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१८.२८)
१२.	कर्म अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.६.४६)
१३.	अर्थः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.७.१६)
१४.	सुकृतम् अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.७.१६)
१५.	दुष्कृतम् अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.७.१५)
१६.	क्षेत्रम् अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१३.३३)
१७.	दम्भः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१३.७)
१८.	मानः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.१३.७)
१९.	संयमः अस्य अस्मिन् वा अस्ति	----------------	-----------------	(गी.२.६९)

३. **भावार्थः (तस्य भावः) -**

भावार्थे त्व, तल्, ष्यञ् इत्यादयः बहवः प्रत्ययाः सन्ति। तेषु कांश्चन प्रत्ययान् परिशीलयत -

- **त्वप्रत्ययः -**

एतानि वाक्यानि परिशीलयत -

समत्वं योग उच्यते। (गी.२.४८)

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते। (गी.१३.२०)

पुरुषः सुखदुःखानां **भोक्तृत्वे** हेतुरुच्यते। (गी.१३.२०)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि पदानि त्वप्रत्ययोपेतानि सन्ति।

	समस्य भावः	=	सम + त्व	=	समत्वम्	
१.	विविक्तदेशसेविनः भावः	=	विविक्तदेशसेविन् + त्व	=	विविक्तदेशसेवित्वम्	(गी.१३.१०)
२.	अमानिनः भावः	=	अमानिन् + त्व	=	अमानित्वम्	(गी.१३.७)
३.	पृथगित्यस्य भावः	=	पृथक् + त्व	=	पृथक्त्वम्	(गी.१८.२९)
४.	अदम्भिनः भावः	=	अदम्भिन् + त्व	=	अदम्भित्वम्	(गी.१३.७)
५.	अकृतबुद्धेः भावः	=	अकृतबुद्धि + त्व	=	अकृतबुद्धित्वम्	(गी.१८.१६)
६.	समचित्तस्य भावः	=	समचित्त + त्व	=	समचित्तत्वम्	(गी.१३.९)
७.	एकस्य भावः	=	एक + त्व	=	एकत्वेन	(गी.९.१५)
८.	नित्यस्य भावः	=	नित्य + त्व	=	नित्यत्वम्	(गी.१३.११)
९.	कर्तुः भावः	=	कर्तृ + त्व	=	कर्तृत्वम्	(गी.१३.२०)
१०.	भोक्तुः भावः	=	भोक्तृ + त्व	=	भोक्तृत्वम्	(गी.१३.२०)

- **तल्प्रत्ययः -**

यथा - समस्य भावः = सम + तल् = समता (गी.१०.५)

- **ष्यञ्प्रत्यय -**

यथा - दक्षस्य भावः = दक्ष + ष्यञ् = दाक्ष् + य = दाक्ष्यम् (गी.१८.४३)

१.	कृपण +ष्यञ्	=	कार्पण्यम्	(गी.२.७)
२.	शूर + ष्यञ्	=	शौर्यम्	(गी.१८.४३)
३.	वणिज् + ष्यञ्	=	वाणिज्यम्	(गी.१८.४४)
४.	निष्कर्म + ष्यञ्	=	नैष्कर्म्यम्	(गी.१८.४९)
५.	परुष + ष्यञ्	=	पारुष्यम्	(गी.१६.४)
६.	विराग + ष्यञ्	=	वैराग्यम्	(गी.१३.८)
७.	सम + ष्यञ्	=	साम्यम्	(गी.५.१९)

८.	भिक्षा + ष्यञ्	=	भैक्ष्यम्	(गी.२.५)
९.	निस्त्रिगुण + ष्यञ्	=	निस्त्रैगुण्यः	(गी.२.४५)
१०.	सूक्ष्म + ष्यञ्	=	सौक्ष्म्यम्	(गी.१३.३२)

- **अण्प्रत्ययः -**

१.	पुरुषस्य भावः	=	पुरुष + अण्	=	पौरुषम्	(गी.७.८)
२.	यूनः भावः	=	युवन् + अण्	=	यौवनम्	(गी.२.१३)
३.	चपलस्य भावः	=	चपल + अण्	=	चापलम्	(गी.१६.२)
४.	लघोः भावः	=	लघु + अण्	=	लाघवम्	(गी.२.३५)

- **यत्-प्रत्ययः**

१. राज्ञः भावः कर्म वा = राजन् + यत् = राज्यम् (गी.२.८)

- **इमनिच्-प्रत्ययः**

एतत् उदाहरणं परिशीलयत -

अजानता **महिमानं** तवेदं मया प्रमादात्प्रणयेन वापि। (गी.११.४१)

उपरितनवाक्ये स्थूलाक्षरैः मुद्रितं पदम् इमनिच्-प्रत्ययान्तम् अस्ति। पृथु-मृदु-प्रभृतीनां तथा वर्णवाचिनां च शब्दानां भावार्थे इमनिच्-प्रत्ययो भवति। इमनिच्प्रत्ययान्ताः शब्दाः नकारान्ताः पुंलिङ्गाः भवन्ति।

महतः भावः	महत् + इमनिच्	महिमा (महिमन्)
गुरोः भावः	गुरु + इमनिच्	गरिमा
पृथोः भावः	पृथु + इमनिच्	प्रथिमा
मृदोः भावः	मृदु + इमनिच्	म्रदिमा
कृष्णस्य भावः	कृष्ण + इमनिच्	कृष्णिमा

झ. यथोदाहरणं रिक्तस्थानानि पूरयत -

१.	धवलस्य भावः	धवल + इमनिच्	(धवलिमन्)	धवलिमा
२.	अणोः भावः	------- + ---------	------------------	--------------------
३.	गुरोः भावः	------- + ---------	------------------	--------------------
४.	शोणस्य भावः	------- + ---------	------------------	--------------------
५.	श्वेतस्य भावः	------- + ---------	------------------	--------------------
६.	कालस्य भावः	------- + ---------	------------------	--------------------
७.	लघोः भावः	------- + ---------	------------------	--------------------
८.	पीतस्य भावः	------- + ---------	------------------	--------------------

- **अञ्प्रत्ययः -**

१. कुमारस्य भावः = कुमार + अञ् = कौमारम् (गी.२.१३)

ञ. यथोदाहरणं भावार्थकानि तद्धितान्तानि रूपाणि लिखत -

			ष्यञ्	त्व	तल्	
यथा - क्लीबस्य भावः		**=**	**क्लैब्यम्**	**क्लीबत्वम्**	**क्लीबता**	**(गी.२.३)**
१.	परुषस्य भावः	=	-----------	-----------	--------------	(गी.१६.४)
२.	सूक्ष्मस्य भावः	=	-----------	-----------	--------------	(गी.१३.३२)
३.	समस्य भावः	=	-----------	-----------	--------------	(गी.२.४८)
४.	दक्षस्य भावः	=	-----------	-----------	--------------	(गी.१८.४३)
५.	त्रिगुणस्य भावः	=	-----------	-----------	--------------	(गी.२.४५)
६.	कृपणस्य भावः	=	-----------	-----------	--------------	(गी.२.७)
७.	विरागस्य भावः	=	-----------	-----------	--------------	(गी.१३.८)
८.	निष्कर्मणः भावः	=	-----------	-----------	--------------	(गी.३.४)
९.	स्थिरस्य भावः	=	-----------	-----------	--------------	(गी.१३.७)
१०.	प्रधानस्य भावः	=	-----------	-----------	--------------	(गी.१०.१९)

ट. मञ्जूषायां दत्तानि भावार्थकानि पदानि यथानिर्देशं वर्गीकुरुत -

लोलुपत्वम्, चापल्यम्, आस्तिक्यम्, समत्वम्, क्लैब्यम्, एकाग्रता, पारुष्यम्, अनादित्वम्, मनुष्यता, भोक्तृत्वम्, शौर्यम्, कातरता, मानित्वम्, कालुष्यम्, स्थैर्यम्, समता, अदम्भित्वम्, दृढता, समचित्तत्वम्, सहिष्णुता, औचित्यम्, मित्रता, अमृतत्वम्, गौरक्ष्यम्, ममता, सौम्यम्, एकता, पृथक्त्वम्, वैरुध्यम्, दीर्घसूत्रता, चञ्चलत्वम्

	त्व	तल्	ष्यञ्
१.	**लोलुपत्वम्**	**एकाग्रता**	**चापल्यम्**
२.	-------------	-----------------	--------------------
३.	-------------	-----------------	--------------------
४.	-------------	-----------------	--------------------
५.	-------------	-----------------	--------------------
६.	-------------	-----------------	--------------------
७.	-------------	-----------------	--------------------
८.	-------------	-----------------	--------------------
९.	-------------	-----------------	--------------------
१०.	-------------	-----------------	--------------------

तत्र भवः इत्यर्थे -

- **यञ्प्रत्ययः -**

१. बहिः भवः	=	बहि + यञ्	=	बाह्यः	(गी.५.२१)

- **अण्प्रत्ययः -**

१. सदा भवः	=	शश्वत् + अण्	=	शाश्वतः	(गी.२.२०)

- **ञ्यप्रत्ययः -**

१. पञ्चजने भवः	=	पञ्चजन + ञ्य	=	पाञ्चजन्यः	(गी.१.१५)

- **यत्-प्रत्ययः -**

१. दिवि भवः	=	दिव् + यत्	=	दिव्यम्	(गी.१.१४)

➢ **इदमर्थे -**

- **अण्प्रत्ययः -**

अवधेयम्

तव अयम्	युष्मद् + खञ्	तावकीनः	युष्मद् + छ	त्वदीयः
मम अयम्	अस्मद् + खञ्	मामकीनः	अस्मद् + छ	मदीयः

ठ. यथोदाहरणं त्रिषु लिङ्गेषु रूपाणि रचयत -

यथा - शरीरस्य अयम् शारीरः शरीरस्य इयं शारीरी शरीरस्य इदम् शारीरम्

१. असुरस्य अयम् -------------------- इयम् -------------------------- इदम् ---------

२. देवस्य अयं -------------------- इयं ---------------------------- इदं ---------

३. ईश्वरस्य अयम् -------------------- इयम् -------------------------- इदम् ---------

४. क्षत्राणाम् अयं -------------------- इयं ---------------------------- इदं ---------

५. मनुष्यस्य अयं मानुष्यः इयं मानुषी इदं मानुष्यम्

६. ऋषीणाम् अयम् -------------------- इयम् -------------------------- इदम् ---------

७. रक्षसाम् अयं -------------------- इयं ---------------------------- इदं ---------

८. सङ्ख्यायाः अयं -------------------- इयं ---------------------------- इदं ---------

९. ब्रह्मणः अयं -------------------- इयं ---------------------------- इदं ---------

१०. गन्धर्वस्य अयं -------------------- इयं ---------------------------- इदं ---------

- **कृत्वसुच्-प्रत्ययः**

इदं वाक्यं परिशीलयत -

१. नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते। (गी.११.३९)

वारम् इत्यर्थे संख्याशब्देभ्यः कृत्वसुच् प्रत्ययो भवति । पञ्चभ्यः आरभ्य एव कृत्वसुच् भवति । **द्वितः चतुःपर्यन्तानां तु सुच् प्रत्ययः भवति**। एकस्य सकृद् इत्यादेशो भवति।

पञ्चन् कृत्वसुच् पञ्चकृत्वः अष्टन् + कृत्वसुच् अष्टकृत्वः

द्वि + सुच् = द्विः, त्रि + सुच्= त्रिः, चतुर् + सुच् = चतुः

- **धा-प्रत्ययः**

क्रियाप्रकारार्थे वर्तमानात् संख्याशब्दात् स्वार्थे धा-प्रत्ययो भवति।

पञ्चन् + धा = पञ्चधा, अष्टन् + धा = अष्टधा, षड् + धा = षोढा

यथा - अहङ्कार इतीयं मे भिन्ना प्रकृतिर**ष्टधा**। (गी.७.४)

एकत्वेन पृथक्त्वेन **बहुधा** विश्वतोमुखम्। (गी.९.१५)

- **शस्-प्रत्ययः**

एतानि वाक्यानि परिशीलयत -

पश्य मे पार्थ रूपाणि **शतशोऽथ सहस्रशः**। (गी.११.५)

भवाप्ययौ हि भूतानां श्रुतौ **विस्तरशो** मम। (गी.११.२)

बहूनि बहुभ्यो ददाति इत्याद्यर्थे बह्वल्पशब्देभ्यः तत्पर्यायवाचिभ्यः तथा वीप्सार्थे संख्यैकवचनात् च शस् प्रत्ययः भवति।

बहूनि / बहुभ्यो ददाति	बहु + शस्	=	बहुशः
अल्पानि ददाति	अल्प + शस्	=	अल्पशः
शतं शतमिति	शत + शस्	=	शतशः
सहस्रं सहस्रमिति	सहस्र + शस्	=	सहस्रशः

निवेदनम् -

व्याकरणशास्त्रे तद्धितप्रकरणम् अत्यन्तं विस्तृतम् अस्ति। तद्धितप्रत्ययाः अपि बहवः सन्ति। तेषु गीतायाम् आगताः केचन प्रत्ययाः एव अत्र उदाहृताः सन्ति। रूपसाम्यमात्रं मनसि निधाय यस्य कस्यापि शब्दस्य यस्य कस्यचित् तद्धितप्रत्ययस्य योजनं न कर्तव्यम्। तेन दोषाः भवितुम् अर्हन्ति। अधिकज्ञानाय व्याकरणपुस्तकम् आश्रयणीयम्।

****

अन्वयरचना

काव्यानि गद्यात्मकानि पद्यात्मकानि गद्यपद्यात्मकानि वा भवन्ति । संस्कृतभाषायाम् अधिकानि काव्यानि पद्यात्मकानि सन्ति । तेषु पद्यानि यत्किञ्चित् वृत्तम् आश्रित्य लिखितानि भवन्ति । तत्र पदानि गद्ये इव क्रमबद्धानि न भवन्ति । कुत्रचित् गद्येऽपि तानि पदानि क्रमबद्धानि न भवन्ति । तत्र अर्थावबोधने क्लेशः भवति । एतादृशानां पद्यानां गद्यानां वा अर्थावबोधनाय कश्चन सरलः क्रमः आश्रीयते । अयं क्रमः एव 'अन्वयक्रमः' इति उच्यते । काव्येषु प्रयुक्तानि पदानि प्रायः सन्धिं कृत्वा लिखितानि भवन्ति । अन्वयक्रमस्य अवबोधनाय पूर्वं तेषां सन्धिविच्छेदः करणीयः भवति । अयम् एव सन्धिच्छेदः 'पदच्छेदः' इत्युच्यते । एषः अन्वयार्थम् आधारभूतः भवति । अतः आदौ श्लोकस्य पदार्थावबोधनाय पदच्छेदः करणीयः । ततः परं वाक्यार्थबोधनाय श्लोकार्थबोधनाय च अन्वयस्य आवश्यकता भवति । अधुना प्रथमतया वयं पदच्छेदार्थम् अपेक्षितान् बिन्दून् पश्यामः -

पदच्छेदः

अवधानबिन्दवः -

- प्रथमं वाक्यस्थानां सन्धियुक्तपदानां परिचयज्ञानम् आवश्यकम् ।
- पुनः वाक्यस्थेषु पदेषु कः सन्धिः ? इति निश्चयः कर्तव्यः ।
- ततः सन्धियुक्तपदानां सन्धिच्छेदः करणीयः ।
- पदच्छेदः अन्वयरचनायै आधारभूतः भवति ।

❖ अधुना गद्यवाक्येषु पदच्छेदं पश्यामः ।

गद्यांशः	-	**महाकवेर्बाणस्य जनिकालविषये वंशादिविषये च न काचन विप्रतिपत्तिः ।**
पदच्छेदः	-	महाकवेः बाणस्य जनिकालविषये वंशादिविषये च न काचन विप्रतिपत्तिः ।
गद्यांशः	-	**हर्षचरिते कवेर्वर्णनचातुरी बहुशोऽवलोक्यते ।**
पदच्छेदः	-	हर्षचरिते कवेः वर्णनचातुरी बहुशः अवलोक्यते ।
गद्यांशः	-	**भारतीयसंस्कृतेर्विवृतिविचारे बहवोऽनुयोगाः समापतन्ति चेतसि ।**
पदच्छेदः	-	भारतीयसंस्कृतेः विवृतिविचारे बहवः अनुयोगाः समापतन्ति चेतसि ।

❖ सम्प्रति श्लोकेषु पदच्छेदं पश्यामः ।

श्लोकः - **नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।**
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥गी.२.२३॥

पदच्छेदः - न, एनम्, छिन्दन्ति, शस्त्राणि, न, एनम्, दहति, पावकः ।
न, च, एनम्, क्लेदयन्ति, आपः, न, शोषयति, मारुतः ॥

श्लोकः - **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥गी.२.४७॥

पदच्छेदः - कर्मणि, एव, अधिकारः, ते, मा, फलेषु, कदाचन।
मा, कर्मफलहेतुः, भूः, मा, ते, सङ्गः, अस्तु, अकर्मणि ॥

अभ्यासः

(क) अधः प्रदत्तानां गद्यवाक्यानां पदच्छेदं कृत्वा यथोदाहरणं रिक्तस्थानेषु लिखत -

यथा - सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः, पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।
सर्वोपनिषदः गावः दोग्धा गोपालनन्दनः पार्थः वत्सः सुधीः भोक्ता दुग्धं गीतामृतं महत्।

१. गीतेयं न केवलं प्रस्तवीति सर्वासामप्युपनिषदां सारभागम्, अपि तु श्रुतिसारमपि प्रस्तौतितराम्।

--- ।

२. सांख्ययोगदर्शनयोर्सिद्धान्तानां वैशद्येन विवेचनात् प्रतिपादनाच्च दर्शनसार-संग्रहोऽप्यत्रोपलभ्यते।

-------------- ।

३. गीतायां ये भावाः सिद्धान्ताश्च प्रतिपाद्यन्ते, ते क्वचित् समासतः क्वचिच्च विस्तरशः उपनिषत्सु वेदेषु च समुपलभ्यन्ते।

-------------- ।

४. गीतायां विषयक्रमेण हृद्येन भावाभिव्यञ्जनप्रकारेण साधिष्ठया विवृत्या च ते भावाः समासाद्यन्त इति प्रमुखं गीतायाः महत्त्वम्।

------------------ ।

५. विहायासक्तिं फलप्रेप्सामनास्थाय कर्मणि प्रवर्तितव्यम्।

--- ।

६. निष्कामकर्मकरणेन चेतः प्रसीदति, धीर्विकसति, मानसमानन्दमनुभवति, न कर्माणि बध्नन्ति मानवम्, न विषयाः विमोहयन्ति मानसम्, न पतति जीवः स्वलक्ष्यात्, न च मोहो मनो मोहयति।

-- ।

७. न कर्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते।

-- ।

८. जगत्यस्मिन् जीवः कर्म कुर्वन्नेव जीवितुमभिलष्येत् । एवं मानवस्य लक्ष्यनाशो न भवति, न च स कर्मभिर्बध्यते।

-- ।

९. आत्मनोऽजरत्वममरत्वमनादित्वादिकं च महता विस्तरेण गीतायां सम्प्राप्यते।

-- ।

१०. विशदीभवत्येतस्माद्यद् गीतेयं सर्वासामुपनिषदां समेषां दर्शनानां श्रुतीनां च सारं सरलतया सरण्या प्रस्तवीतीति।

----------------------------------- ।

ख. अधः प्रदत्तानां गीताश्लोकानां यथोदाहरणं पदच्छेदं कुरुत -

यथा - धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १.१ ॥

पदच्छेदः - धर्मक्षेत्रे, कुरुक्षेत्रे, समवेताः, युयुत्सवः ।
मामाकाः, पाण्डवाः, च, एव, किम्, अकुर्वत, सञ्जय ॥

१. एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ १.४७ ॥

-- ।

-- ॥

२. एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ २.७२ ॥

-- ।

-- ॥

३. एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ३.४३ ॥

-- ।

-- ॥

४. तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४.४२ ॥

-- ।

-- ॥

५. भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ ५.२९ ॥

-- ।

-- ॥

६. योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ६.४७ ॥

-- ।

-- ॥

७. साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ७.३० ॥

-- ।

-- ॥

८. वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ ८.२८ ॥

-- ।

-- ॥

९. मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ९.३४ ॥

-- ।

-- ॥

१०. अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ १०.४२ ॥

-- ।

-- ॥

११. मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ११.५५ ॥

-- ।

-- ॥

१२. ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ १२.२० ॥

-- ।

-- ॥

१३. क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ १३.३४ ॥

-- ।

-- ॥

१४. ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ १४.२७ ॥

-- ।

-- ॥

१५. इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ १५.२० ॥

-- ।

-- ॥

१६. तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ १६.२४ ॥

-- ।

-- ॥

१७. अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ १७.२८ ॥

-- ।

-- ॥

१८. यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १८.७८ ॥

-- ।

-- ॥

अन्वयः

अवधातव्याः बिन्दवः -

- प्रथमं वाक्यस्थानि सन्धियुक्तानि पदानि सन्धिच्छेदं कृत्वा लेखितव्यानि ।
- पुनः वाक्ये क्रियापदं किम् इति ज्ञातव्यम् ।
- ततः कर्तृपदं कर्मपदं च किम् इति ज्ञातव्यम् ।
- कर्तृपदज्ञानाय क्रियापदम् उद्दिश्य कः ? / का ? / किम् ? (प्रथमाविभक्तौ) इति प्रश्नः कर्तव्यः ।
- कर्मपदज्ञानाय क्रियापदम् उद्दिश्य कं ? / कां / किम् ? (द्वितीयाविभक्तौ) इति प्रश्नः कर्तव्यः ।

श्लोके यदि 'न' इति अव्ययं प्रयुक्तम् अस्ति तर्हि अन्वयवेलायां तत् क्रियापदेन सह योजनीयम् ।

अन्ततः मातृभाषावत् पूर्वं कर्तृपदं, ततः कर्मपदं, पुनः क्रियापदं च इति क्रमेण पदानि योजनीयानि । एवं वाक्यस्य तात्पर्यं स्वरूपं च बुद्धौ आगच्छतः ।

यथा - नैनं दहति पावकः । (२.३)

न एनं दहति पावकः । (इति पदविभागः)

न दहति । (क्रियापदम्)

- कः न दहति ? पावकः न दहति । (अत्र पावकः कर्तृपदम्)
- कं न दहति ? एनं (आत्मानम्) न दहति । (अत्र एनं (आत्मानम्) कर्मपदम्)

पावकः एनं (आत्मानम्) न दहति । अत्र कर्तृपदं, कर्मपदं क्रियापदं च क्रमेण सन्ति । अधुना वाक्यस्यार्थः अस्ति - पावकः अपि एनम् आत्मानं न दहति इति ।

❖ अनेन क्रमेण अन्वयरचनालेखने शब्दानाम् अन्त-लिङ्ग-विभक्ति-वचनानां ज्ञानम् अपेक्षितम् ।

अन्वयः

➔ अधुना गद्यवाक्येषु अन्वयं परिशीलयामः -

❖ अस्ति भागीरथीतीरे पाटलिपुत्रं नाम सुप्रसिद्धं नगरम् ।

क्रियापदम् - अस्ति ।

➢ किम् अस्ति ?

नगरम् अस्ति ।

➢ किं नाम नगरम् अस्ति ?

पाटलिपुत्रं नाम नगरम् अस्ति।

➢ पाटलिपुत्रं नाम कीदृशं नगरम् अस्ति ?

पाटलिपुत्रं नाम सुप्रसिद्धं नगरम् अस्ति।

➢ पाटलिपुत्रं नाम सुप्रसिद्धं नगरं कुत्र अस्ति ?

पाटलिपुत्रं नाम सुप्रसिद्धं नगरं भागीरथीतीरे अस्ति।

अन्वयः - भागीरथीतीरे पाटलिपुत्रं नाम सुप्रसिद्धं नगरम् अस्ति।

अनेन अन्वयक्रमेण मातृभाषावत् गद्यात्मकवाक्यस्य सम्यक् अर्थबोधः भवति।

❖ **आसीत्पुरा गोदावर्यास्तटे अश्वत्थो नाम महाद्रुमः।**

पदविभागः - आसीत् गोदावर्याः तटे अश्वत्थः नाम महाद्रुमः।

क्रियापदम् - आसीत्।

➢ कः आसीत् ?

महाद्रुमः आसीत्।

➢ किं नाम महाद्रुमः आसीत् ?

अश्वत्थः नाम महाद्रुमः आसीत्।

➢ अश्वत्थः नाम महाद्रुमः कुत्र आसीत् ?

अश्वत्थः नाम महाद्रुमः तटे आसीत्।

➢ अश्वत्थः नाम महाद्रुमः कस्याः तटे आसीत् ?

अश्वत्थः नाम महाद्रुमः गोदावर्याः तटे आसीत्।

➢ कदा अश्वत्थः नाम महाद्रुमः गोदावर्याः तटे आसीत् ?

पुरा अश्वत्थः नाम महाद्रुमः गोदावर्याः तटे आसीत्।

अन्वयः - पुरा गोदावर्याः तटे अश्वत्थः नाम महाद्रुमः आसीत्।

❖ **अस्म्यहमेतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीः।**

पदविभागः - अस्मि अहम् एतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीः।

क्रियापदम् - अस्मि।

➢ अहं का अस्मि ?

अहं राजलक्ष्मीः अस्मि ?

➢ अहं कस्य राजलक्ष्मीः अस्मि ?
अहं शूद्रकस्य राजलक्ष्मीः अस्मि ।

➢ अहं कीदृशस्य शूद्रकस्य राजलक्ष्मीः अस्मि ?
अहं भूपालस्य शूद्रकस्य राजलक्ष्मीः अस्मि ।

➢ अहं पुनः कस्य भूपालस्य शूद्रकस्य राजलक्ष्मीः अस्मि ?
अहम् एतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीः अस्मि ।

अन्वयः - अहम् एतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीः अस्मि ।

इदानीम् उपर्युक्तानाम् उदाहरणानां परिशीलनेन वयं ज्ञातवन्तः यत् अन्वयरचनायाः कृते कीदृशाः प्रश्नाः कर्तव्याः इति । अन्ये केचित् आवश्यकाः अंशाः अत्र निर्दिष्टाः सन्ति -

- कर्तृपदं कर्मपदं वा उद्दिश्य 'कीदृशः' इति प्रश्नः क्रियते चेत् विशेषणपदस्य ज्ञानं प्राप्यते । यथा - कीदृशं नगरम् ? - सुप्रसिद्धम् ।
- सप्तमीविभक्तिपदानां ज्ञानाय 'कुत्र' इति प्रश्नः कर्तव्यः ।
  यथा - महाद्रुमः कुत्र आसीत् ? - तटे ।
- कालसूचकपदानां ज्ञानाय 'कदा' इति प्रश्नः करणीयः ।
  यथा - कदा गोदावर्याः तटे अश्वत्थः नाम महाद्रुमः आसीत् ? - पुरा ।
- सङ्ख्यासूचकपदानां ज्ञानाय 'कति' इति प्रश्नः करणीयः ।
  यथा - वृक्षे विंशतिः काकाः सन्ति ।
- वृक्षे कति काकाः सन्ति ? - विंशतिः ।

ग. अधः लिखितानां वाक्यानां पदविभागं कृत्वा यथोदाहरणम् अन्वयक्रमेण लिखत -

यथा - कस्य न विदितं विपश्चितो भगवद्गीतायाः गुणगौरवम् !
भगवद्गीतायाः गुणगौरवं कस्य विपश्चितः न विदितम् !

१. गीतेयं न केवलं प्रस्तवीति सर्वासामप्युपनिषदां सारभागम् अपितु श्रुतिसारमपि प्रस्तौतितराम् ।

-- ।

२. सिद्धान्ताश्च ये प्रतिपादिताः गीतायां ते समुपलभ्यन्ते क्वचित् समासतः क्वचिद् विस्तरशः वेदेषु उपनिषत्सु च ।

-- ।

३. अत्र निर्दिश्यन्ते दिङ्मात्रं निष्कामकर्मयोगप्रतिपादकाः केचन श्लोकाः ।

-- ।

४. समासाद्यते निष्कामकर्मयोगस्य वर्णनं मूलरूपेण यजुर्वेदे चत्वारिंशत्तमे अध्याये ईशोपनिषदि च ।

-- ।

५. यज्ञस्य महत्त्वम् आवश्यकता च निरूप्यते गीतायाम् ।

-- ।

६. हि वो देवाः दास्यन्ते इष्टान् भोगान् यज्ञभाविताः ।

-- ।

७. अजो नित्यः शाश्वतो अयं पुराणो न हन्यते हन्यमाने शरीरे ।

-- ।

८. कठोपनिषदि निरीक्ष्यते विस्तरशो विभोर्विभूतिवर्णनम् ।

-- ।

९. यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् ।

-- ।

१०. किम् अकुर्वत मम पुत्राः पाण्डुपुत्राः च ।

-- ।

➔ अधुना श्लोकेषु (पद्यांशेषु) अन्वयं पश्यामः ।

अधुना वयं पद्यानाम् अन्वयरचनां जानीम । कस्यापि पद्यस्य सम्यक् अर्थावबोधनाय चत्वारः अंशाः ज्ञातव्याः भवन्ति - **पदविभागः, अन्वयः, अन्वयार्थः तात्पर्यार्थः** च इति । पदविभागः अन्वयः चेति द्वयोः परिचयः अस्माभिः प्राप्तः । पदविभागस्य अन्वयक्रमेण लेखनात् परं प्रत्येकं शब्दस्य अर्थः चिन्तनीयः । अयमेव अंशः अन्वयार्थः इत्युच्यते । अन्वयार्थज्ञानेन पद्यस्य भावं वयं पूर्णरूपेण ज्ञातुं शक्नुमः । अयमेव तात्पर्यार्थः इति उच्यते ।

अन्वयार्थे पूर्वं पद्ये क्रियापदं ज्ञातव्यम् इति अस्माभिः पूर्वमेव ज्ञातम् । केषुचित् पद्येषु द्वित्राणि क्रियापदानि भवितुमर्हन्ति । तेषु एकं क्रियापदं प्रधानम्, अन्यानि अप्रधानानि च भवितुमर्हन्ति । तत्र अन्वयक्रमे प्रधानक्रियापदं किम् इति चिन्तनीयम् । तत्र अप्रधानक्रियापदानि प्रधानक्रियापदस्य अङ्गभूतानि भवन्ति । तत्रापि तेषां कर्तृकर्मादिकं भवितुमर्हति । सर्वेषां मेलनेन एकमेव मुख्यं वाक्यं सिद्धं भवति ।

पद्ये विद्यमानानि पदानि विभक्तिशः योजनीयानि । समानविभक्त्यन्तेषु पदेषु एकं पदं विशेष्यम्, अन्यानि तस्य विशेषणानि च भवन्ति ।

यदि अस्माभिः क्रियापदम् उद्दिश्य **केन / कया** इति प्रश्नः क्रियते तर्हि **तृतीयाविभक्त्यन्तं** पदं, **कस्मै / कस्यै** इति प्रश्नः क्रियते तर्हि **चतुर्थीविभक्त्यन्तं** पदं, **कस्मात् / कस्याः** इति प्रश्नः क्रियते तर्हि **पञ्चमीविभक्त्यन्तं** पदं, **कस्य / कस्याः** इति प्रश्नः क्रियते तर्हि **षष्ठीविभक्त्यन्तं** पदं च अवगन्तुं शक्यते।

क्रियापदम् उद्दिश्य यदि **किं कृत्वा** इति प्रश्नः क्रियते तर्हि **क्त्वान्तं / ल्यबन्तं** पदं, **किं कर्तुम्** इति प्रश्नः क्रियते तर्हि **तुमुन्नन्तं** पदं च अवगन्तुं शक्यते।

पद्ये यदि **सम्बोधनपदं** भवेत् तर्हि तत् पदम् अन्वयक्रमे आदौ एव लेखनीयम्।

पद्ये यदि **क्रियापदम्** एव न **निर्दिष्टं** तर्हि **'अस्ति'** इत्यस्य **'भवति'** इत्यस्य वा क्रियापदस्य अध्याहारः करणीयः।

उपर्युक्तान् अंशान् परिशील्य अधोलिखितस्य पद्यस्य अन्वयरचनां कुर्मः -

गीता सुगीता कर्तव्या किम् अन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥

पदविभागः - गीता, सुगीता, कर्तव्या, किम्, अन्यैः, शास्त्रविस्तरैः, या स्वयं पद्मनाभस्य मुखपद्मात् विनिः-सृता।

- क्रियाबोधकपदानि - कर्तव्या, विनिःसृता च।
- प्रथमाविभक्त्यन्तपदानि - गीता, सुगीता, कर्तव्या, या।
- तृतीयाविभक्त्यन्तपदम् - अन्यैः, शास्त्रविस्तरैः।
- पञ्चमीविभक्त्यन्तपदम् - मुखपद्मात्।
- षष्ठीविभक्त्यन्तपदम् - पद्मनाभस्य।
- अव्ययपदानि - किम्, स्वयम्।

अन्वयरचना - अन्यैः शास्त्रविस्तरैः किम्? गीता सुगीता कर्तव्या। या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता।

क्रियाबोधकपदम् - कर्तव्या।

➢ **का** कर्तव्या?
गीता कर्तव्या।

➢ गीता **कीदृशी** कर्तव्या?
गीता **सुगीता** कर्तव्या।

➢ गीता सुगीता कर्तव्या **कैः** किम्?
गीता सुगीता कर्तव्या **अन्यैः शास्त्रविस्तरैः** किम्।
क्रियाबोधकं पदम् - विनिःसृता।

➢ **का** विनिःसृता?
या (गीता) विनिःसृता।

➢ या **कस्मात्** विनिःसृता ?

या **मुखपद्मात्** विनिःसृता।

➢ या **कस्य** मुखपद्मात् विनिःसृता ?

या **पद्मनाभस्य** मुखपद्मात् विनिःसृता।

➢ या **कथं** पद्मनाभस्य मुखपद्मात् विनिःसृता ?

या **स्वयं** पद्मनाभस्य मुखपद्मात् विनिःसृता।

तात्पर्यम् - गीतायाः सम्यक्प्रकारेण पठनं कृत्वा, तस्याः भावार्थेन सहितायाः अन्तःकरणे धारणम् अस्माकं मुख्यं कर्तव्यं वर्तते। इयं स्वयं श्रीपद्मनाभस्य भगवतः विष्णोः मुखात् निर्गता वर्तते।

घ. उपर्युक्तक्रमेण अधोलिखितस्य पद्यस्य अन्वयरचनां कुरुत -

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥

• अधुना दीर्घपद्यानाम् अपि अन्वयरचनां तथैव कुर्मः -

उदाहरणद्वयं परिशीलयत -

प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम्॥ ८.१०॥

पदविभागः - प्रयाणकाले, मनसा, अचलेन, भक्त्या, युक्तः, योगबलेन, च, एव, भ्रुवोः, मध्ये, प्राणम्, आवेश्य, सम्यक्, सः, तम्, परम्, पुरुषम्, उपैति, दिव्यम्।

- क्रियापदम् - उपैति।
- प्रथमाविभक्त्यन्तं पदम् - सः।
- द्वितीयाविभक्त्यन्तानि पदानि - प्राणम्, तम्, परम्, पुरुषम्,दिव्यम्।
- तृतीयाविभक्त्यन्तानि पदानि - मनसा, अचलेन, भक्त्या, योगबलेन,
- षष्ठीविभक्त्यन्तं पदम् - भ्रुवोः।
- सप्तमीविभक्त्यन्ते पदे - प्रयाणकाले, मध्ये।

- अव्ययानि पदानि - च, एव, सम्यक्, आवेश्य।
- क्तान्तं पदम् - युक्तः।
- क्रियापदम् - उपैति।

अन्वयः - सः भक्त्या युक्तः प्रयाणकाले योगबलेन एव भ्रुवोः मध्ये प्राणं च सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।

आकाङ्क्षा -

- **कः** उपैति ?
  सः उपैति।
- सः **कम्** उपैति ?
  सः **पुरुषम्** उपैति।
- सः **कम्** पुरुषम् उपैति ?
  सः **तं** पुरुषम् उपैति।
- सः तं **कीदृशं** पुरुषम् उपैति ?
  सः तं **परं** पुरुषम् उपैति।
- सः पुनः तं **कीदृशं** परं पुरुषम् उपैति ?
  सः तं **दिव्यं** परं पुरुषम् उपैति।
- सः **केन** तं दिव्यं परं पुरुषम् उपैति ?
  सः **मनसा** तं दिव्यं परं पुरुषम् उपैति।
- सः **कीदृशेन** मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **अचलेन** मनसा तं दिव्यं परं पुरुषम् उपैति।
- सः **किं कृत्वा** अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **आवेश्य** अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति।
- सः **कम्** आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **प्राणम्** आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति।
- सः **कथं** प्राणम् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **सम्यक्** प्राणम् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति।
- सः **कुत्र** प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **मध्ये** प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति।
- सः **कयोः** मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **भ्रुवोः** मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति।

➢ सः पुनः **केन** एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **योगबलेन** एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ।

➢ सः **कदा** योगबलेन एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **प्रयाणकाले** योगबलेन एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ।

➢ सः **कथम्भूतः** प्रयाणकाले योगबलेन एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **युक्तः** प्रयाणकाले योगबलेन एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ।

➢ सः **कया युक्तः** प्रयाणकाले योगबलेन एव भ्रुवोः मध्ये प्राणं च सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ?
  सः **भक्त्या युक्तः** प्रयाणकाले योगबलेन एव भ्रुवोः मध्ये प्राणं च सम्यक् आवेश्य अचलेन मनसा तं दिव्यं परं पुरुषम् उपैति ।

तात्पर्यम् - सः अनन्यभावेन सहितः भक्त्या युक्तः योगी जनः मरणसमये समाधिबलेन भ्रुवोः मध्ये प्राणवायुं सम्यक् स्थापयित्वा निश्चलेन चित्तेन परमं पुरुषं स्मरन् लोकोत्तरम् उत्तमं तमेव पुरुषं प्राप्नोति । परमात्मभावं प्राप्नोति ।

- **अन्वयरचनायाम् अन्येऽपि केचन अंशाः ध्यातव्याः सन्ति -**

✓ पद्ये यदि तदा, तु, एव, हि, अपि, च - इत्यादीनि अव्ययपदानि भवन्ति तर्हि अर्थानुगुणं तानि अन्यशब्दैः सह योजनीयानि ।

✓ पद्ये यदि क्तप्रत्ययान्तरूपं भवति तर्हि तदुद्दिश्य प्रश्नकरणे 'कथम्भूतः' इति शब्दस्य प्रयोगः कर्तव्यः ।

✓ पद्ये यदि शतृप्रत्ययान्तरूपं भवति तर्हि तेन सह किं शब्दस्य प्रयोगेण प्रश्नः करणीयः । यथा -

- स्मरन्मुक्त्वा कलेवरम् । किं कुर्वन् ?

उदाहरणम् - २

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ (८.५)

पदविभागः - अन्तकाले, च, माम्, एव, स्मरन्, मुक्त्वा, कलेवरम्, यः, प्रयाति, सः, मद्भावम्, याति, न, अस्ति, अत्र, संशयः ।

- क्रियापदानि - प्रयाति, याति, अस्ति ।
- प्रथमाविभक्त्यन्तानि पदानि - संशयः, यः, सः ।
- द्वितीयाविभक्त्यन्तानि पदानि - कलेवरम्, मद्भावम्, माम् ।

- सप्तमीविभक्त्यन्तं पदम् - अन्तकाले।
- अव्ययानि - च, न, एव, मुक्त्वा, अत्र।
- शतृप्रत्ययान्तं पदम् - स्मरन्।

अन्वयः - यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः (पुरुषः) मद्भावं याति। अत्र न संशयः।

- प्रयाति।
  - **कः** प्रयाति ?
    यः प्रयाति।
  - यः **कदा** प्रयाति ?
    यः **अन्तकाले** प्रयाति।
  - यः अन्तकाले **किं** कुर्वन् प्रयाति ?
    यः अन्तकाले **स्मरन्** प्रयाति।
  - यः अन्तकाले **कं** स्मरन् प्रयाति ?
    यः अन्तकाले **मां** स्मरन् प्रयाति।
  - पुनः यः अन्तकाले मां स्मरन् **किं कृत्वा** प्रयाति ?
    यः अन्तकाले मां स्मरन् **मुक्त्वा** प्रयाति।
  - पुनः यः अन्तकाले मां स्मरन् **किं** मुक्त्वा प्रयाति ?
    यः अन्तकाले मां स्मरन् **कलेवरं** मुक्त्वा प्रयाति।
  - यः अन्तकाले मां स्मरन् कलेवरं मुक्त्वा प्रयाति सः **कुत्र** याति ?
    यः अन्तकाले मां स्मरन् कलेवरं मुक्त्वा प्रयाति सः **मद्भावं** याति।
- न अस्ति।
  - **कः** न अस्ति ?
    संशयः न अस्ति।
  - **कुत्र** संशयः न अस्ति ?
    अत्र संशयः न अस्ति।

तात्पर्यम् - यः पुरुषः अन्तकाले (प्रयाणसमये) माम् एव (ईश्वरम् एव) स्मरन् कलेवरं (शरीरम्) परित्यजति सः पुरुषः अवश्यं मम सान्निध्यं प्राप्नोति। अस्मिन् विषये संशयः एव नास्ति।

- **अन्वयरचनायाम् इतोऽपि ध्यातव्याः अन्ये अंशाः -**

- 'यावत् - तावत्, यत्र - तत्र, यत् - तत्, यदा - तदा, यदि - तर्हि' इत्यादीनि नित्यसम्बन्धीनि पदानि। तेषां प्रयोगेण द्वयोः वाक्ययोः एकवाक्यत्वेन योजनं क्रियते।

यथा -

❖ **यत्र** नार्यस्तु पूज्यन्ते रमन्ते **तत्र** देवताः ।

एवमेव प्रतिपदम् उद्दिश्य प्रश्नं कृत्वा उत्तरं प्राप्नुवन्तः वयम् अन्वयरचनां कुर्मः । अन्वयरचनायाः इयं पद्धतिः 'आकाङ्क्षापद्धतिः' इत्युच्यते ।

ङ. अधः प्रदत्तानां गीताश्लोकानां रिक्तस्थानेषु यथोदाहरणम् अन्वयं लिखत -

यथा - स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ २.५४ ॥

अन्वयः - केशव ! समाधिस्थस्य स्थितप्रज्ञस्य का भाषा ? स्थितधीः किं प्रभाषेत ? किम् आसीत ? किं व्रजेत ?

१. प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ २.५५ ॥

अन्वयः - --

--।

२. दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ २.५६ ॥

अन्वयः - --

--।

३. यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ २.५७ ॥

अन्वयः - --

--।

४. यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ २.५८ ॥

अन्वयः - --

--।

५. विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ २.५९ ॥

अन्वयः - --

--।

६. यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ २.६० ॥

अन्वयः - --

-- ।

७. तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ २.६१ ॥

अन्वयः - --

-- ।

८. ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥ २.६२ ॥

अन्वयः - --

-- ।

९. क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ २.६३ ॥

अन्वयः - --

-- ।

१०. रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ २.६४ ॥

अन्वयः - --

-- ।

११. प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ २.६५ ॥

अन्वयः - --

-- ।

१२. नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ २.६६ ॥

अन्वयः - --

-- ।

१३. इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ २.६७ ॥

अन्वयः - --

-- ।

१४. तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ २.६८ ॥

अन्वयः - --

-- ।

१५. या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ २.६९ ॥

अन्वयः - --

-- ।

१६. आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ २.७०

अन्वयः - --

-- ।

१७. विहाय कामान्यः सर्वान्पुमांश्चलति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ २.७१ ॥

अन्वयः - --

-- ।

१८. एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ २.७२ ॥

अन्वयः - --

-- ।

****

उत्तराणि

पाठः - १

क. १. आदेशः २. आदेशः ३. लोपः ४. आदेशः ५. आगमः ६. लोपः ७. आदेशः ८. प्रकृतिभावः ९. प्रकृतिभावः १०. प्रकृतिभावः ११. प्रकृतिभावः।

ख. १. वाक्यम् इदम् आह २. योत्स्यमानान् अवेक्षे ३. समवेतान् कुरून् इति ४. एतान् न हन्तुम् इच्छामि ५. धार्तराष्ट्रान् नः ६. ज्ञेयम् अस्माभिः ७. स्वजनम् उद्यताः ८. माम् अप्रतीकारम् अशस्त्रम् ९. एवम् उक्त्वा १०. शान्तिम् अचिरेण।

ग. १. द्वापरयुगस्यान्ते व्यासमहर्षेः जन्म अभवत्। २. व्यासमहर्षिः प्रातःकाले सरस्वत्याः तटे स्थित्वा ध्यानमग्नः आसीत्। ३. व्यासमहर्षिः दिव्यदृष्ट्या 'धर्मस्य ह्रासो जायमानोऽस्ति' इति अवलोकितवान्। व्यासः वेदान् चतुर्धा विभक्तवान्। ते च - ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः इति। ५. पुराणेषु अष्टलक्षश्लोकाः सन्ति। ६. एतानि पुराणानि पठित्वा लोकाः वेदानुशासनं ज्ञात्वा आत्मश्रेयसे यतेरन् इति।

पाठः - २

क. २. तर्ह्यर्जुनेन = तर्हि + अर्जुनेन (ह् + इ + अ = य) ३. तथैव = तथा + एव (थ् + आ + ए = ऐ) ४. सर्वापि = सर्व + अपि (व् + अ + अपि = आ) ५. अद्यैव = अद्य + एव (अ + ए = ऐ) ६. सन्यास्यागतः = सन्यासी + आगतः (स् + ई + आ = या) ७. महात्मास्ति = महात्मा + अस्ति (म् + आ + अस्ति = आ) ८. प्रस्तुताभवत् = प्रसृता + अभवत् (त् + आ + अ = आ) ९. सर्वेऽपि = सर्वे + अपि (व् + ए + अपि = एऽ) १०. ततत्रोपस्थिता = तत्र + उपस्थिता (र् + अ + उ = ओ)

ख. १. एतान्यपि २. द्वेष्ट्यकुशलम् ३. भवत्यत्यागिनाम् ४. त्विदानीम् ५. चाप्यपलायनम् ६. लघ्वाशी ७. मद्भक्तेष्वभिधास्यति ८. पित्रोजः ९. कर्त्रौत्सुक्यम् १०. तिष्ठत्यकर्मकृत् ११. तेष्ववस्थितः।

ग. १. भजामि + अहम् २. प्रवदन्ति + अविपश्चितः ३. परि + अवतिष्ठते ४. तु + इन्द्रियाणि ५. पचन्ति + आत्मकारणात् ६. विद्धि + एनम् ७. आत्मनि + एव ८. अति + उष्णम् ९. वदति + ओमिति १०. आत्मनि + अवस्थितम्।

घ. १. न + अनुवर्तयति + इह २. जहाति + इह ३. कर्तव्यानि + इति ४. तथा + असक्तः ५. वि + ईक्षन्ते ६. वीणावादिनी + इति ७. तु + उद्देशतः ८. न + अभावः ९. कर्ता + अहम् १०. न + अन्तः।

ङ. १. अचिरेणाधिगच्छति २. त्यक्त्वात्मशुद्धये ३. एवात्मना ४. तथान्तर्ज्योतिः ५. महतीच्छा ६. अतीन्द्रियम् ७. वधूत्सवः ८. दुहितॄद्धिः ९. मानापमानयोः १०. इतीयम्।

च. १. नोद्विजेत् २. विगतेच्छा ३. महेश्वरम् ४. नेन्द्रियार्थेषु ५. यत्रोपरमते ६. नोभयविभ्रष्टः ७. ययेदम् ८. ममोरुः ९. कृष्णर्द्धिः १०. ममल्वर्णः ११. महर्षिः १२. तवेदम्।

छ. १. एव + इतरः २. राज + ऋषयः ३. पुरा + उवाच ४. महा + ऋषयः ५. देव + ऋषिः ६. मद्भावाय + उपपद्यते ७. अमृत + उद्भवम् ८. त्वया + उक्तम् ९. परम + ईश्वरः १०. पिता + इव।

ज. १. नैति २. अप्रदायैभ्यः ३. तथैव ४. छित्त्वैनम् ५. तत्रैकमत्यम् ६. दर्शनौत्सुक्यम् ७. तवौजः ८. हत्वैतान् ९. इहैव १०. त्वयैकाग्रेण।

झ. १. च + एकान्तः २. मनसा + एव ३. नियम्य + एतद् ४. उप + एति ५. त्वया + एकेन ६. महा + ओजसः ७. महा + औषधिः ८. तत्र + एकाग्रम् ९. मया + एव १०. न + एव।

ञ. १. द्वाविमौ २. उभावपि ३. द्वावपि ४. सहनाववतु ५. रात्रावन्धाः ६. तावसुरौ।

ट. १. ब्रह्माग्नौ + अपरे २. देवौ + अचक्षत ३. भूमौ + असपत्नम् ४. उभौ + अवधार्य ५. तौ + एव ६. ददौ + अर्धासनम्।

ठ. १. क्रियतेऽर्जुन २. परिणामेऽमृतोपमम् ३. दीयतेऽनुपकारिणे ४. विष्णोऽव ५. श्रेयोऽनुपश्यामि ६. इमेऽवस्थिताः ७. नरकेऽनियतम् ८. तेऽवस्थिताः ९. शिष्यस्तेऽहम् १०. प्रयाणकालेऽपि।

ङ. १. प्रपद्यन्ते + अन्यदेवताः २. ते + अहोरात्रविदः ३. रात्र्यागमे + अवशः ४. शम्भो + अव ५. अन्तकाले + अपि ६. लोके + अस्मिन् ७. देहे + अस्मिन् ८. मोक्ष्यसे + अशुभात् ९. ये + अवस्थिताः १०. ऋते + अपि।

ढ. १. ब्रह्म + उद्भवम् २. हि + अकर्मण : ३. कर्मणा + एव ४. तदग्रे + अमृतोपमम् ५. यत्ते + अहम्
६. निःश्रेयसकरौ + उभौ ७. सम्भवामि + आत्ममायया ८. तथा + आप्नोति ९. कर्तव्यानि + इति १०. एवायम्।

ण. १. यण्सन्धिः २. पूर्वरूपसन्धिः ३. गुणसन्धिः ४. सवर्णदीर्घसन्धिः ५. गुणसन्धिः ६. सवर्णदीर्घसन्धिः ७. वृद्धिसन्धिः ८. यान्तवान्तादेशसन्धिः ९. प्रकृतिभावसन्धिः १०. प्रकृतिभावसन्धिः।

त. १. विद्ध्यकर्तारम् २. नमस्तेऽस्तु ३. द्वन्द्वातीतः ४. ब्रह्माग्नौ ५. उपैष्यसि ६. नोद्विजेत् ७. शक्नोतीहैव ८. स्पर्शेष्वसक्तात्मा ९. चैवात्मनात्मानम् १०. अनेकबाहूदरम्।

थ. १. इति + अर्जुनम्, इत् + इ + अ + र्जुनम् = इत् + य् + अर्जुनम् २. दृष्ट्वा + इदम्, दृष्ट्व् + आ + इ + दम् = दृष्ट्व् + ए + दम् ३. च + इज्यया, च् + अ + इ + ज्यया = च् + ए + ज्यया ४. तु + अनन्यया, त् + उ + अ + नन्यया = त् + व् + अनन्यया ५. मयि + आवेश्य, मय् + इ + आ + वेश्य = मय् + य् + आवेश्य ६. परि + उपासते, पर् + इ + उ + पासते = पर् + य् + उपासते ७. अनन्येन + एव, अनन्येन् + अ + ए + व = अनन्येन् + ऐ + व ८. शुभ + अशुभम्, शुभ् + अ + अ + शुभम् = शुभ् + आ + शुभम् = शुभाशुभम् ९. दश + एकम्, दश् + अ + ए + कम् = दश् + ऐ + कम् १०. अवेक्षे + अहम्, अवेक्ष् + ए + अ + हम् = अवेक्ष् + एऽ + हम्।

पाठः - ३

क. २. यज्ज्ञात्वा ३. यज्ञाज्ज्ञानयज्ञः ४. पश्यञ्शृण्वन् ५. कृष्णश्शेते ६. दिशश्च ७. मच्चित्तः ८. मनश्चञ्चलम् ९. कश्चिच्छादयति १०. अन्यज्ज्ञातव्यम् ११. सदसच्चाहम् १२. यत्तज्ज्ञानम्।

ख. १. सुनिस् + चितम् २. सदसत् + चाहम् ३. सम् + जायते ४. मत् + चित्तः ५. यद् + ज्ञानम् ६. तेजस् + चास्मि ७. सम् + छिन्नः ८. कस्मात् + च।

ग. १. आविष्टम् २. सर्पिष्टमम् ३. गरुत्माण्डयते।

घ. १. दृष् + त्वा २. अनिष् + तम् ३. उद् + डयनम् ४. अस्मत् + ठाकुरः।

ङ. १. धनुष्टङ्कारः २. भयहत् + डमरुः ३. कृष्णष्टीकते ४. तस्यास् + टङ्कणम् ५. षड् + नाम्।

च. १. तदेकम् २. स्मृतिभ्रंशाद्बुद्धिनाशः ३. कर्मयुगेधते ४. ध्रुड् विनश्यति ५. षड् दर्शनानि ६. अन्नाद्भवन्ति ७. पर्जन्यादन्नसम्भवः ८. आश्चर्यवद्वदति ९. भयाद्रणादुपरतम् १०. योगाद्धनञ्जय।

छ. १. स्वराट् + भवान् २. प्रावृट् + रूपम् ३. तद् + विद्धि ४. तस्मात् + एवम् ५. भवेत् + युगपद्।

ज. १. चिद्रूपम् २. प्राक् + रचितम् ३. किञ्चिदोम् ४. स्यात् + जुगुप्सितम् ५. बघ्नीयादनागसम् ६. सम्यक् + उभयोः ७. द्रव्यमयाद्यज्ञात् ८. आश्चर्यवत् + वदति ९. समिदाधानम् १०. अग्निमत् + भ्याम्।

झ. १. अस्मद् + कृष्णः २. सत्वात् सञ्जायते ३. उत्पतति ४. एतद् + क्षेत्रम् ५. तत् किम् ६. तद् + कुरुष्व ७. भेत्तुम् ८. छेद् + तव्यम् ९. सम्यक् फलति १०. षट् कमलानि।

ञ. १. तस्मा + त्+न+अर्हाः, (न + न) = तस्मान्नर्हाः २. वा + क् + म् + अनोभिः, (ङ् + म्) = वाङ्मनोभिः ३. म + त् + म् + अया, (न् + म्) = मन्मया ४. सुह + द् + म् + इत्रम्, (न् + म्) = सुहृन्मित्रम् ५. अनारम्भा + त् + न् + ऐष्कर्म्यम्, (न + न) = अनारम्भान्नैष्कर्म्यम् ६. बुद्धित्वा + त् + न् + अ, (न + न) = बुद्धित्वान्न ७. सम्प + द् + म् + अयम्, (न् + म्) = सम्पन्मयम् ८. य + त् + म् + आम्, (न् + म्) = यन्माम् ९. स्या + त् + न् + इश्चितम्, (न + न) = स्यान्निश्चितम् १०. जग + त् + न् + इवास, (न + न) = जगन्निवास ११. मत्कर्मकृ + त् + म् + अत्, (न् + म्) = मत्कर्मकृन्मत् १२. चि + द् + म् + अयम्, (न् + म्) = चिन्मयम्।

ट. १. मद्भावम् + याति २. अक्षरम् + ब्रह्म ३. इदम् + धार्यते ४. रम् + स्यते ५. श्रीमताम् + गेहे ६. वासान् + सि ७. माम् + भजति ८. हवीन् + सि ९. नम् + स्यति १०. स्रन् + सते।

ठ. १. परमं भवान् २. पुरोधसां च ३. सर्वभूतानां बीजं तत् ४. संयमी ५. मूकं करोति ६. मां नियोजयसि ।

ड. १. भुवनात् + लोकाः, २. श्रद्धावाँल्लभते ३. नियम्य ४. सम् + न्यासी ५. सम् + ग्रामम् ६. सङ्घातः ७. शुभान् + लोकान् ८. तल्लयः ९. महाँल्लाभः १०. नाहम् + कृतः ।

ढ. १. शार्ङ्गिन्नेषोऽहम् २. प्रत्यङ् ३. सम्यङ् + आस्ते ४. युञ्जन् + एवम् ५. कुर्वन्नपि ६. अव्ययात्मा ७. कुर्वन् + आप्नोति ८. अस्ति ९. आयाहि १०. तस्मिन्निति ।

ण. १. कामधुग्घरति २. दिग्घस्ती ३. तद्धानिः ४. एतद्धर्म्यम् ५. रत्नमुड्ढसति ६. उत्थिता ।

त. १. उद् + हरेत् २. गच्छद् + हास्यम् ३. विड् + हसति ४. सुहृद् + हृष्टः ।

थ. १. यत् + शोकम् २. उद् + शोषणम् ३. यत् + श्रेयः ४. तस्माच्छास्त्रम् ५. श्रुतवान् ६. यच्छ्रद्धः ७. उच्छिष्टम् ८. एतत् + श्रुतम् ९. तस्माच्छपते १०. विद्वत् + श्रद्धा ११. त्यागात् + शान्तिः १२. तस्माच्छास्त्रम् १३. शश्वत् + शान्तिम् १४. तत् + श्लोकेन ।

द. २. पुमाँश्चरति / पमांश्चरति ३. विद्वाँस्तथा / विद्वांस्तथा ४. वादाँश्च / वादांश्च ५. ताँस्तथैव / तांस्तथैव ।

ध. १. विमूढान् + तान् २. ऋषीन् + च ३. देवान् + तव ४. उरगान् + च ५. सर्वान् + तथा ।

न. १. योत्स्य इति / योत्स्ययिति २. वर्तन्त इति / वर्तन्तयिति ३. पुत्र्या आनयति / पुत्र्यायानयति ४. प्रभ अधुना / प्रभवधुना ५. भाना अपि / भानावपि ६. देवा उपविशन्ति / देवायुपविशन्ति ७. निर्मानमोहा जित ८. विभ्रान्ता मोहजालम् ।

प. १. मोदिष्ये + इति २. वृत्तिस्थाय् + अधो ३. स्थिराय् + हृद्याः ४. वर्तन्ते + इत्येव ५. ध्यायन्तय् + उपासते ६. बालौ + आगतौ ।

फ. १. क्रोधा + त् + भ् + अवति, क्रोधा + द् + भ् + अवति = क्रोधाद्भवति (जश्त्वसन्धिः) २. ता + न् + त् + इतिक्षस्व, तां / ताँ + स् + त् + इतिक्षस्व = तांस्तितिक्षस्व / ताँस्तितिक्षस्व (सत्वसन्धिः) ३. कश्चि + त् + ए + नम्, कश्चि + द् + ए + नम् = कश्चिदेनम् (जश्त्वसन्धिः) ४. म + त् + म् + अया, म + न् + म् + अया = मन्मया (अनुनासिकसन्धिः) ५. य + च् + श् + ओकम्, य + च् + छ् + ओकम् = यच्छोकम् / यच्शोकम् (छत्वसन्धिः) ६. इ + ष् + त् + अ, इ + ष् + ट् + अ = इष्टः (ष्टुत्वसन्धिः) ७. अस्म + द् + श् + इष्यः, अस्म + ज् + श् + इष्यः, अस्म + च् + श् + इष्यः, अस्म + च् + छ् / श् + इष्यः = अस्मच्छिष्यः / अस्मच्शिष्यः (छत्वसन्धिः) ८. अविक + म् + प् + एन, अविकम्पेन (परसवर्णसन्धिः) ९. पश्य + न् + आ + त्मनि, पश्य + न् + न् + आ + त्मनि = पश्यन्नात्मनि (ङमुडागमसन्धिः) १०. विश्वरा + ड् + न् + अमति, विश्वरा + ण् + न् + अमति = विश्वराण्णमति (अनुनासिकसन्धिः) ।

ब. १. (श्चुत्वसन्धिः) २. सन्, (ङमुडागमसन्धिः) ३. अनादित्वात् + निर्गुणत्वात्, (अनुनासिकसन्धिः) ४. स्वपन्, (श्चुत्वसन्धिः) ५. अहम् + कारम् (परसवर्णसन्धिः) ६. स्यात् + जनार्दन (श्चुत्वसन्धिः) ७. वल्लभाय् + राजानः (यवलोपसन्धिः) ८. ग्रहात् + शक्नोमि (छत्वसन्धिः) ९. धर्म्यात् (पूर्वसन्धिः) १०. तान् + तथैव (सत्वसन्धिः) ।

भ. अनुनासिकसन्धिः = मत् + मना, तत् + मे, जश्त्वसन्धिः = मत् + भक्तः, मत् + याजी, यत् + आदित्यगतम्, जगत् + भासयते, यादृक् + इच्छेत्, तादृक् + भवति, अनुस्वारसन्धिः = माम् + नमस्कुरु, सत्यम् + ते, आदित्यगतम् + तेजः, ब्रह्माणमीशम् + कमलासनस्थ, सन्न्यासम् + कर्मणाम्, कर्मणाम् + कृष्ण, पुनर्योगम् + च, शम् + ससि, एकं + तन्मे, भवितुम् + तादृक्, श्चुत्वसन्धिः = यत् + चन्द्रमसि, यत् + चाग्नौ, निस् + चितम्, इच्छेत् + च, चर्त्वसन्धिः = तत् + तेजः, सत्वसन्धिः = देवान् + तव, सर्वान् + तथा, ऋषीन् + च, उरगान् + च, यादृशान् + च, परसवर्णसन्धिः = विशेषसम् + घान्, सम् + निविशते, छत्वसन्धिः = यत् + श्रेयः ।

म. १.पृथिवीम्+चैव,विजयम्+कृष्ण,सम्+याति,सम्+शयात्मा=अनुस्वारसन्धिः,सम्+ज्ञके=श्चुत्वसन्धिः,सञ्ज्ञकेइतिविजातीयपदम्।२.अस्मात् +निवर्तितुम्,कतरत्+न,कृत्स्नवित्+न,एतत्+मे=अनुनासिकसन्धिः,स्यात्+आत्मतृप्तः=जश्त्वसन्धिः,स्यादात्मतृप्तः इति विजातीयपदम्। ३.स्यात्+जनार्दन=श्चुत्वसन्धिः,प्रसिद्ध्येत्+अकर्मणः,सन्न्यसनात्+एव,यज्ञात्+भवति,बन्धात्+प्रमुच्यते=जश्त्वसन्धिः,स्याज्जनार्दन इतिविजातीयपदम्।४.उद्+श्रितम्,तत्+शक्यम्,एतत्+श्रुत्वा,यत्+श्रद्धः=छत्वसन्धिः,सम्+यम्य=अनुस्वारसन्धिः,संयम्यइतिविजातीयपदम्। ५. एतान् + त्रीन्, हतान् + त्वम्, योगिन् + त्वाम्, विपरीतान् + च = सत्वसन्धिः, तत् + निबध्नाति = अनुनासिकसन्धिः, तन्निबध्नाति

इति विजातीयपदम् । ६. श्रद्धावान् + लभते, शुभान् + लोकान्, इमान् + लोकान्, श्रुतिमत् + लोके = परसर्णसन्धिः, यत् + मम = अनुनासिकसन्धिः, यन्मम इति विजातीयपदम् ।

पाठः - ४

क. १. सौमदत्तिः + तथैव २. धृष्टकेतुः + चेकितानः ३. सन्तुष्टः + तस्य ४. कर्मण्येवाधिकारः + ते ५. विभ्रष्टः + छिन्नाभ्रमिव ।

ख. २. निरहङ्कारः समदुःखसुखः, निरहङ्कारस्समदुःखसुखः ३. स्थितप्रज्ञस्तदोच्यते ४. युधामन्युश्च ५. रामष्टीकते ।

ग. २. आचार्याःपितरः, आचार्याः पितरः ३. कृपणाःफलहेतवः, कृपणाः फलहेतवः ४. यज्ञःकर्मसमुद्भवः, यज्ञः कर्मसमुद्भवः ५. शब्दःखे, शब्दः खे ।

घ. १. पुनः योगम् २. निराशीः + निर्ममः ३. प्रकृतेः + गुणसम्मूढाः ४. प्रकृतेः + ज्ञानवानपि ५. बुद्धिः + यस्य ६. चिकीर्षुः + लोकसङ्ग्रहम् ७. कृताञ्जलिः + वेपमानः ८. कृताञ्जलिः + अभाषत ९. केवलैः + इन्द्रियैः १०. ग्लानिः + भवति ।

ङ. १. निर्गुणत्वात् २. प्रकृतेर्वशात् ३. गतिर्दुःखम् ४. अग्निरहम् ५. जिज्ञासुरर्थार्थी ६. आरुरुक्षोर्मुनेर्योगम् ७. त्रिभिर्नरः ८. तुल्यनिन्दास्तुतिर्मौनी ९. सौम्यवपुर्महात्मा १०. वदनैर्ज्वलद्भिः ११. प्रवृत्तिरारम्भः ।

च. २. निर्योगक्षेम आत्मवान्, निर्योगक्षेमयात्मवान् ३. अक्षर इति, अक्षरयिति ४. षण्मासा उत्तरायणम्, षण्मासायुत्तरायणम् ५. बहुशाखा ह्यनन्ताः ६. धार्तराष्ट्रा रणे ७. आहारा राजसस्य ८. सततयुक्ता ये ९. पुण्या भक्ता राजर्षयः १०. देहा नित्यस्योक्ताः ।

छ. १. एष आगतः एषयागतः २. एष रजोगुणसमुद्भवः ३. स मे ४. स विस्मयाविष्टः ५. स परः ६. स हि ७. स संन्यासी ८. स युक्त ९. शम्भू रचयति १०. पुना रमते ११. पाण्डवै रणनदी ।

ज. १. तेजः + धृतिः २. यः + लोकत्रयम् ३. अधः + गच्छन्ति ४. लुब्धः + हिंसात्मकः ५. श्रेयः + हि ६. यः + अभ्यसूयति ७. सः + अपि ८. अनाशिनः + अप्रमेयस्य ९. युक्तः + यया १०. हतः + वा ।

झ. १. अधर्मोऽभिभवत्युत २. नो जयेयुः ३. महतो भयात् ४. दृष्टोऽन्तः ५ .बद्धिनाशो बुद्धिनाशात् ६. ध्यायतो विषयान् ७. वो देवाः ८. शाश्वतोऽयम् ९. धृष्टद्युम्नो विराटश्च १०. नो राज्येन ।

ञ. १. श्वतैर्हयैर्युक्ते २. अस्माभिःपापात् ३. एतैःकुलघ्नानाम् ४. दोषैरेतैः ५. प्रपश्यद्भिर्जनार्दन ६. हृषीकेशो देवदत्तम् ७. श्रेयोऽनुपश्यामि ८. स पुरुषः ९. यावानर्थ उदपाने १०. स्थिरबुद्धिरसम्मूढः ।

ट. २. मातुल् + आ + : + श् + वशुराः, मातुल् + आ + : / स् + श् + वशुराः = मातुलाः श्वशुराः / मातुलाश्श्वशुराः ३. सुखिन् + अ + : + स् + याम, सुखिन् + अ + : / स् + स् + याम = सुखिनः स्याम / सुखिनस्स्याम ४. उक्त् + आ + : + श् + अरीरिण, उक्त् + आ + : / स् + श् + अरीरिण = उक्ताः शरीरिणः । उक्ताश्शरीरिणः ६. मृत्य् + उ + : + ध् + रुवम्, मृत्य् + उ + र् + ध् + रुवम् = मृत्युर्ध्रुवम् ७. विद् + उ + : + य् + उक्तचेतसः, विद् + उ + र् + य् + उक्तचेतसः = विदुर्युक्तचेतसः ८. कर्मफलहेत् + उ + : + भ् + ऊः, कर्मफलहेत् + उ + र् + भ् + ऊः = कर्मफलहेतुर्भूः १०. व्यवसित् + आ + : + व् + अयम्, व्यवसित् + आ + व् + अयम् = व्यवसिता वयम् ११. धार्तराष्ट्र् + आ + : + र् + अणे, धार्तराष्ट्र् + आ + र् + अणे = धार्तराष्ट्रा रणे १२. आपन्न् + आ + : + म् + ऊढाः, आपन्न् + आ + म् + ऊढाः = आपन्ना मूढाः १४. य् + अ + : + भ् + उङ्क्ते, य् + अ + उ + भ् + उङ्क्ते, य् + ओ + भ् + उङ्क्ते = यो भुङ्क्ते १५.परयाविष्ट् + अ + : + व् + इषीदन्, परयाविष्ट् + अ + उ + व् + इषीदन्, परयाविष्ट् + ओ + व् + इषीदन् = परयाविष्टो विषीदन् ।

ठ. २. सः + जीवति ३. अपायिनः + अनित्याः ४. हन्युः + तन्मे ५. जातिधर्माः + कुलधर्माः + च ६. सेनयोः + उभयोः + अपि ७. अवस्थिताः + प्रमुखे ८. बुद्धिः + अयुक्तस्य ९. बुद्धिः + जनार्दन १०. यः + तु + आत्मरतिः ११. सः + शब्दः + तुमुलः + अभवत् १२. सः + कौन्तेयः ।

ड. २. इति माम् यः अभिजानाति कर्मभिः न सः बध्यते ३. द्रव्ययज्ञाः तपोयज्ञाः योगयज्ञाः तथा अपरे ४. एवम् बहुविधाः यज्ञाः वितताः ब्रह्मणः मुखे ५. यत् त्वया उक्तम् वचः तेन मोहः अयम् विगतः मम ६. यः अन्तःसुखः अन्तरारामः तथा अन्तःज्योतिः एव च ७. सर्वथा

वर्तमानः अपि न सः भूयः अभिजायते ८. अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च ९. कैः लिङ्गैः त्रीन्, गुणान् एतान् अतीतः भवति प्रभो १०. अधः च ऊर्ध्वम् प्रसृताः तस्य शाखाः गुणप्रवृद्धाः विषयप्रवालाः।

ढ. १. यस्य न अहङ्कृतः भावः बुद्धिः यस्य न लिप्यते । हत्वा अपि सः इमान् लोकान् न हन्ति न निबध्यते ॥ २. आढ्यः अभिजनवान् अस्मि कः अन्यः अस्ति सदृशः मया । यक्ष्ये दास्यामि मोदिष्ये इति अज्ञानविमोहिताः ॥ ३. ऋषिभिः बहुधा गीतं छन्दोभिः विविधैः पृथक् । ब्रह्मसूत्रपदैः च एव हेतुमद्भिः विनिश्चितैः ॥ ४. यथा आकाशस्थितः नित्यं वायुः सर्वत्रगः महान् । तथा सर्वाणि भूतानि मत्स्थानि इति उपधारय ॥

पाठः - ५

क. पाठकाः स्वयमेव कथां दृष्ट्वा लिखन्तु ।

ख. १. लोकानुरागी २. राष्ट्ररञ्जने ३. कर्तव्यपरायणः ४. उन्नतिशिखरम् ५. युधिष्ठिरगुणानुवादम् ६. तच्चरणचिह्नम् ७. प्रीत्यर्थम् ८. रोगशोकौ ९. त्रिविधतापाः १०. शोकरहिताः ११. स्वेच्छाचारः १२. मर्यादास्थापनम् १३. राष्ट्रशक्तेः १४. स्वजीवनकाले १५. अखिलविश्वे ।

ग. १. उन्नतिशिखरं नीतवान् । २. आदर्शराज्यम् अभवत् । ३. संयमशीलः, सदाचारी धर्मनिष्ठः च आसीत् । ४. युधिष्ठिरस्य । ५. स्व-स्वकर्तव्यपालनं कुर्वन्ति स्म । ६. परस्परं बन्धुभावेन प्रेम्णा तिष्ठन्ति स्म । ७. युधिष्ठिरराज्ये रोगशोकौ लेशमात्रेण अपि न आस्ताम् । ८. कलहः कोलाहलः उपद्रवः च । ९. अनेकानि लोकोपयोगीनि कार्याणि कृतवान् । १०. युधिष्ठिरस्य ।

घ. १. द्रुपदपुत्रेण २. द्विजोत्तमम् ३. सञ्ज्ञार्थम् ४. स्मृतिविभ्रमः ५. बुद्धिनाशः ६. रागद्वेषवियुक्तैः ७. आत्मवश्यैः ८. विधेयात्मा ९. विधिहीनम् १०. मन्त्रहीनम् ११. श्रद्धाविरहितम् ।

पाठः - ६

क. १. आत्मनि इति २. इन्द्रियम् अतिक्रान्तम् ३. भूतेषु इति ४. दैवतेषु इति ।

ख. १. अध्यात्मम् २. अधिभूतम् ३. अधिदैवम् ४. यथोक्तम् ।

ग. १. शालायाः समीपम् २. शक्तिम् अनतिक्रम्य ३. आ द्वारिकानगर्याः ४. वस्तूनाम् अभावः ५. चमूं चमूं प्रति ६. गोः समीपम् ७. योद्धारं योद्धारं प्रति ८. आत्मनि इति ९. कर्माणि अनतिक्रम्य ।

घ. १. उपकुरुक्षेत्रम् २. उपयज्ञशालम् ३. निष्कपटम् ४. अनुमति ५. पारेगङ्गम् ६. मध्येयुद्धक्षेत्रम् ७. अभिकृष्णम् ८. आयुद्धक्षेत्रम् ९. आहस्तिनापुरम् १०. यथाज्ञम् ११. यथानीति १२. प्रतिवीथि १३. उपबन्धु १४. उपकुन्ति१५. उपविधातृ १६. प्रतिसभम् १७. निर्दधि १८. अनुद्रौपदि १९. यथासूचनम् २०. मध्येसभम् २१. अभिरथम् ।

ङ. २. कालम् अनतिक्रम्य ३. अवसरम् अनतिक्रम्य ४. प्रत्येकम् ५. दिनं दिनं प्रति ६. अनुगृहम् ७. शिक्षकस्य पश्चात् इति ८. निर्गन्धम् ९. कण्टकानाम् अभावः १०. उपगृहम् ११. वनस्य समीपम् १२. उपाश्रम् १३. अनुगुणम् १४. रागस्य योग्यम् १५. अतिशैत्यम् ।

च. १. उपद्रोणम् २. अधिदैवतम् ३. अधिमञ्चम् ४. उपकृष्णम् ५. यथाभागम् ६. मध्येसमुद्रम् ७. यथामति ८. अभिभीष्मम् ९. प्रतिसेनानायकम् ।

पाठः - ७

क. १. आचार्यद्रोणः आश्रमं सम्प्राप्य शस्त्रशिक्षणं शास्त्रशिक्षणं च प्रारब्धवान् । २. सः राजपुत्रान् एव शिक्षयति स्म । ३. द्रोणस्य प्रियशिष्यः अर्जुनः आसीत् । ४. अर्जुनस्य शस्त्रज्ञानम् अद्भुतम् आसीत् । ५. गाण्डीवशोभितः सः अदृश्यलक्ष्यम् अपि भेत्तुं समर्थः आसीत् । ६. साक्षात् भगवतः नरस्य अवतारः अर्जुनः आसीत् । ७. आचार्यः द्रोणः स्वशिष्यान् समानतया शिक्षयति स्म । ८. आचार्यद्रोणेन आश्रमे शिष्याणां कृते समुचिता दिनचरी निश्चिता आसीत् ।

ख. १. शस्त्रशिक्षणम् शस्त्रशिक्षणेन २. शास्त्रशिक्षणम् शास्त्रशिक्षणेन ३. सर्वशिष्याः सर्वशिष्यान् ४. शस्त्रशास्त्रशिक्षणम् - शस्त्रशास्त्रशिक्षणेन ५. सर्वशिष्याः ६. स्वशिष्यः - स्वशिष्येण ७. क्षत्रियधर्मपालनम् - क्षत्रियधर्मपालनाय ८. राष्ट्रहितम् - राष्ट्रहिताय ९. युद्धक्षेत्रम् - युद्धक्षेत्रात् ।

ग. १. कर्मयोगेन २. शरीरयात्रा ३. कर्मबन्धम् ४. पाण्डवानीकम् ५. पूर्वाभ्यासेन ६. प्रयाणकाले ७. हृदयदौर्बल्यम् ८. विज्ञानसहितम् ९. सुरेन्द्रलोकम् १०. कुलस्त्रियः।

घ. १. पाण्डवानीकम् - षष्ठीतत्पुरुषः २. हृदयदौर्बल्यम् - षष्ठीतत्पुरुषः ३. बुद्धिनाशः - षष्ठीतत्पुरुषः ४. स्मृतिभ्रंशात् - षष्ठीतत्पुरुषः ५. स्वधर्मः - षष्ठीतत्पुरुषः ६. परधर्मात् -षष्ठीतत्पुरुषः ७. बुद्धिभेदम् - षष्ठीतत्पुरुषः ८. कर्मयोगः - षष्ठीतत्पुरुषः ९. शरीर-विमोक्षणात् - षष्ठीतत्पुरुषः १०. कर्मफलम् - षष्ठीतत्पुरुषः ११. नासिकाग्रम् - षष्ठीतत्पुरुषः १२. प्रयाणकाले - षष्ठीतत्पुरुषः १३. आदित्यवर्णम् - षष्ठीतत्पुरुषः १४. योगबलेन - षष्ठीतत्पुरुषः १५. रात्र्यागमे - षष्ठीतत्पुरुषः १६. विज्ञानसहितम् - तृतीयातत्पुरुषः १७. राजविद्या - षष्ठीतत्पुरुषः १८. लोकमहेश्वरम् - षष्ठीतत्पुरुषः १९. जगत्पते - षष्ठीतत्पुरुषः २०. भूतेश - षष्ठीतत्पुरुषः।

ङ. १. आत्मनि संयमः। २. श्रुतौ विप्रतिपन्नाः ३. रजोगुणात् समुद्भवः। ४. परम्परया प्राप्तम्। ५. आत्मनि तृप्तः। ६. बुद्ध्या युक्तः। ७. द्वन्द्वम् अतीतः। ८. ज्ञानेन सञ्छिन्नः। ९. कर्मफले आसङ्गः। १०. मम भावः। ११. गुणैः सम्मूढाः। १२. ब्रह्म भूतः। १३. ब्रह्मणि निर्वाणम्, तत्। १४. दुःखसंयोगात् वियोगः। १५. अहङ्कारेण विमूढः। १६. मां गतः। १७. नरेषु अधमाः। १८. योगेन संसिद्धः। १९. उभयस्मात् विभ्रष्टः २०. योगम् आरूढः।

च. १. गुह्यं ज्ञानम् विशेषणपूर्वपदकर्मधारयः। २. पुरुषर्षभः - उपमानोत्तरपदकर्मधारयः। ३. भरतः ऋषभः इव। ४. अवाच्यवादान् - विशेषणपूर्वपदकर्मधारयः। ५. श्वेतानि पुष्पाणि - विशेषणपूर्वपदकर्मधारयः। ६. नीलं कमलम् - विशेषणपूर्वपदकर्मधारयः। ७. कर्मबन्धनम् - अवधारणापूर्वपदः कर्मधारयः। ८. जन्मबन्धः - अवधारणापूर्वपदः कर्मधारयः। ९. आम्रः इति वृक्षः। १०. विद्युच्चञ्चला - उपमानपूर्वपदः कर्मधारयः। ११. पुरुषः व्याघ्र इव - उपमानोत्तरपदः कर्मधारयः। १२. विद्याधनम् - अवधारणापूर्वपदः कर्मधारयः। १३. जपयज्ञः - सम्भावनापूर्वपदः कर्मधारयः। १४. दीर्घा रज्जुः। १५. गीतोपदेशः - सम्भावनापूर्वपदः कर्मधारयः। १६. मोहकलिलम् - अवधारणापूर्वपदः कर्मधारयः। १७. शब्दब्रह्म - मध्यमपदलोपी कर्मधारयः। १८. कर्मसंज्ञा - सम्भावनापूर्वपदः कर्मधारयः। १९. आशा एव पाशः - अवधारणापूर्वपदः कर्मधारयः। २०. मृत्युसंसारसागरः - मध्यमपदलोपी समासः। २१. जन्म एव बन्धः - अवधारणापूर्वपदः कर्मधारयः। २२. त्रिविद्या - मध्यमपदलोपी समासः। २३. ज्ञानम् इति असिः - सम्भावनापूर्वपदः कर्मधारयः। २४. संसार एव सागरः - अवधारणापूर्वपदः कर्मधारयः।

छ.

१. उग्ररूपम्	उग्रं रूपम्	विशेषणपूर्वपदकर्मधारयः
२. विद्यारत्नम्	विद्या एव रत्नम्	अवधारणापूर्वपदः कर्मधारयः
३. सिंहासनम्	सिंहचिह्नाङ्कितम् आसनम्	मध्यमपदलोपी समासः
४. द्वारकानगरी	द्वारका इति नगरी	सम्भावनापूर्वपदः कर्मधारयः
५. ज्ञानधनम्	ज्ञान एव धनम्	अवधारणापूर्वपदः कर्मधारयः
६. विषयप्रवालाः	विषयाः एव प्रवालाः	अवधारणापूर्वपदः कर्मधारयः
७. नामयज्ञः	नामसम्पादकः यज्ञः	मध्यमपदलोपी समासः
८. द्विशतम्	द्विगुणितं शतम्	मध्यमपदलोपी समासः
९. आदिदेवः	आदिः देवः	विशेषणपूर्वपदः कर्मधारयः
१०. किसलयकोमलम्	किसलय इव कोमलम्	उपमानपूर्वपदः कर्मधारय
११. आत्मकारणम्	आत्मा एव कारणम्	अवधारणापूर्वपदः कर्मधारयः
१२. शास्त्रविधिः	शास्त्रसम्मतः विधिः	मध्यमपदलोपी समासः

ज. १. पञ्चपात्रम्। २. त्रिगुणम्। ३. दश गावः धनं यस्य। ४. सप्ताहः। ५. पञ्चानां वटानां समाहारः। ६. पञ्चदशी। ७. चतुष्पथम्। ८. द्वयोः मात्रोः अपत्यम्। ९. पञ्चमूली। १०. चतुर्णां व्यूहानां समाहारः।

झ. १. न स्वर्ग्यम्। २. न कीर्तिकरम्। ३. न सतः। ४. न भावः। ५. न आश्रितः। ६. न संशयम्। ७. न वशः। ८. न श्रद्दधानाः।

ञ. १. अहिंसा। २. अप्राप्य। ३. अनादिः। ४. अदक्षिणम्। ५. अनीश्वरः

ट.	१. अशुचौ	न शुचिः अशुचिः, तस्मिन्	नञ्-तत्पुरुषः
	२. गुणातीतः	गुणम् अतीतः	द्वितीयातत्पुरुषः
	३. अविभक्तम्	न विभक्तम्	नञ्-तत्पुरुषः
	४. इन्द्रियार्थेषु	इन्द्रियाणाम् अर्थाः इन्द्रियार्थाः, तेषु	षष्ठीतत्पुरुषः
	५. अनहङ्कारः	न अहङ्कारः	नञ्-तत्पुरुषः
	६. अनिष्टम्	न इष्टम्	नञ्-तत्पुरुषः
	७. गुणान्वितम्	गुणैः अन्वितः गुणान्वितः, तम्	तृतीयातत्पुरुषः
	८. कर्मसङ्ग्रहः	कर्मणः सङ्ग्रहः	षष्ठीतत्पुरुषः
	९. पुरुषव्याघ्रः	पुरुषः व्याघ्रः इव	उपमानोत्तरपदः कर्मधारयः
	१०. परमात्मा	परमश्चासौ आत्मा	विशेषणपूर्वपदः कर्मधारयः
	११. आदित्यगतम्	आदित्यं गतम्	द्वितीयातत्पुरुषः
	१२. अधर्मम्	न धर्मः अधर्मः, तम्	नञ्-तत्पुरुषः
	१३. अव्यभिचारेण	न व्यभिचारः अव्यभिचारः, तेन	नञ्-तत्पुरुषः
	१४. भक्तियोगेन	भक्तेः योगः भक्तियोगः, तेन	षष्ठीतत्पुरुषः
	१५. मत्कर्म	मम कर्म	षष्ठीतत्पुरुषः
	१६. मद्भक्तः	मम भक्तः	षष्ठीतत्पुरुषः
	१७. सङ्गवर्जितः	सङ्गेन वर्जितः	तृतीयातत्पुरुषः

ठ. १ सुकृतम् २. प्रपितामहः ३. सुजनः ४. सुस्थानम् ५. अभिमुखम् ६. दुष्पुरुषः ७. कुविचारः ८. स्वागतम् ९. प्रमातामही

ड. १. कर्मकृत्, कर्मकृतौ, कर्मकृतः २. तत्त्ववित्, तत्त्वविदः ३. काव्यकृत्, काव्यकृतौ, काव्यकृतः ४. लोकक्षयकृत्, लोकक्षयकृतौ, लोकक्षयकृतः ५. अन्यभाजौ ६. यज्ञशिष्टामृतभुजौ, यज्ञशिष्टामृतभुजः ७. शस्त्रभृतः ८. मधुपः, मधुपौ, मधुपाः ९. प्रकृतिस्थः, प्रकृतिस्थौ, प्रकृतिस्थाः १०. सर्वभृत्, सर्वभृतः११. दूरस्थः, दूरस्थौ, दूरस्थाः १२. कृत्स्नवित्, कृत्स्नविदौ १३. देहभृतौ, देहभृतः १४. सत्त्वस्थः, सत्त्वस्थौ, सत्त्वस्थाः १५. अहोरात्रविद्, अहोरात्रविदौ, अहोरात्रविदः १६. कुम्भकारौ, कुम्भकाराः, १७. पत्रकारः, पत्रकारौ, पत्रकाराः १८. भाष्यकारः, भाष्यकारौ, भाष्यकाराः १९. एकस्थः, एकस्थौ, एकस्थाः २०. कमलासनस्थः, कमलासनस्थाः २१. क्षीरपः, क्षीरपौ, क्षीरपाः २२. मधुलिहौ, मधुलिहः २३. धर्मवित्, धर्मविदौ, धर्मविदः २४. वेदज्ञः, वेदज्ञौ २५. शास्त्रज्ञः, शास्त्रज्ञौ, शास्त्रज्ञाः।

पाठः - ८

क. १. श्रीकृष्णः २. देवताः ३. लोके ४. श्रीकृष्णः ५. श्रीकृष्णः ६. श्रीकृष्णः ७. विष्णुः इव ८. श्रीकृष्णः ९. शौनकादयः ऋषयः १०. सूताय।

ख. १. मर्यादानुपालेन लोके श्रीकृष्णस्य समता नास्ति। २. लोके सर्वगुणसम्पन्नाः जनाः दुर्लभाः भवन्ति। ३. श्रीकृष्ण धैर्ये हिमवान् इव गाम्भीर्ये समुद्र इव च अस्ति। ४. सर्वगुणनिधानस्य श्रीकृष्णस्य गुणगौरवं सूतः शौनकादीन् ऋषीन् श्रावयति। ५. श्रीकृष्णस्य पञ्च विशेषणानि - विनयशीलः, क्षमाशीलः, धर्मप्रियः, न्यायप्रियः, दृढनिश्चयः च इति।

ग. १. अनुपमगुणः २. अमितः विक्रमः यस्य सः ३. प्रसन्नात्मा ४. उदात्तमनाः ५. क्षमाशीलः ६. विनयः शीलं यस्य सः ७. प्रियधर्मा ८. न्यायः प्रियः यस्य सः ९. शुद्धसत्त्वः १०. मोघकर्माणः।

घ. १.महारथः २.अव्यक्तादीनि ३.व्यक्तमध्यानि ४.अव्यक्तनिधनानि ५.व्यवसायात्मिका ६.बहुशाखाः ७. अनन्ताः ८. अनुद्विग्नमनाः ९. विगतस्पृहः १०. वीतरागभयक्रोधः।

ङ. १. वीतरागभयक्रोधाः २. यतचित्तात्मा ३. गतसङ्गस्य ४. शब्दादीन् ५. द्रव्ययज्ञाः ६. संशितव्रताः ७. यज्ञक्षपितकल्मषाः ८. संयतेन्द्रियः ९. विशुद्धात्मा १०. सर्वभूतात्मभूतात्मा।

च. १. आत्मरतिः २. कामरूपेण ३. ब्रह्मकर्मसमाधिना ४. संशयात्मा ५. तद्बुद्धयः ६. तदात्मानः ७. तन्निष्ठाः ८. आत्मसंस्थम् ९. मच्चितः १०. मन्मनाः।

छ. १. प्रत्यनीकेषु २. निर्वैरः ३. निर्गुणम् ४. निर्दोषम्।

ज. १. असत्यम् २. अप्रतिष्ठम् ३. अनीश्वरम् ४. अदक्षिणम् ५. अक्रियः ६. अनात्मनः ७. अपरिग्रहः ८. अक्षरम् ९. अनघ।

झ. १. धृष्टकेतुः २. उत्तमौजाः ३. विशालबुद्धिः ४. ज्ञानमुद्रः ५. तोत्रपाणिः ६. जयद्रथजला ७. गीताध्ययनशीलः ८. पद्मनाभः ९. भुजगशयनः १०. परमेष्वासः ११. महाबाहुः १२. दुर्बुद्धिः १३. लोभोपहतचेताः १४. जनकादयः १५. शस्त्रपाणयः १६. भीमकर्मा १७. अनुद्विग्नमनाः १८. अचेताः १९. नष्टात्मानः २०. वृकोदरः २१. मिथ्याचारः २२. शब्दादयः २३. निर्योगक्षेमः २४. कृताञ्जलिः।

ञ. १. अनेकदिव्याभरणम् २. प्रह्लादः ३. कुसुमाकरः ४. मोघज्ञानाः ५. आदित्यवर्णम् ६. युक्तचेतसः ७. सुविरूढमूलम् ८. ज्ञानचक्षुषः ९. छिन्नसंशयः १०. गतव्यथः ११. दीप्तहुताशवक्त्रम् १२. दुर्मतिः १३. स्वप्नशीलस्य १४. अनन्तबाहुम् १५. उत्सन्नकुलधर्माणाम् १६. ज्ञानाग्निदग्धकर्माणम् १७. विभावसौ १८. अशस्त्रम् १९. निस्त्रैगुण्यः।

पाठः - ९

क. १. मानापमानयोः २. सुखदुःखे ३. लाभालाभौ ४. जयाजयौ ५. कायशिरोग्रीवम् ६. शशिसूर्ययोः ७. सिद्ध्यसिद्ध्योः ८. सुकृतदुष्कृते ९. शुभाशुभम् १०. सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।

ख. १. शेषमहेशगणेशाः अपि गीतायाः महिमानं वक्तुमशक्ताः। २. गीतायाः विषये इदमित्थम् इति कथयितुं न शक्नुमः। ३. बुद्धिवचनाभ्याम् अवर्णनीयः अपरिमेयः गीतायाः महिमा अस्ति। ४. निखिले विश्वे गीता प्रतिष्ठिता। ५. ज्ञानवृद्धाः मुक्तकण्ठेन गीतायाः तत्त्वज्ञानं गायन्ति। ६. गीतागङ्गोदकेन जनाः बाह्याभ्यन्तरयोः शुद्धिः भवति। ७. सर्वैः गीतायाः सम्यक् श्रवणकीर्तनपठनपाठनमननधारणानि करणीयानि ८. सर्वधर्मावलम्बिनः नराः गीतागङ्गोदकेन स्नात्वा स्वकल्याणं कर्तुं शक्नुवन्ति। ९. इमां गीतां भगवान् पद्मनाभः स्वमुखेन उक्तवान्। १०. अन्यानि कल्याणसाधनानि प्रायशः कर्मबन्धनम् उत्पादयन्ति।

ग. १. पुराणेतिहासेषु २. ऋषिमुनयः ३. बुद्धिवचनाभ्याम् ४. वेदोपनिषत्पुराणानाम् ५. गुणप्रभावस्वरूपतत्त्वरहस्यानाम् ६. उपासनाकर्मज्ञानानाम् ७. करचरणमुखनासिकस्य ८. बाह्याभ्यन्तरयोः ९. श्रवणकीर्तनपठनपाठनमननधारणानि १०. धर्मार्थकाममोक्षाणाम्।

घ. १. द्वन्द्वमोहौ २. रागद्वेषौ ३. नारीनरौ ४. सुघोषमणिपुष्पकौ ५. योगक्षेमम् ६. यज्ञदानतपांसि ७. सृष्टिस्थितिलयम् ८. हर्षामर्षभयोद्वेगैः ९. केशवार्जुनौ १०. शिरोग्रीवम्।

ङ. १. यक्षाश्च रक्षांसि च - यक्षरक्षांसि, तेषाम्। २. अनलश्च अर्कश्च। ३. दुःखं च शोकश्च आमयश्च। ४. महर्षयः च सिद्धाः च। ५. कार्यं च करणं च। ६. शरीरं च वाक् च मनः च - शरीरवाङ्मनांसि, तैः। ७. कृषिश्च गौरक्ष्यं च वाणिज्यं च एतेषां समाहारः। ८. इष्टं च अनिष्टं च। ९. अक्षिणी च शिरः च मुखं च एतेषां समाहारः। १०. ब्राह्मणाः च क्षत्रियाः च विशः च - ब्राह्मणक्षत्रियविशः, तेषाम्। ११. रुद्राः च आदित्याः च। १२. गन्धर्वाः च असुराः च सिद्धाः च। १३. लोष्टं च अश्मा च काञ्चनं च। १४. मित्रञ्च अरिश्च। १५. शशी च सूर्यश्च। १६. निन्दा च आत्मसंस्तुतिः च। १७. प्राणः च अपानः च।

च. १. रस्यस्निग्धस्थिरहृद्याः २. ज्ञानज्ञेयज्ञानगम्यानि ३. प्रकृतिपुरुषौ ४. क्षेत्रज्ञानज्ञेयानि ५. विकारगुणान् ६. सत्त्वरजस्तमांसि ७. लोभप्रवृत्तिकर्मारम्भाशमस्पृहाः ८. सूर्यशशाङ्कपावकाः ९. यातयामगतरसपर्युषितो-च्छिष्टामेध्यम्। १०. अग्निचन्द्रमसौ, तयोः ११. क्षराक्षरौ १२. दैवासुरौ १३. प्रवृत्तिनिवृत्ती, ताम् १४. ब्राह्मणवेदयज्ञाः १५. यज्ञदानतपांसि।

छ. १. मानश्च अपमानश्च - मानापमानौ, तयोः। २. धर्मश्च कामश्च अर्थश्च - धर्मकामार्थाः, तान्। ३. सुखानि च दुःखानि च - सुखदुःखानि, तेषाम्। ४. प्रमादः च आलस्यं च निद्रा च - प्रमादालस्यनिद्राः, ताभिः। ५. मित्रञ्च अरिश्च मित्रारी, मित्रार्योः पक्षः मित्रारिपक्षः, तयोः। ६. जन्म

च मृत्युः च जरा च दुःखं च - जन्ममृत्युजरादुःखानि, तैः । ७. कटु च अम्लः च लवणः च अत्युष्णं च तीक्ष्णं च रूक्षः च विदाही च । ८. प्रमादश्च मोहश्च । ९. सिद्धिश्च असिद्धिश्च - सिद्ध्यसिद्धी, तयोः । १०. क्षेत्रं च क्षेत्रज्ञश्च - क्षेत्रक्षेत्रज्ञौ, तयोः । ११. शुक्ला च कृष्णा च ।

ज. १. दैवीं सम्पदं प्राप्य जातस्य ज्ञानाभयसत्त्वसंशुद्धयः भवन्ति । २. दैवीं सम्पदं प्राप्य जातस्य सत्यत्यागाक्रोधाः भवन्ति । ३. दैवीं सम्पदं प्राप्य जातस्य स्वाध्यायार्जवतपांसि भवन्ति । ४. दैवीं सम्पदं प्राप्य जातस्य दयाशान्ती भवतः । ५. दैवीं सम्पदं प्राप्य जातस्य अचापलमार्दवे भवतः। ६. दैवीं सम्पदं प्राप्य जातस्य क्षमाधृतितेजांसि भवन्ति । ७. दैवीं सम्पदं प्राप्य जातस्य शौचाद्रोहौ भवतः। आसुरीं सम्पदं प्राप्य अभिजातस्य । ८. आसुरीं सम्पदं प्राप्य अभिजातस्य दम्भदर्पाभिमानाः भवन्ति । ९. आसुरीं सम्पदं प्राप्य अभिजातस्य क्रोधपारुष्याज्ञानानि भवन्ति ।

पाठः - १०

क.

क्रियापदम्	कर्ता	कर्म
उत्तिष्ठ	अर्जुन!	क्षुद्रम् / हृदयदौर्बल्यम्
प्राप्यसि	त्वम्	स्वर्गम्
जेष्यसि / भोक्ष्यसे	त्वम्	युद्धम् / महीम्
पश्यन्ति	लोभोपहतचेतसः	कुलक्षयकृतं दोषम्
उपासते	ये	मनः / माम्
उवाच	इदं वाक्यम्	अश्रुपूर्णाकुलेक्षणम् / तम्
पर्युपासते / प्राप्नुवन्ति	मधुसूदनः	इन्द्रियग्रामम् ध्रुवम् अक्षरम् माम्
वेत्ति	यः	पुरुषं प्रकृतिं च वेत्ति
आहुः	ते	जगत् असत्यम् अप्रतिष्ठितम् अनीश्वरम्

ख. १. सूच्या, करणकारकम् २. भक्तेन, कर्तृकारकम् ३. बाणेन, करणकारकम् ४. अश्वेन, करणकारकम् ५. भीमेन, कर्तृकारकम् ६. गुप्तचरेण कर्तृकारकम् ७. अक्षयपात्रेण, करणकारकम् ८. पादाभ्याम्, करणकारकम् ९. कृष्णेन, कर्तृकारकम् १०. बाणेन, करणकारकम् ।

ग. १. परीक्षिते २. शिष्यान् ३. भक्तेभ्यः ४. द्वारकाधीशाय ५. कृष्णाय ६. श्रोतृभ्यः ७. भीमाय ८. अर्जुनाय ९. अश्वेभ्यः ।

घ. २. आनयनक्रिया, अरण्यस्य अश्वत्थाम्नः च, अरण्यम् ३. स्रंसनक्रिया, हस्तस्य गाण्डीवस्य च, हस्तः ४. निष्कासनक्रिया, हस्तिनापुरस्य पाण्डवानां च, हस्तिनापुरम् ५. निष्कासनक्रिया, अक्षयपात्रात् ओदनं च, अक्षयपात्रम् ६. अवतरणक्रिया दशरथस्य रथस्य च, रथम् ७. स्वीकरणक्रिया, तूणीरस्य शराणां च, तूणीरः ८. गमनक्रिया, कृष्णस्य मथुरायाः च, मथुरा ९. क्षेपणक्रिया, रथात् शत्रून् च, रथः १०. पलायनक्रिया, कुरुक्षेत्रस्य कस्य च, कुरुक्षेत्रम् ।

ङ. १. तूणीरे २. एकादशाध्याये ३. व्यूहे ४. नैमिषारण्ये ५. गीतायाम् ६. सर्वेषु ७. सभायाम् ८. भूमौ ९. मध्ये १०. युद्धे ।

च. २.लता,औपश्लेषिकः ३.सीता,वैषयिकः ४.अग्निः,अभिव्यापकः ५.समुद्रः,अभिव्यापकः ६.बलवान्,अभिव्यापकः ७.मुनिः,वैषयिकः ८.गुरुः, वैषयिकः ९.शरीरे,औपश्लेषिकः १०.आकाशः,अभिव्यापकः ११.श्रीरामः,वैषयिकः १२.हिमालयः,औपश्लेषिकः १३.सूत्रम्,औपश्लेषिकः १४. गङ्गातीरः, औपश्लेषिकः १५. पृथिवी, अभिव्यापकः ।

छ. २.कर्ता,प्रथमा ३.कर्म,द्वितीया ४.करणम्,तृतीया ५.सम्प्रदानम्,चतुर्थी ६.अपादानम्,पञ्चमी ७.सम्बन्धम्,षष्ठी ८.अधिकरणम्,सप्तमी ९.कर्म, द्वितीया १०.सम्प्रदानम्,चतुर्थी ११.करणम्,तृतीया १२.कर्म,द्वितीया १३.कर्तृ,प्रथमा १४.कर्म,द्वितीया १५.कर्म,द्वितीया १६.अधिकरणम्,सप्तमी १७. करणम्, तृतीया १८. सम्बन्धम्, षष्ठी १९. कर्म, द्वितीया २०. सम्बन्धम्, षष्ठी ।

ज. १. धृतराष्ट्रम् २. ये ३. सेनयोः ४. हस्तात् ५. शरीरे ६. लाक्षागृहात् ७. कुलक्षयात् ८. ज्ञानेन ९. युद्धाय १०. सेनानायकः ११. आत्मनि १२. युद्धाय १३. निराहारस्य १४. श्रद्धया १५. वेदानाम्।

झ. १. एते हि देवसमूहाः त्वां प्रविशन्ति २. प्रसादे सर्वदुःखानां हानिः उपजायते ३. अशान्तस्य कुतः सुखम् ४. अर्जुन ! सर्वभूतेषु यद् बीजं तद् अपि अहम् ५. अहम् इदं कृत्स्नस्य जगतः एकांशेन विष्टभ्यः स्थितः ६. कौन्तेय हतः वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ७. योगस्य जिज्ञासुः शब्दब्रह्म अतिवर्तते ८. शस्त्राणि छिन्दन्ति एनं न ९. यः अन्तकाले अपि मां सर्वं कलेवरं मुक्त्वा प्रयाति सः पुरुषः मद्भावं याति १०. परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ११. एवं ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोः अन्तरं भूतप्रकृतिमोक्षं च ये विदुः ते परं ब्रह्म यान्ति १२. कर्मणि एव ते अधिकारः। मा फलेषु कदाचन।

ञ. १. अभिमन्युः चक्रव्यूहं प्रविशति। २. कृष्णः अर्जुनम् उपदिशति। ३. सञ्जयः दिव्यदृष्ट्या महाभारतं पश्यति। ४. द्रोणः अर्जुनाय दिव्यास्त्राणि ददाति। ५. युधिष्ठिरः हस्तिनापुरात् आगच्छति। ६. गान्धार्याः भ्राता शकुनिः अस्ति। ७. विदुरः सभायां नीतिवचनं कथयति। ८. सुदामा द्वारकां गच्छति। ९. द्रौपदी दुःशासनाय क्रुध्यति। १०. नकुलेन सह सहदेवः अश्वशालां गच्छति।

पाठः - ११

ख. १. निरीक्षितः, निरीक्षिताः २. स्थितौ, स्थिताः ३. शक्तः, शक्तौ, शक्ताः ४. निःसृता, निःसृते, निःसृताः ५. दुष्टा, दुष्टे, दुष्टाः ६. हता, हते ७. भुक्ते, भुक्तानि ८. विन्ने, विन्नानि ९. जितम्, जिते, जितानि १०. शोचितौ, शोचिताः।

ग. बुद्धिः विचलिता, सर्वे प्रविष्टाः, इच्छाभेदाः परित्यक्ताः, निरपेक्षः अनासक्तः, मनः अनुद्विग्नं, सः अतीतः, सः अभिनन्दितः, इन्द्रियाणि प्रवृत्तानि, अङ्गानि संकोचितानि, अयं प्रवृत्तः, प्रज्ञा प्रतिष्ठिता, यः रोगपीडितः, सः अवहितः, योगी स्थितः।

घ. १. मोहितः, मोहितौ, मोहिताः २. हुतम्, हुते, हुतानि ३. सुनिश्चितेन, सुनिश्चिताभ्याम्, सुनिश्चितैः ४. युक्ताय, युक्ताभ्याम्, युक्तेभ्यः ५. सक्तात्, सक्ताभ्यम्, सक्तेभ्यः ६. समाहितस्य, समाहितयोः, समाहितानाम् ७. स्मृतायाम्, स्मृतयोः, स्मृतासु ८. निरुद्धेन, निरुद्धाभ्याम्, निरुद्धैः ९. प्रोताय, प्रोताभ्याम्, प्रोतेभ्यः १०. विमूढे, विमूढयोः, विमूढेषु ११. ज्ञातस्य, ज्ञातयोः, ज्ञातानाम् १२. आस्थितात्, आस्थिताभ्याम्, आस्थितेभ्यः १३. नियताय, नियताभ्याम्, नियतेभ्यः १४. प्रव्यथितम्, प्रव्यथिते, प्रव्यथितानि १५. विस्मितः विस्मितौ विस्मिताः।

ङ. २. पाण्डवैः धार्तराष्ट्राः हताः। ३. अर्जुनेन पाण्डवानीकम् दृष्टम्। ४. अहङ्कारिणा अहं कर्ता इति मतम्। ५. अज्ञानेन ज्ञानम् आवृतम्। ६. भगवता अभ्युत्थानार्थम् आत्मा सृष्टः। ७. अखिलेन कर्मणा ज्ञाने परिसमाप्तम्। ८. ज्ञानिना गुरुणापि दुःखेन न विचालितम्। ९. परमेण ज्ञानेन हृदि व्यवस्थितम्। १०. कृष्णेन पार्थाय ऐश्वरं रूपं दर्शितम्।

च. १. आत्मा न मृतः। २. गाण्डीवं स्रस्तम्। ३. मे मनः भ्रान्तम् / भ्रमितम्। ४. जातिधर्माः उत्सादिताः। ५. विश्वरूपं दृष्ट्वा अर्जुनः भीतः। ६. अर्जुनः उभयोः सेनयोः मध्ये स्थितः। ७. धीरः न मुग्धः। ८. असतः भावः न विन्नः।

छ. १. तेन उपाविश्यत। तेन उपविष्टम्। २. तेन अभाष्यत। तेन भाषितम्। ३. पण्डितैः गतासवः न अन्वशुच्यन्त। पण्डितैः गतासवः न अन्वशोचिताः। ४. स्थितेन तत्त्वतः अचल्यत। स्थितेन तत्त्वतः चलितम्। ५. देवेन भक्तानां योगक्षेमम् औह्यत। देवेन भक्तानां योगक्षेमम् ऊढम्। ६. देवव्रतैः देवाः अयायन्त। देवव्रतैः देवाः याताः। ७. मत्तः सर्वेण प्रावृत्यत। मत्तः सर्वेण प्रवर्तितम्। ८. केनचित् एषः आश्चर्यवत् अदृश्यत। केनचित् एषः आश्चर्यवत् दृष्टः। ९. प्रसक्तैः कामभोगेषु अपत्यत। प्रसक्तैः कामभोगेषु पतितम्।

ज. १. ब्रह्मविदः जनाः ब्रह्म गताः। २. योगी परमपुरुषम् उपेतः। ३. देवयजः देवान् याताः। ४. भगवच्छरणाः मायां तीर्णाः। ५. सैनिकाः कुरुक्षेत्रम् आगताः। ६. भक्ताः भगवत्परीक्षाम् उत्तीर्णाः। ७. कर्मकरः ग्रामं गतः। ८. अतिथयः गृहम् आगताः। ९. पाण्डवाः रणनदीम् उत्तीर्णाः। १०. योगी निर्वाणपरमां शान्तिम् अधिगतः। ११. ज्ञानी ज्ञानप्लवेन वृजिनं सन्तीर्णः। १२. यज्ञशिष्टामृतभुजः सनातनं ब्रह्म याताः। १३. कुरुपाण्डवाः कुरुक्षेत्रे समवेताः।

झ. १. अस्माभिः महत् पापं कर्तुं व्यवसितम्। २. भगवता द्विविधा निष्ठा प्रोक्ता। ३. अर्जुनेन भगवतः सुदुर्दर्शं रूपं दृष्टम्। ४. किं कर्म किमकर्मेति कविभिः अपि अत्र मोहितम्। ५. तत्त्वदर्शिभिः ज्ञानम् उपदिष्टम्। ६. वश्यात्मना उपायतः योगः प्राप्तुं शक्तम्। ७. ईश्वरेण सूत्रे मणिगणा इव

विश्वं प्रोतम्। ८. मायया अपहृतज्ञानैः आसुरः भावः आश्रितः। ९. कृष्णेन स्वप्रकृतिम् अवष्टभ्य पुनः पुनः विसृष्टम्। १०. तव वचनेन मम मोहेन विगतम्। ११. अर्जुनेन पुरुषोत्तमस्य ऐश्वरं रूपं दृष्टम्। १२. वासुदेवेन सौम्यवपुः भूत्वा अर्जुनः आश्वास्तः। १३. ज्ञानं प्राप्य सर्वैः मुनिभिः सिद्धिः गता। १४. द्रुपदपुत्रेण पाण्डवानां चमूः व्यूढा। १५. माधवपाण्डवाभ्यां महति स्यन्दने स्थितम्।

ञ. १. प्रतिष्ठिता २. भूतानि ३. प्रतिष्ठितम् ४. सन्तुष्टः ५. असक्तः ६. आस्थिताः ७. व्यवस्थितौ ८. नियोजितः ९. प्राप्तम् १०. नष्टः ११. व्यतीतानि १२. पूताः १३. सृष्टम् १४. कृतम् १५. स्थितः।

ट. १. विविक्तसेविना वैराग्यं समुपाश्रितम्। २. भगवता इदं जगत् ततम्। ३. कृष्णेन अर्जुनस्य संशयः छिन्नः। ४. योगयुक्तेन नैष्ठिकी शान्तिः आप्ता। ५. ज्ञानिना ज्ञानप्लवेन वृजिनं सन्तीर्णम्। ६. श्रद्धावता ज्ञानं लब्धम्। ७. अर्जुनेन प्रज्ञावादाः भाषिताः। ८. मलेन आदर्शः आवृतः। ९. मुमुक्षुभिः कर्म कृतम्। १०. ब्रह्मणः मुखे बहवः यज्ञाः वितताः। ११. अर्जुनेन कृष्णः प्रपन्नः। १२. गुडाकेशेन हृषीकेशः उक्तः। १३. अर्जुनेन कृष्णप्रसादात् स्मृतिः लब्धा। १४. सञ्जयेन कृष्णार्जुनयोः संवादः श्रुतः।

पाठः - १२

ख. २. मातुः शिक्षणम्, माता ३. पुत्रस्य षोडशवर्षीयताप्राप्तिः, पुत्रः ४. आत्मविश्वासस्य आगमनम्, आत्मविश्वासः ५. बन्धूनाम् आगमनम्, बन्धवः ६. वस्त्राणां जरणम्, वस्त्राणि ७. भीमस्य प्रहारः, भीमः।

ग. २. नृत्यस्य दर्शनम्, नृत्यम् ३. जलस्य पानम्, जलम् ४. परीक्षाफलस्य ज्ञानम्, परीक्षाफलम् ५. नेत्रयोः निमीलनम्, नेत्रे ६. द्वारस्य उद्घाटनम्, द्वारम् ७. घटनायाः दर्शनम्, घटना।

घ. १. प्रयत्नः कृतः। सः सर्वम् अलभत। २. शास्त्रं पठितम्। बुद्धिः तीक्ष्णा अभवत्। ३. योगाभ्यासः कृतः। अनारोग्यम् अपगतम्। ४. अध्ययनं कृतम्। सफलता प्राप्ता। ५. सङ्कटम् आपतितम्। मित्रं साहाय्यम् अकरोत्। ६. वर्षाः आगताः। बालाः छत्राणि उदघाटयन्। ७. पुष्पमाला निर्मिता। पूजारम्भः कृतः। ८. द्वारम् उद्घाटितम्। मिलिन्दः पत्रं दृष्टवान्। ९. दुर्भिक्षं वर्धितम्। वस्तूनां मूल्यम् अवर्धत। १०. गीता गङ्गोदकं पीतम्। पुनर्जन्म न प्राप्तम्। ११. अहरागमः जातः। सर्वाः व्यक्तयः अव्यक्तात् प्राभवन्। १२. रात्र्यागमः जातः। सर्वाः व्यक्तयः अव्यक्तसंज्ञके प्रलीनाः अभवन्। १३. गीताम्भसि स्नानं कृतम्। संसारमलनाशः अभवत्। १४. सर्वभूतानि नष्टानि। अव्यक्तः न विनष्टः।

ङ. १. वर्षाकाले जलसञ्चये जायमाने ...। बालकेषु नौकानिर्माणं कुर्वत्सु ...। २. वृष्टौ आरभमाणायां ...। जनेषु छत्रम् उद्घाटयत्सु ...। ३. महत्यां वृष्टौ जायमानायां ...। कवौ काव्यरचनां कुर्वति ...। ४. वायौ वेगेन वहति ...। मेघगर्जनायां जायमानायां...। ५. आनिशं वृष्टौ जायमानायां...। प्रपातेषु जलपूरितेषु जायमानेषु ...। ६. पर्जन्ये जायमाने ...। अन्ने सम्भवति ...।

च. १. स्वजनेषु हतेषु...। २.बुद्धौ स्थितायां...। ३. इन्द्रियेषु संहृतेषु ...। ४. कामे सञ्जाते...। ५. निशायां जातायां...। ६. आत्मनि अवस्थिते...।

छ. १. पुण्ये क्षीणे ...। २. सौम्ये मानुषे रूपे दृष्टे ...। ३. इन्द्रियेषु इन्द्रियार्थेषु संहृतेषु ...। ४. विनियते चित्ते आत्मनि अवस्थिते ...। ५. सततयुक्तेषु भक्तेषु भगवन्तं प्रीतिपूर्वकं भजत्सु ...। ६. उग्रे अद्भुते च रूपे दृष्टे ...। ७. केशवार्जुनयोः अद्भुते संवादे स्मृते ...। ८. अधर्मस्य अभ्युत्थाने जाते ...। ९. शङ्खेषु ध्मातेषु ...। १०. शरीरेषु जीर्णेषु ...।

ज. १. कृष्णे नृत्तवति ...। २. आरक्षके गृहीतवति...। ३. सुरेशे दीपं ज्वालितवति सति ...। ४. गोपाले गाः नीतवति ...। ५. कैकेय्यां वरं पृष्टवत्यां सत्यां ...। ६. पाण्डवेषु वनवासार्थं गतवत्सु सत्सु ...। ७. कृष्णे गतवति...। ८. द्रोणे चक्रव्यूहं निर्मितवति सति ...। ९. अभिमन्यौ चक्रव्यूहं प्रविष्टवति ...। १०. शिखण्डिनि सम्मुखम् आगतवति...। ११. युधिष्ठिरे उक्तवति ...। १२. धृतराष्ट्रे पृष्टवति...।

झ. १. द्रोणे मृतवति...। २. कर्णे मृतवति...।

ञ. १. तस्य गात्रेषु सन्नेषु...। २. मुखे परिशुष्के ...। ३. वेपथौ जाते...। ४. रोमहर्षे जाते ...।

ट. १. सन्तोषे छायाचित्राणि पश्यति सति ...। २. सख्योः प्रलपन्त्योः सत्योः...। ३. विमाने डयमाने सति ...।

४. सूर्ये उदयमाने..। ५. मीरायां पठन्त्यां ...। ६. लवकुशयोः गायतोः सतोः ...। ७. राघवे भाषमाणे सति ...। ८. रवौ अधीयाने सति...। ९. रुग्णे औषधं स्वीकुर्वति सति ...। १०. बालके शयाने सति ...। ११. सचिने गीतं शृण्वति सति ...। १२. यात्रिके गृहसङ्केतं पृच्छति सति ...। १३. उपदेशे कथ्यमाने सति ...। १४. अर्जुने तपस्यां कुर्वति...। १५. भीष्मे शरशय्यायां शयाने...।

ठ. १. कुलक्षये जाते ...। २. कुलधर्मेषु नश्यत्सु ...। ३. अधर्मे अभिभूते...। ४. कुलस्त्रीषु प्रदुष्यन्तीषु...। ५. वर्णसङ्करे जायमाने...।

पाठः - १३

क. १.विद्।२.प्रच्छ्।३.दृश्।४.भाष्।५. शुच्।६. मुह्।७.व्यथ्।८.कृप्।९.विद्।१०.अर्ह्।११.विद्।१२.मन्।१३.वच्।१४.भू।१५.भू। १६. गम्। १७. युध्। १८. युध्। १९. भू। २०. कृ। २१. आप्। २२. कथ्। २३. या। २४. वद्। २५. स्था। २६. ब्रू। २७. शास्। २८. तिज्। २९. विद्। ३०. युध्। ३१. युज्। ३२. श्रु। ३३. भू। ३४. अस्। ३५. कृ। ३६. इष्। ३७. भुज्। ३८. जि। ३९. जि। ४०. नुद्। ४१. भाष्। ४२. आस्। ४३. गम्। ४४. भू।

ख. १.लट्.,प्र.पु.,ब.व.२.लट्.,प्र.पु.,ब.व..३.लट्.,प्र.पु.,ए.व.४.लट्.,प्र.पु.,ए.व.५.लट्.,प्र.पु.,ए.व. ६.लट्.,प्र.पु.,ए.व.७.लट्.,प्र.पु.,ए.व.८.लट्.,प्र.पु.,ए.व.९.लट्.,प्र.पु.,ए.व.१०.लट्.,प्र.पु,.ए.व.११.लिट्.,प्र.पु.,ए.व. १२.लुट्.,प्र.पु.,ए.व.१३.लृट्.,म.पु.,ए.व.१४.लृट्.,म.पु.,ए.व.१५.लृट्.,म.पु.,ए.व.१६.लृट्.,उ.पु.,ए.व. १७.लृट्.,प्र.पु.,ए.व.१८.लृट्.,म.पु.,ए.व.१९.लृट्.,म.पु.,ए.व.२०.लृट्.,उ.पु.,ए.व.२१.लृट्.,म.पु.,ए.व. २२.लृट्.,उ.पु.,ए.व.२३.लृट्.,प्र.पु.,ए.व.२४.लृट्.,प्र.पु.,ए.व.२५.लृट्.,प्र.पु.,ए.व.२६.लृट्.,उ.पु.,ए.व. २७.लोट्.,म.पु.,ए.व. २८.लोट्.,म.पु.,ए.व. २९. लोट्.,म.पु.,ए.व. ३०.लोट्.,म.पु.,ए.व. ३१.लोट्.,म.पु.,ए.व. ३२. लोट्.,म.पु.,ए.व. ३३. लोट्.,म.पु.,ए.व. ३४. लोट्.,म.पु.,ए.व. ३५.विधि.,प्र.पु.,ए.व.३६. विधि.,उ.पु.,ए.व.३७. विधि.,प्र.पु.,ए.व. ३८. लुङ्.,उ.पु.,ए.व.।

ग. उवाच। नियोजयसि। प्राह, अब्रवीत्। शंससि, ब्रूहि। करोति। ज्ञास्यसि, शृणु। उच्यते। प्रवक्ष्यामि, मोक्ष्यसे। शृणु, वक्ष्यामि। पर्युपासते। वेत्ति, प्राहुः, अभिधीयते। प्रवक्ष्यामि। प्राहुः, वेद। यजन्ते। इच्छामि।

पाठः - १४

क. १. अर्जुनः एकां गोणीं ददाति। २. तौ याचकं पश्यतः। ३. सः भिक्षां याचते। ४. चोराः गोणीं चोरयन्ति। ५. अर्जुनः कारणं पृच्छति। ६. सः माणिक्यं घटे स्थापयति। ७. याचकः निद्रां करोति। ८. सा गृहं प्राप्नोति। ९. अर्जुनः कृष्णस्य स्तुतिम् आरभते। १०. श्रीकृष्णः हसित्वा तं वक्ति। ११. अहं मीनं रक्षामि। १२. सः मीनं क्रीणाति। १३. अर्जुनः श्रीकृष्णं नमस्करोति। १४. श्रीकृष्णः अर्जुनं वक्ति। १५. सः मीनं जले क्षिपति।

ख. आ + चर् + य + ते = आचर्यते, गम् + य + ते = गम्यते, श्रू + य + ते = श्रूयते, दृश् + य + ते = दृश्यते, सेव् + य + ते = सेव्यते, वन्द् + य + ते = वन्द्यते, क्षाल् + य + ते = क्षाल्यते, लभ् + य + ते = लभ्यते, सूच् + य + ते = सूच्यते, चि + य + ते = चीयते, पाल् + य + ते = पाल्यते, जप् + य + ते = जप्यते, त्यज् + य + ते = त्यज्यते, पच् + य + ते = पच्यते, लोक् + य + ते = लोक्यते, ज्ञा + य + ते = ज्ञायते।

ग. श्लाघते = श्लाघ्यते, प्रेषयति = प्रेष्यते, वितरति = वितीर्यते, जिघ्रति = घ्रायते, अर्चति = अर्च्यते, सहते = सह्यते, वन्दते = वन्द्यते, आलोकते = आलोक्यते, जानाति = ज्ञायते, गायति = गीयते।

घ. कर्तरिरूपाणि = गायति, कुरुते, वर्धते, सहते, यतते, भाषते, जानीते, शोभते, द्योतते, बिभेति, कम्पते, भुङ्क्ते, दत्ते, वर्तते, लिखति। कर्मणिरूपाणि = पीयते, अर्च्यते, अधीयते, श्रूयते, लिप्यते, प्रमुच्यते, अभिधीयते, उप्यते, सेव्यते, प्रदर्श्यते, संगृह्यते, रच्यते, जप्यते, वितीर्यते, त्यज्यते, दीयते, सूच्यते, उच्यते, विधीयते, हन्यते, दृश्यते।

ङ. आप्नोति, ध्यायति, शृणोति, बध्नाति, वहति, स्तौति, पुनाति, परिदहति, जपति, प्रणमति, पठति, पश्यति, गच्छति, स्मरति, अर्चति, पृच्छति, जानाति, यजते, तरति, मथ्नाति।

च. १. विषादः त्वचं परिदहति । २. कोऽपि पुरुषः आत्मानं न हन्ति । ३. ज्ञानिनः आत्मानम् अविकार्यं वदन्ति। ४. योगिनः समत्वं योगं वदन्ति । ५. कामात्मनः बुद्धिं समाधौ न विदधति । ६. कर्माणि तं न बध्नन्ति । ७. कर्मयोगी कर्म कृत्वा अपि न निबध्नाति । ८. तत्त्वज्ञानं सर्वं कर्म ज्ञाने परिसमापयति । ९. साङ्ख्याः यत् स्थानं प्राप्नुवन्ति तत् योगाः अपि गच्छन्ति । १०. सरोवरे अम्भः पद्मपत्रं न लिम्पति । ११. कामकारः फले सक्तम् अयुक्तं निबध्नाति । १२. महत् दुःखं योगं न विचालयति । १३. जीवभूता प्रकृतिः इदं जगत् धारयति । १४.वेदान्तिनः ब्रह्मणः स्वभावम् अध्यात्मं वदन्ति। १५. अविकम्पः योगः विभूतिज्ञातारं युङ्क्ते। १६. देहवन्तः अव्यक्तां गतिं दुःखेन अवाप्नुवन्ति। १७. शास्त्राणि इदं शरीरं क्षेत्रम् इति अभिदधति। १८. शरीरस्य गुणदोषाः आत्मानं न उपलिम्पन्ति। १९. जनाः फलम् अपेक्ष्य राजसं यज्ञं यजन्ते। २०. उपनिषदः ब्रह्मचर्यादि शारीरं तपः वदन्ति ! २१. दाम्भिकः राजसं तपः करोति । २२. जनाः अपात्रेभ्यः तामसं दानं ददति । २३. मोक्षकाङ्क्षिणः फलम् अनपेक्ष्य विविधाः यज्ञादिक्रियाः कुर्वन्ति । २४. शास्त्राणि कर्मफलत्यागिनम् एव त्यागी इति अभिदधति । २५. पुरुषः मोहात् यत् कर्म आरभते तत् तामसम् ।

छ. १. केनापि हन्यमाने शरीरे आत्मा न हन्यते । २. वायुना अम्भसि नौः ह्रियते । ३. ज्ञानिभिः कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् मिथ्याचारः उद्यते । ४. कर्मभिः योगयुक्तः पुरुषः न लिप्यते । ५. शास्त्रैः सर्वसङ्कल्पसन्न्यासी योगारूढः इति उद्यते । ६. वेदैः कूटस्थः अक्षरः इति उद्यते । ७. अफलाकाङ्क्षिभिः सात्त्विकः यज्ञः इज्यते । ८. जनैः प्रत्युपकारार्थं राजसं दानं दीयते । ९. कामेप्सुना साहङ्कारेण राजसं कर्म क्रियते ।

ज.

झ. १.नेमिरे २.प्रणेमे ३. तत्यजे ४. चिन्तयाञ्चक्रिरे ५. अभिननन्दिरे ६. आह्वयाञ्चक्रिरे ७. परिशीलयामासाते ८. ददृशे ९.पेचिरे १०. चिक्रियिरे ११. नमश्चक्राते १२. ऊह्ये १३. ममन्थे १४. चिक्षिपे १५. क्षालयाञ्चक्रिरे ।

ञ. १. चेतारः २. स्मर्ता ३. क्षालयितारः ४. उपस्थातारः ५. चालयितारः ६. श्रावयिता ७. पूरयिता ८. पीडयिता ९. यष्टा १०. आचरिता ।

ट. १. करिष्यते २. श्रावयिष्यते ३. दास्यते ४. करिष्यते ५. ताडयिष्यते ६. सूचयिष्यते ७. प्रक्ष्यते ८. प्रार्थयिष्यते ९. नंस्यते १०. प्रणंस्यते ।

ठ. १. शिष्येण परीक्षा लिख्यताम् । २. नीतया कृष्णफलकं मार्ज्यताम् । ३. मयूरेण अग्रे गम्यताम् । ४. अन्तेवासिभिः स्वधर्मः आचर्यताम् । ५. सेवकाभ्यां शाकाः कर्त्यन्ताम् । ६. मया लेखन्यः क्रीयन्ताम् । ७. सज्जनैः यमनियमाः आचर्यन्ताम् । ८. दिनेशेन मार्जारः गृह्यताम् । ९. भगिन्या दीपः ज्वाल्यताम् । १०. भगवता वयं रक्ष्यामहै ।

ड. १. असृज्यन्त । ब्रह्मा प्रजाः असृजत् । २. अयाच्यत । इन्द्रः कवचकुण्डलम् अयाचत । ३. अदीयत । कर्णः कवचकुण्डलम् अददात् । ४. अपीयत । भक्ताः गीतामृतम् अपिबन् । ५. अमुच्यत । अश्वत्थामा दिव्यास्त्रम् अमुञ्चत् । ६. अनाश्यन्त । कृष्णः दुष्टान् अनाशयत् । ७. अक्रीयन्त । छात्राः पुस्तकानि अक्रीणन् । ८. अलभ्यत । श्रद्धावन्तः ज्ञानम् अलभन्त । ९. अलिख्यन्त । गणेशः श्लोकान् अलिखत् । १०. अक्रियत । पाण्डवौ कार्यम् अकुरुताम् ।

ढ. १. कृष्णेन मार्गः सूच्येत । कृष्णः मार्गं सूचयेत् । २. माधवेन कर्मयोगः कथ्येत । माधवः कर्मयोगं कथयेत् । ३. भवद्भिः भीष्मः एव अभिरक्ष्येत । भवन्तः भीष्मम् एव अभिरक्षेयुः । ४. केनापि विषयाः न स्मर्येरन् । कोऽपि विषयान् न स्मरेत् । ५. अर्जुनेन उभयपक्षयोः सैन्यम् अवलोक्येत । अर्जुनः उभयपक्षयोः सैन्यम् अवलोकयति । ६. त्वया मम रूपम् अवलोक्येत । त्वं मम रूपम् अवलोकेथाः । ७. त्वया पाण्डुपुत्राः दृश्येरन् । त्वं पाण्डुपुत्रान् पश्येः । ८. द्रोणेन व्यूहः रच्येत । द्रोणः व्यूहं रचयेत् ९. कृष्णेन रथः नीयेत । कृष्णः रथं नयेत् । १०. जयद्रथेन वञ्चना क्रियेत । जयद्रथः वञ्चनां कुर्यात् ।

ण. १. कृषीष्ट २. श्रोषीष्ट ३. दासीष्ट ४. कारयिषीष्ट ५. ताडयिषीष्ट ६. कर्क्षीष्ट ७. नंसीष्ट ८. प्रार्थयिषीष्ट ९. प्रणंसीष्ट १०. गंसीष्ट ।

त. १. अवहे २. अकारि ३. अदायिषत ४. अदायिषत ५. अकारि ६. प्रदायि ७. अदायि ८. अगामि ९. अपालि १०. अपायि ।

थ. १. अकरिष्यत २. अपाठयिष्यत ३. अपठिष्यत ४. अध्मास्यत ५. अकरिष्यत ६. प्राप्स्यत ७. अस्मरिष्यत ८. अलेखिष्यत ९. व्यरचयिष्यत १०. पर्यपालयिष्यत ।

पाठः - १५

क. १.व्याघ्रेण धाव्यते। २. कमलैः विकस्यते। ३. प्रेक्षकैः उपविश्यते। ४. त्वया कुप्यते। ५. ज्वरेण वृध्यते। ६. अस्माभिः क्रीड्यते। ७. दीपेन ज्वल्यते। ८. खद्योतेन द्योत्यते। ९. मीनेन जले जीव्यते। १०. बालेन मातरि विश्वस्यते। ११. हंसैः डीयते। १२. मयूराभ्यां नृत्यते। १३. वध्वा लज्यते। १४. सरिता उह्यते। १५. सौदामन्या प्रकाश्यते। १६. कच्छपेन प्लूयते। १७. पर्णैः कम्प्यते। १८. मया स्थीयते। १९. शिशुना हस्यते। २०. देवकीनन्दनेन भूयते।

ख. १. गाण्डीवः हस्तात् स्रंसते। २. नारायणः आषाढमासस्य एकादश्यां स्वपिति। ३. मीनः जलात् बहिः न जीवति। ४. ग्रीष्मकाले वृक्षस्य पर्णानि शुष्यन्ति। ५. शिवस्य ताण्डवकारणात् पृथ्वी कम्पते। ६. कौरवपाण्डवाः कुरुक्षेत्रे युद्ध्यन्ते। ७. भवती कस्मिन् नगरे वसति ? ८. मेघरहिते खे नक्षत्राणि शोभन्ते। ९. कुपितः सिंहः उच्चैः गर्जति। १०. हिमालयात् गङ्गा प्रभवति। ११. दुग्धं विना बुभुक्षया बालकः रोदिति। १२. प्रतिमासं कृष्णपक्षे चन्द्रमाः क्षयति। १३. जले वटपर्णस्य उपरि पिपीलिका प्लवति। १४. वर्षाकाले मयूराः आनन्देन नृत्यन्ति। १५. परस्तुतिं श्रुत्वा सज्जनाः कदापि न ईर्ष्यन्ति।

ग. १. ललज्जे। २. विवेशे। ३. चकम्पे। ४. शिश्ये। ५. चुक्रुधे। ६. ववृधे। ७. एधाञ्चक्रे। ८. तस्थे। ९. ललम्बे। १०. उद्विविजे।

घ. १. नर्तिता २. पतिता ३. शोभिता ४. भ्रमिता ५. उदेता ६. रन्ता ७. विकसिता ८. सत्ता ९. शोष्टा १०. भाता।

ङ. १. स्थास्यते २. स्रंसिष्यते ३. शक्ष्यते ४. पतिष्यते ५. उत्सत्स्यते ६. दोक्ष्यते ७. व्यथिष्यते ८. कल्पिष्यते ९. वेत्स्यते १०. योत्स्यते।

च. १.म्रियताम् २. क्लिद्यताम् ३. शुष्यताम् ४. युज्यताम् ५. अभिनन्द्यताम् ६. वृत्यताम् ७. जन्यताम् ८. जागर्यताम् ९. स्थीयताम् १०. सिद्ध्यताम्।

छ. १.अवृत्यत, भीष्मः युद्धक्षेत्रे अवर्तत २. अजीव्यत, प्राणिनः अजीवन् ३. अजन्यत, धेनुः अजायत ४. अचेष्ट्यत, मनुष्यः अचेष्टत ५. अलीयत, भक्तः अलीयत ६. आस्यत, युधिष्ठिरः आस्त ७. अधाव्यत, क्रीडकः अधावत ८. अहृष्यत, श्रद्धावन्तः अहृष्यन् ९. उदविज्यत, संशयात्मा उदविजत १०. अरम्यत, मनः अरमत।

ज. १. तुष्येत, सन्तोषी तुष्येत् २. चल्येत, अश्वः चलेत् ३. रम्येत, योगी रमेत ४. नीयेत, सारथिः नयेत् ५. यत्येत, एकलव्यः यतेत ६. ईह्येत, लोभी ईहेत ७. युध्येत, योद्धारः युध्येरन् ८. नश्येत, मोहः नश्येत् ९. भष्येत, जीवः भषेत् १०. शक्येत, जयद्रथः शक्नुयात्।

झ. १. हसिषीष्ट २. लजिषीष्ट ३. रङ्क्षीष्ट ४. श्वसिषीष्ट ५. ष्ठीविषीष्ट ६. हृषिषीष्ट ७. नंसीष्ट ८. विकसिषीष्ट ९. प्रणंसीष्ट १०. यतिषीष्ट।

ञ. १. अहासि २. अलज्जि ३. अकम्पि ४. अकूर्दि ५. अक्षयि ६. अग्लायि ७. अघूर्णि ८. अफालि ९. अशायि १०. अमूर्छि।

ट. १. अभ्राजिष्यत २. अस्थास्यत ३. अत्वरिष्यत ४. अव्यथिष्यत ५. अस्यन्दिष्यत ६. अनटिष्यत ७. अजेष्यत ८. अकखिष्यत ९. अज्वलिष्यत १०. अह्वलिष्यत।

पाठः - १६

क. १. कास्यमानम् २. कम्प्यमानम् ३. सह्यमानम् ४. स्पन्दमानम् ५. स्मयमानम् ६. ध्मायमानः ७. गम्यमाना ८. स्फुर्यमाणः ९. नीयमाना १०. उच्यमानः ११. ज्ञायमाना १२. शुष्यमाणम् १३. क्रुध्यमानः १४. श्रूयमाणा।

ख. १. अर्जुनेन उभयोः सेनयोः मध्ये रथं स्थापयितुं कृष्णः निर्दिष्टः। २. अर्जुनेन सर्वान् स्वबान्धवान् दृष्ट्वा नैराश्यम् अनुभूतम्। ३. क्षत्रियस्य कृते युद्धम् उद्घाटितेन स्वर्गद्वारेण सदृशम् अस्ति। ४. युद्धम् अकुर्वतः जीवनं मरणात् अपि कष्टकरं भविष्यति।

ग. १. दीयमानः, दीयमानौ, दीयमानाः २. प्राप्यमाणेन, प्राप्यमाणाभ्याम्, प्राप्यमाणैः ३. क्रीयमाणात्, क्रीयमाणाभ्याम्, क्रीयमाणेभ्यः ४. बध्यमानस्य, बध्यमानयोः बध्यमानानाम् ५. पृच्छयमानायाम्, पृच्छयमानयोः, पृच्छयमानेषु ६. इष्यमाणम्, इष्यमाणे, इष्यमाणानि ७. त्यज्यमानम्, त्यज्यमानौ, त्यज्यमानान्।

घ. १. विभज्यमानम् २. उद्घाट्यमानायाम् ३. पठ्यमानाम् ४. प्रसार्यमाणस्य ५. लिख्यमानम् ६. गम्यमानस्य ७. याच्यमानम् ८. क्रियमाणम् ९. दीयमानेन।

ङ. १. मया प्रथमतया पच्यमानं भवता आस्वादनीयम्। २. तेन निरीक्ष्यमाणः परीक्षापरिणामः श्वः उद्घोष्येत। ३. त्वया यत् आरभ्यमाणं तत् कार्यं

शीघ्रं समापय। ४. सैनिकेन क्रियमाणे युद्धे शत्रुः मरणं प्राप्नोति। ५. श्रीमता दीयमानेन धनेन याचकः सन्तोषम् अनुभवति। ६. जनैः महता वैभवेन आचर्यमाणं पर्व दीपावली अस्ति। ७. वक्त्रा उच्यमानः विषयः प्रेरकः अस्ति।

च. १. धृतराष्ट्रेण पृच्छमानाय सञ्जयाय व्यासः दिव्यं चक्षुः दत्तवान्। २. कृष्णेन उभयोः सेनयोः मध्ये स्थाप्यमाने रथे अर्जुनः तिष्ठति। ३. कामेप्सुना क्रियमाणं कर्म तामसं भवति। ४. अफलप्रेप्सुना विधीयमानं कर्म सात्त्विकं भवति। ५. नरेण प्रत्युपकारार्थं फलमुद्दिश्य वा दीयमानं दानं राजसं भवति। ६. नरेण अनुपकारिणे दातव्यम् इति धिया दीयमानं दानं सात्त्विकं भवति। ७. अफलाकाङ्क्षिणा इज्यमानः विधिदृष्टः यज्ञः सात्विकयज्ञः भवति। ८. सात्त्विकैः प्रीयमाणाः आहाराः रस्याः हृद्याः स्निग्धाः च भवन्ति। ९. राजसैः इष्यमाणाः आहाराः कट्वम्ल-लवणात्युष्णतीक्ष्णरुक्षविदाहिनः भवन्ति। १०. तामसैः काम्यमानं भोजनं यातयामं गतरसं पूति पर्युषितं च भवति। ११. अफलाकाङ्क्षिभिः नरैः श्रद्धया तप्यमानं तपः सात्विकं परिचक्षते।

छ. १. कर्मणि शानजन्तम् २. कर्तरि शानजन्तम् ३. कर्मणि शानजन्तम् ४. कर्मणि शानजन्तम् ५.कर्तरि शानजन्तम् ६. कर्तरि शानजन्तम् ७. कर्मणि शानजन्तम् ८. कर्मणि शानजन्तम् ९. कर्मणि शानजन्तम्।

ज. १.पितामहेन ध्मायमानः शङ्खः तुमुलं ध्वनिं करोति। २. योगिना संयम्यमानानि प्रमाथीनि इन्द्रियाणि प्रसभं मनः हरन्ति। ३. पुरुषेण ध्यायमानाः विषयाः सङ्गं जनयन्ति। ४. भगवता प्रवर्त्यमानं कालचक्रं सर्वोऽपि अनुवर्तयेत्। ५. श्रेष्ठेन आचर्यमाणं कर्म इतरैः जनैः आचर्यते। ६. प्रकृतेः गुणैः क्रियमाणानां कर्मणां कर्ता अहम् इति अहङ्कारविमूढात्मा मन्यते। ७. भगवता अर्जुनाय प्रोच्यमानः योगः पुरा विवस्वते प्रोक्तः आसीत्। ८. अस्माकं व्यतीयमानानि जन्मानि वयं न जानीमः। ९. श्रद्धावता लभ्यमानं ज्ञानं तं परां शान्तिम् अधिगमयति। १०. भगवता क्रियमाणानि कर्माणि तं न लिम्पन्ति। ११. मुनिभिः अभिधीयमानं शरीरं क्षेत्रं यः जानाति सः एव क्षेत्रज्ञः। १२. देवैः अपि द्रष्टुम् इष्यमाणं विश्वरूपम् अर्जुनः दृष्टवान्। १३. पार्थेन पृच्छयमानान् संशयान् कृष्णः दूरीकरोति। १४. दुर्योधनेन दर्श्यमानं पाण्डवानीकं द्रुपदपुत्रेण व्यूढं वर्तते। १५.शत्रुणा हन्यमाने शरीरे शरीरी न हन्यते। १६. कृष्णेन उपदिश्यमानां गीतां सञ्जयः व्यासप्रसादात् श्रुतवान्। १७. भीष्मेण अभिरक्ष्यमाणं बलं पर्याप्तं वर्तते। १८. वासुदेवेन आख्यायमानं ज्ञानं गुह्यात् गुह्यतरं वर्तते।

झ. १. गाण्डीवेन स्रंस्यमानम् अस्ति। २. पार्थस्य शरीरे रोमहर्षेण जायमानम् अस्ति। ४. विश्वरूपं पश्यता सञ्जयेन हृष्यमाणम् अस्ति। ४. कृष्णेन प्रहस्यमानम् अस्ति। ५. सेनानायकैः योद्धुम् अवस्थीयमानम् अस्ति। ६. अर्जुनस्य गात्रैः सीद्यमानम् अस्ति। ७. ब्रह्मभूतेन प्रसन्नात्मना न शुच्यमानम् अस्ति। ८. धृतराष्ट्रेण उपविश्यमानम् अस्ति। ९. अर्जुनस्य मोहेन नश्यमानम् अस्ति। १०. ईश्वरेण सर्वभूतानां हृद्देशे स्थीयमानम् अस्ति।

पाठः - १७

क. १. लोकयानेन आगमनीयम् / आगन्तव्यम्। २. भगवता अवतरणीयम् / अवतरितव्यम्। ३. मुनिना न कोपनीयम् / कोपितव्यम्। ४. मन्त्रिणा पठनीयम् / पठितव्यम्। ५. सेवकेन सूचनीयम् / सूचयितव्यम्। ६. ईश्वरेण रक्षणीयम् / रक्षितव्यम्। ७. वृष्ट्या भवनीयम् / भवितव्यम्। ८. भवत्या ज्ञानीयम् / ज्ञातव्यम्। ९. छात्रेण स्मरणीयम् / स्मर्तव्यम्। १०. विजयेन लभनीयम् / लब्धव्यम्। ११. शिवधनुषा कम्पनीयम् / कम्पितव्यम्। १२. आम्रफलेन पतनीयम् / पतितव्यम्।

ख. अनीयर्प्रत्ययान्तानि = करणीयम्, स्थापनीयम्, पतनीयम्, पठनीयम्, अवतरणीयम्, चलनीयम्, श्रवणीयम्, वेदनीयम्, अटनीयम्, स्तवनीयम्, स्नानीयम्, दानीयम्। तव्यत्प्रत्ययान्तानि = त्यक्तव्यम्, वक्तव्यम्, कर्तव्यम्, भोक्तव्यम्, द्रष्टव्यम्, पातव्यम्, गन्तव्यम्, भवितव्यम्, प्रष्टव्यम्, नेतव्यम्, ग्रहीतव्यम्, धर्तव्यम्।

ग. १. त्यक्तव्यम् २. करणीयः ३. कर्तव्यम् ४. मन्तव्यम् ५. योद्धव्यम् ६. भवितव्यम् ७. त्यजनीयः ८. करणीयानि ९. करणीयम् १०. समाचरणीयम्।

घ. १. योधनीयम् २. ज्ञातव्यम् ३. मननीयम् ४. बोद्धव्यम् ५. करणीयम् ६. त्यक्तव्यः ७. भवनीयम् ८. नेतव्यम् ९. चिन्तनीयम् १०. मन्तव्यम्।

ङ. १. नश्, अनीयर् २. अनु+वृत्, अनीयर् ३. उद्+स्था,तव्यत् ४. ग्रह्, तव्यत् ५. कृ, अनीयर् ६. प्रति+ज्ञा, तव्यत् ७. ज्ञा, तव्यत् ८. परि+मार्ग, तव्यत् ९. विद्, तव्यत् १०.अनु+वृत्,अनीयर्।

च. १. जनाः भवन्तं जानीयुः । २. मङ्गला गणेशं नमेत् । ३. अतिथिः गृहम् आगच्छेत् । ४. धनिकः अर्थसाहाय्यं कुर्यात् । ५. शिक्षकः छात्राणां दोषान् परिहरेत् । ६. शिवभक्तः प्रदोषव्रतम् आचरेत् । ७. महिलाः तुलसीपूजनं कुर्युः । ८. सेवकः दीपान् ज्वालयेत् । ९. श्रोतारः भाषणानि शृणुयुः । १०. भवान् किञ्चित् कष्टं सहेत । ११. सज्जनः कान् अपि न निन्देत् । १२. संस्था एतादृशान् कार्यक्रमान् आयोजयेत् । १३. बालकः पितरौ वन्देत । १४. सर्वे दुग्धं पिबेयुः । १५. गुरवः आसन्देषु उपविशेयुः । १६. विशाखा स्वपुत्रीः पाठयेत् । १७. अतुलः पाठ्यपुस्तके आनयेत् । १८. कर्मकराः समयेन कार्यालयं प्राप्नुयुः । १९. राजा न्यायं कुर्यात् । २०. सः एकां नगरीं चिनुयात् । २१. क्रोधसमये वयं दीर्घं श्वस्याम । २२. भारतीयाः स्वदेशे निर्मितानि वस्तूनि क्रीणीयुः । २३. अहम् आवेदनं प्रेषयेयम् । २४. वयं लक्ष्यं साधयेम । २५. मूर्तिकारः मृत्तिकया भगवत्प्रतिमां निर्मायात् । २६. मानवः कृतस्य कर्मणः फलं भुञ्जीयात्।

छ. १. विश्वेशेन ग्रामात् आगमनीयम् / आगन्तव्यम् । २. मया अप्रियं न वदनीयम् / वदितव्यम् । ३. बालकैः भगवान् नमनीयः / नन्तव्यः । ४. स्पर्धकैः शीघ्रं धावनीयम् / धावितव्यम् । ५. शिक्षकाभ्यां बोधनीयम्/ बोद्धव्यम् । ६. रुग्णेन औषधं स्वीकरणीयम् / स्वीकर्तव्यम् । ७. माधव्या कदलीफलानि वितरणीयानि/ वितरितव्यानि । ८. केन निर्णयः सूचनीयः / सूचयितव्यः ? ९. भक्तैः देवः स्मरणीयः / स्मर्तव्यः । १०. दम्पतिभ्यां सत्यनारायणः पूजनीयः / पूजयितव्यः ।

ज. १. प्रत्येकेन वृक्षाः संवर्धनीयाः । २. अमृतया सिक्थवर्तिके आनेतव्ये । ३. संस्थया वार्तापत्रं वितरणीयम्। ४. भास्करेण निसर्गचित्रे रचनीये । ५. मात्रा शाटिकाः क्रेतव्याः । ६. युष्माभिः रात्री यापनीये । ७. प्रेक्षागृहस्य नियमः पालनीयः । ८. पण्डितेन शास्त्रे अध्येतव्ये । ९. बालिकाभिः कन्दुकाः क्षेप्तव्याः । १०. छात्रैः गुरुवचनं श्रवणीयम् । ११. तेन साधनीयानि कार्याणि कानि ? १२. केन शिबिराणि आयोजनीयानि ? १३. वरुणेन एते रोटिके पचनीये । १४. पुस्तकस्य पृष्ठं न कर्तयितव्यम् । १५. राज्ञा ब्राह्मणाय धेनवः दातव्याः । १६. देवेन भक्तानां चिन्ता परिहरणीया । १७. बालैः दुग्धं पातव्यम् । १८. विद्यार्थिभिः समयसारिण्यः द्रष्टव्याः ।

झ.

ञ.

ट.

ठ.

पाठः - १८

क.

ख.

क्त	परिसमाप्तम्, आच्छादितः, मृतानाम्, पुराकृतस्य, समाहितः, जातः, मारिते, मृतः, जीवितः, कृतम्, कृतम्, उपस्थितः, प्रेरितः, स्थितान्, समागतः, कारणीभूताः, कृतम्, गतः, नित्यसम्बद्धौ, परिसमाप्तः, अपराद्धम्, समाहितः
क्तवतु	गतवान्, उक्तवान्, श्रावितवान्, आनीतवान्, उक्तवान्, प्रेरितवान्, प्राप्तवान्
क्त्वा	दृष्ट्वा, बद्ध्वा, श्रुत्वा, श्रुत्वा, श्रुत्वा, श्रावयित्वा
ल्यप्	नमस्कृत्य, अवलोक्य, आकर्ण्य, वीक्ष्य
शतृ	सान्त्वयन्, बोधयन्, रुदतीम्, कथयन्, अनङ्गीकुर्वन्, वदन्
शानच्	शयानः, याचमानः, भाषमाणः
तव्यत्	कर्तव्यः
अनीयर्	चिन्तनीयम्, दण्डनीयः
तुमुन्	मारयितुम्

ग. १.अध्यापिका, अध्यापकम् २. क्षेपिका, क्षेपकम् ३. गणिका, गणकम् ४. कर्षिका, कर्षकम् ५. चालिका, चालकम् ६. जनिका, जनकम् ७. रक्षिका, रक्षकम् ८. पाचिका, पाचकम् ९. याचिका, याचकम् १०. नर्तकी, नर्तकम्।

घ.

ङ. १. अर्चित्री, अर्चितृ २. त्रात्री, त्रातृ ३. धात्री, धातृ ४. भेत्री, भेतृ ५. वेत्री, वेतृ ६. ज्ञात्री, ज्ञातृ ७. विक्रेत्री, विक्रेतृ ८. भोक्त्री, भोक्तृ १०. रचयित्री, रचयितृ।

च.

छ. १. अर्चकः २. द्रष्टारः ३. अध्येत्री ४. रचयिता ५. मोचकः ६. पठितारः ७. पातकम् ८. लेखकः ९. विश्वविजेता १०. प्रणेता ११. रक्षितारः १२. आयोजकाः १३. तारकम् १४. क्षालयित्री १५. मोहकम्।

ज. भ्रमणम्, दर्शनम्, मोचनम्, यजनम्, दानम्, ज्वलनम्, छेदनम्, जल्पनम्, अर्जनम्।

झ.

ञ. २. लघुम् अश्नाति तच्छीलम् अस्य ३. विविक्तं सेवते तच्छीलम् अस्य ४. अहं वदति तच्छीलम् अस्य ५. कर्म अनुबध्नाति तच्छीलम् अस्य ६. कर्म सजति तच्छीलम् अस्य ७. नासाभ्यन्तरे चरति तच्छीलम् अनयोः ८. धनुः धरति तच्छीलम् अस्य ९. तत्त्वं पश्यन्ति तच्छीलम् एषाम् १०. यज्ञशिष्टम् अश्नन्ति तच्छीलम् एषाम्।

ट. ण्वुलन्तानि = याजकः, जनकः, मानकः, अध्यापकः, तारकः, तापकः, भञ्जकः, वञ्चकः, ग्राहकः, मोचकः, कर्तकः, जागरिकः, कर्षकः, नर्तकः। तृजन्तानि = जनिता, ध्याता, अर्चिता, त्राता, चर्चिता, भक्ता, ग्राहयिता, त्यक्ता, वक्ता, मोक्ता, कथयिता, रक्षिता, पोषिता, जनिता। ल्युडन्तानि = जननम्, अयनम्, चयनम्, नयनम्, त्यजनम्, भजनम्, रक्षणम्, त्राणम्, पवनम्, कर्तनम्, दहनम्, माननम्, हननम्, कथनम्।

पाठः -१९

क. मानवाः २. श्रद्धावन्तः ३. वार्ष्णेय ! ४. आदित्यानाम् ५. समत्वम् ६. मनीषिणः, ७. देहिनः ८. दौर्बल्यम् ९. नैष्कर्म्यम् १०. धार्तराष्ट्राणाम्।

ख. १. सात्यकिः (इञ्) २. भारत ! (अण्) ३. ऐरावतः (अण्) ४. द्रौपदेयाः ५. दाशरथिः (इञ्) ६. शैवः (अण्) ७. धार्तराष्ट्रान् (अण्) ८. पाण्डवः (अण्)।

ग. १. कृष्णः, वसुदेवस्य अपत्यं पुमान् वासुदेवः (अण्) २. युधिष्ठिरः, कुन्त्याः अपत्यं पुमान् कौन्तेयः (ढक्) ३. गरुडः, विनतायाः अपत्यं पुमान् वैनतेयः (ढक्) ४. सूर्यः, अदितेः अपत्यं पुमान् आदित्यः (ण्य) ५. अभिमन्युः, सुभद्रायाः अपत्यं पुमान् सौभद्रः (अण्) ६. दुर्योधनः, धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रः (अण्) ७. उमा, पर्वतस्य अपत्यं स्त्री पार्वती (अण्) ८. सीता, जनकस्य अपत्यं स्त्री जानकी (अण्) ९. हनुमान्,अञ्जनायाः अपत्यं पुमान् आञ्जनेयः (ढक्) १०. हिरण्याक्षः, दितेः अपत्यं पुमान् दैत्यः (ण्य)।

घ. १. ज्ञानम् अस्य अस्मिन् वा अस्ति = ज्ञान + मतुप् = ज्ञानवान्, तेषाम्। २. दीप्तिः अस्य अस्मिन् वा अस्ति = दीप्तिः + मतुप् = दीप्तिमान्, तम्। ३. श्रद्धा अस्य अस्मिन् वा अस्ति = श्रद्धा + मतुप् = श्रद्धावान्। ४. हेतुः अस्य अस्मिन् वा अस्ति = हेतु + मतुप् = हेतुमान्, तैः। ५. न आदिः अस्य अस्मिन् वा अस्ति = अनादि + मतुप् = अनादिमत्। ६. बलम् अस्य अस्मिन् वा अस्ति = बल + मतुप् = बलवान्। ७. भक्तिः अस्य अस्मिन् वा अस्ति = भक्ति + मतुप् = भक्तिमान्। ८. श्रुतिः अस्य अस्मिन् वा अस्ति = श्रुति + मतुप् = श्रुतिमत्। ९. अन्तः अस्य अस्मिन् वा अस्ति = अन्त + मतुप् = अन्तवत्। १०. आद्यन्तौ अस्य अस्मिन् वा स्तः, ते।

ङ. ज्ञानवान्, ज्ञानवती, ज्ञानवत्। दीप्तिमान्, दीप्तिमती, दीप्तिमत्। श्रद्धावान्, श्रद्धावती, श्रद्धावत्। हेतुमान्, हेतुमती, हेतुमत्। अनादिमान्, अनादिमती, अनादिमत्। बलवान्, बलवती, बलवत्। भक्तिमान्, भक्तिमती, भक्तिमत्। श्रुतिमान्, श्रुतिमती, श्रुतिमत्। अन्तवान्, अन्तवती, अन्तवत्। आद्यन्तवान्, आद्यन्तवती, आद्यन्तवत्।

च. १. देहः अस्य अस्मिन् वा अस्ति इति, देहः = देह + इनि २. त्यागः अस्य अस्मिन् वा अस्ति त्यागः = त्याग + इनि ३. किरीटः अस्य अस्मिन् वा अस्ति इति, तम् किरीटम् = किरीट + इनि ४. शिखरम् एषाम् एषु वा अस्ति इति, तेषाम्, शिखरः = शिखर + इनि ५.योगः अस्य अस्मिन् वा अस्ति इति, योगः = योग + इनि ६. सुखम् = सुख + इनि ७. वैरम् अस्य अस्मिन् वा अस्ति इति, वैरम् = वैर + इनि ८. पक्षः अस्य

अस्मिन् वा अस्ति इति, पक्षौ अस्य अस्मिन् वा स्तः = पक्ष + इनि ९. चक्रम अस्य अस्मिन् वा अस्ति इति, चक्रम् = चक्र + इनि १०. गदा अस्य अस्मिन् वा अस्ति इति, गदा = गदा + इनि ।

छ. देहवान्, देहवती, देहवत् । त्यागवान्, त्यागवती, त्यागवत् । किरीटवान्, किरीटवती, किरीटवत् । शिखरवान्, शिखरवती, शिखरवत् । योगवान्, योगवती, योगवत् । सुखवान्, सुखवती, सुखवत् । वैरवान्, वैरवती, वैरवत् । पक्षवान्, पक्षवती, पक्षवत् । चक्रवान्, चक्रवती, चक्रवत् । गदावान्, गदावती, गदावत् ।

ज. २. योगी, योगवान् ३. भोगी, भोगवान् ४. सुखी, सुखवान् ५. बली, बलवान् ६. विदाही, विदाहवान् ७. संन्यासी, संन्यासवान् ८. फलाकाङ्क्षी, फलाकाङ्क्षावान् ९. परित्यागी, परित्यागवान् १०. रागी, रागवान् ११. विषादी, विषादवान् १२. कर्मी, कर्मवान् १३. अर्थी, अर्थवान् १४. सुकृती, सुकृतवान् १५. दुष्कृती, दुष्कृतवान् १६. क्षेत्री, क्षेत्रवान् १७. दम्भी, दम्भवान् १८. मानी, मानवान् १९. संयमी, संयमवान् ।

झ. २. अणु + इमनिच् = अणिमन्, अणिमा ३. गुरु + इमनिच् = गरिमन्, गरिमा ४. शोण + इमनिच् = शोणिमन्, शोणिमा ५. श्वेत + इमनिच् = श्वेतिमन्, श्वेतिमा ६. काल + इमनिच् = कालिमन्, कालिमा ७. लघु + इमनिच् = लघिमन्, लघिमा ८. पीत + इमनिच् =पीतिमन्, पीतिमा ।

ञ. १. पारुष्यम्, परुषत्वम्, परुषता २. सौक्ष्म्यम्, सूक्ष्मत्वम्, सूक्ष्मता ३. साम्यम्, समत्वम्, समता ४. दाक्ष्यम्, दक्षत्वम्, दक्षता ५. त्रैगुण्यम्, त्रिगुणत्वम्, त्रिगुणता ६. कार्पण्यम्, कृपणत्वम्, कृपणता ७. वैराग्यम्, विरागत्वम्, विरागता ८. नैष्कर्म्यम्, निष्कर्मत्वम्, निष्कर्मता ९. स्थैर्यम्, स्थिरत्वम्, स्थिरता १०. प्राधान्यम्, प्रधानत्वम्, प्रधानता ।

ट. त्व = २. समत्वम् ३.अनादित्वम् ४.भोक्तृत्वम् ५. मानित्वम् ६. अदम्भित्वम् ७. समचित्तत्वम् ८.अमृतत्वम् ९. पृथक्त्वम् १०. चञ्चलत्वम् । तल् = २. मनुष्यता ३. कातरता ४. समता ५. दृढता ६. सहिष्णुता ७. मित्रता ८. ममता ९. एकता १०. दीर्घसूत्रता । ष्यञ् = २. आस्तिक्यम् ३.पारुष्यम् ४. शौर्यम् ५. क्लैब्यम् ६. कालुष्यम् ७. स्थैर्यम् ८. औचित्यम् ९. गौरक्ष्यम् १०. सौम्यम् ।

ठ. १. आसुरः, आसुरी, आसुरम् २. दैवः, दैवी, दैवम् ३. ऐश्वरः, ऐश्वरी, ऐश्वरम् ४. क्षात्रः, क्षात्री, क्षात्रम् ५. मानुष्यः, मानुषी, मानुष्यम् ६. आर्षः, आर्षी, आर्षम् ७. राक्षसः, राक्षसी, राक्षसम् ८. साङ्ख्यः, साङ्ख्यी,साङ्ख्यम् ९. ब्राह्मणः, ब्राह्मणी, ब्राह्मणम् १०. गान्धर्वः, गान्धर्वी, गान्धर्वम् ।

पाठः -२०

क. १. गीता, इयम्, न, केवलम्, प्रस्तवीति, सर्वासाम्, अपि, उपनिषदाम्, सारभागम्, अपि, तु, श्रुतिसारम्, अपि, प्रस्तौतितराम् । २. सांख्ययोगदर्शनयोः, सिद्धान्तानाम्, वैशद्येन, विवेचनात्, प्रतिपादनात्, च, दर्शनसारसंग्रहः, अपि, अत्र, उपलभ्यते । ३. गीतायाम्, ये, भावाः, सिद्धान्ताः, च, प्रतिपाद्यन्ते, ते, क्वचित्, समासतः, क्वचित्, च, विस्तरशः, उपनिषत्सु, वेदेषु, च, समुपलभ्यन्ते । ४. गीतायाम्, विषयक्रमेण, हृद्येन, भावाभिव्यञ्जनप्रकारेण, साधिष्ठया, विवृत्या, च, ते, भावाः, समासाद्यन्ते, इति, प्रमुखम्, गीतायाः, महत्त्वम् । ५. विहाय, आसक्तिम्, फलप्रेप्साम्, अनास्थाय, कर्मणि, प्रवर्तितव्यम् । ६. निष्कामकर्मकरणेन, चेतः, प्रसीदति, धीः, विकसति, मानसम्, आनन्दम्, अनुभवति, न, कर्माणि, बध्नन्ति, मानवम्, न, विषयाः, विमोहयन्ति, मानसम्, न, पतति, जीवः, स्वलक्ष्यात्, न, च, मोहः, मनः, मोहयति । ७. न, कर्मणाम्, अनारम्भात्, नैष्कर्म्यम्, पुरुषः, अश्नुते । ८. जगति, अस्मिन्, जीवः, कर्म, कुर्वन्, एव, जीवितुम्, अभिलष्येत्, एवम्, मानवस्य, लक्ष्यनाशः, न, भवति, न, च, सः, कर्मभिः, बध्यते । ९. आत्मनः, अजरत्वम्, अमरत्वम्, अनादित्वादिकम्, च, महता, विस्तरेण, गीतायाम्, सम्प्राप्यते । १०. विशदीभवति, एतस्मात्, यत्, गीता, इयम्, सर्वासाम्, उपनिषदाम्, समेषाम्, दर्शनानाम्, श्रुतीनाम्, च, सारम्, सरलतया, सरण्या, प्रस्तवीति, इति ।

ख. १. एवम्, उक्त्वा, अर्जुनः, सङ्ख्ये, रथोपस्थे, उपाविशत् । विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः ॥ २. एषा, ब्राह्मी, स्थितिः, पार्थ, न, एनाम्, प्राप्य, विमुह्यति । स्थित्वा, अस्याम्, अन्तकाले, अपि, ब्रह्मनिर्वाणम्, ऋच्छति ॥ ३. एवम्, बुद्धेः, परम्, बुद्ध्वा, संस्तभ्य, आत्मानम्, आत्मना । जहि, शत्रुम्, महाबाहो, कामरूपम्, दुरासदम् ॥ ४. तस्मात्, अज्ञानसम्भूतम्, हृत्स्थम्, ज्ञानासिना, आत्मनः । छित्त्वा,

एनम्, संशयम्, योगम्, आतिष्ठ, उत्तिष्ठ, भारत ॥ ५. भोक्तारम्, यज्ञतपसाम्, सर्वलोकमहेश्वरम्। सुहृदम्, सर्वभूतानाम्, ज्ञात्वा, माम्, शान्तिम्, ऋच्छति ॥ ६. योगिनाम्, अपि, सर्वेषाम्, मद्गतेन, अन्तरात्मना। श्रद्धावान्, भजते, यः, माम्, सः, मे, युक्ततमः, मतः ॥ ७. साधिभूताधिदैवम्, माम्, साधियज्ञम्, च, ये, विदुः । प्रयाणकाले, अपि, च, माम्, ते, विदुः, युक्तचेतसः ॥ ८. वेदेषु, यज्ञेषु, तपस्सु, च, एव, दानेषु, यत्, पुण्यफलम्, प्रदिष्टम्। अत्येति, तत्, सर्वम्, इदम्, विदित्वा, योगी, परम्, स्थानम्, उपैति, च, आद्यम् ॥ ९. मन्मनाः, भव, मद्भक्तः, मद्याजी, माम्, नमस्कुरु। माम्, एव, एष्यसि, युक्त्वा, एवम्, आत्मानम्, मत्परायणः ॥ १०. अथवा, बहुना, एतेन, किम्, ज्ञातेन, तव, अर्जुन। विष्टभ्य, अहम्, इदम्, कृत्स्नम्, एकांशेन, स्थितः, जगत् ॥ ११. मत्कर्मकृत्, मत्परमः, मद्भक्तः, सङ्गवर्जितः । निर्वैरः, सर्वभूतेषु, यः, सः, माम्, एति, पाण्डव ॥ १२. ये, तु, धर्म्यामृतम्, इदम्, यथोक्तम्, पर्युपासते। श्रद्धानाः, मत्परमाः, भक्ताः, ते, अतीव, मे, प्रियाः ॥ १३. क्षेत्रक्षेत्रज्ञयोः, एवम्, अन्तरम्, ज्ञानचक्षुषा। भूतप्रकृतिमोक्षम्, च, ये, विदुः, यान्ति, ते, परम्॥ १४. ब्रह्मणः, हि, प्रतिष्ठा, अहम्, अमृतस्य, अव्ययस्य, च। शाश्वतस्य, च, धर्मस्य, सुखस्य, ऐकान्तिकस्य, च ॥ १५. इति, गुह्यतमम्, शास्त्रम्, इदम्, उक्तम्, मया, अनघ । एतत्, बुद्ध्वा, बुद्धिमान्, स्यात्, कृतकृत्यः, च, भारत ॥ १६. तस्मात्, शास्त्रम्, प्रमाणम्, ते, कार्याकार्यव्यवस्थितौ । ज्ञात्वा, शास्त्रविधानोक्तम्, कर्म, कर्तुम्, इह, अर्हसि ॥ १७. अश्रद्धया, हुतम्, दत्तम्, तपः, तप्तम्, कृतम्, च, यत्। असत्, इति, उच्यते, पार्थ, न, च, तत्, प्रेत्य, नो, इह ॥ १८. यत्र, योगेश्वरः, कृष्णः, यत्र, पार्थः, धनुर्धरः। तत्र, श्रीः, विजयः, भूतिः, ध्रुवा, नीतिः, मतिः, मम ॥

ग. १. इयं गीता न केवलं सर्वासाम् उपनिषदां सारभागं प्रस्तवीति अपि तु श्रुतिसारम् अपि प्रस्तौतितराम् । २. गीतायां ये सिद्धान्ताः प्रतिपादिताः ते वेदेषु उपनिषत्सु च क्वचित् समासतः क्वचित् विस्तरशः च समुपलभ्यन्ते । ३. अत्र दिङ्मात्रं निष्कामकर्मयोगप्रतिपादकाः केचन श्लोकाः निर्दिश्यन्ते । ४. यजुर्वेदे चत्वारिंशत्तमे अध्याये ईशोपनिषदि च निष्कामकर्मयोगस्य मूलरूपेण वर्णनं समासाद्यते । ५. गीतायां यज्ञस्य महत्त्वम् आवश्यकता च निरूप्यते । ६. इष्टान् भोगान् हि वो देवाः दास्यन्ते यज्ञभाविताः । ७. अयम् अजः नित्यः शाश्वतः पुराणः हन्यमाने शरीरे (अपि) न हन्यते । ८. कठोपनिषदि विभोः विस्तरशो विभूतिवर्णनं निरीक्ष्यते । ९. यत्र सुप्तः न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। १०. मम पुत्राः पाण्डुपुत्राः च किम् अकुर्वत ?

घ. नरोत्तमं नरं नारायणं देवीं सरस्वतीं व्यासं च नमस्कृत्य एव ततो जयम् उदीरयेत्।

ङ. १.पार्थ ! यदा सर्वान् मनोगतान् कामान् प्रजहाति आत्मना एव आत्मनि तुष्टः तदा स्थितप्रज्ञः उच्यते । २. दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीः मुनिः उच्यते । ३. यः सर्वत्र अनभिस्नेहः तत् तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता (भवति) । ४. यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तस्य प्रज्ञा प्रतिष्ठिता (भवति) । ५. निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते (किन्तु) अस्य रसः अपि परं दृष्ट्वा (स्थितस्य) निवर्तते । ६. कौन्तेय ! यततः अपि विपश्चितः पुरुषस्य मनः प्रमाथीनि इन्द्रियाणि प्रसभं हरन्ति हि। ७. तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। यस्य वशे इन्द्रियाणि (सन्ति) तस्य प्रज्ञा प्रतिष्ठिता (भवति)। ८. विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते। सङ्गात् कामः सञ्जायते। कामात् क्रोधः अभिजायते। ९. क्रोधात् सम्मोहः भवति। सम्मोहात् स्मृतिविभ्रमः, स्मृतिभ्रंशात् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति। १०. विधेयात्मा तु रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति। ११. प्रसादे (सति) अस्य सर्वदुःखानां हानिः उपजायते। प्रसन्नचेतसः हि बुद्धिः आशु पर्यवतिष्ठते। १२. अयुक्तस्य बुद्धिः नास्ति। अयुक्तस्य च भावना न। अभावयतः च शान्तिः न। अशान्तस्य कुतः सुखम्? १३. चरतां हि इन्द्रियाणां यत् मनः अनुविधीयते तत् अस्य प्रज्ञां वायुः अम्भसि नावम् इव हरति। १४. महाबाहो ! तस्मात् यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता (भवति)। १५. सर्वभूतानां या निशा तस्यां संयमी जागर्ति, यस्यां भूतानि जाग्रति सा पश्यतः मुनेः निशा। १६. आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः यं प्रविशन्ति सः शान्तिम् आप्नोति कामकामी न। १७. यः पुमान् सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः चलति सः शान्तिम् अधिगच्छति। १८. पार्थ ! एषा ब्राह्मी स्थितिः। एनां प्राप्य न विमुह्यति। अन्तकाले अपि अस्यां स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति।

****